नभूयानित्यादिविरोधिः स्थूलानखानोक्तेः आहच सूक्ष्मा यान
भविविक्तादात्मनश्चैवं भवत्यस्माच्छरीरादात्मनः नचात्मनी
वउच्यते शारीरादात्मन इति भेदाभिधानात् स्वमादिस्वशरीर
पव शारीरस्तद्विधाभिन्नोनामरूपादिष्ववास्थितेरितिवचनाक्ष
रुद्रे अस्मादितीश्वरव्याख्यानुशं शारीरोतानुभोक्ते यो जीव स्व
स्वरसक्तितः अनादि बंधनस्त्वेको नित्यमुक्तस्तथापरइति
वचनान्नारदीये भेदश्रुतेश्च सतिगत्यंतरे पुरुषभेद एव क
स्य न नवस्याभेदः आहच प्रविविक्तभुग्यतोयस्माच्छरीर
पुरुषोत्तमः अतोऽभोक्ता च भोक्ता च स्थूलाभोगात्स दैवति
ति गीताकल्पे न तदंते क्षितितदनाधारत्वमुच्यते उक्तंच
नदाश्रितं जगत्सर्वं नासौ क्वचिदाश्रित इति गीताकल्पे त
द्विकचमेवंतायसइत्यत आह ४ ॥

22

भाषाअनुवाद

इन वातो से श्रोता अर्जुन को उत्साह युक्त करके अब प्रकृति जो
माया जिस के द्वारा सृष्टि आदि का कर्तृत्व जो अङ्गीकार किया
है ईश्वरत्व उसका निरूपण उत्तम प्रथम भेद क्रम से दो श्लोक
से कहते है कि भूमि आदि पंचभूत और मन शब्द से मनका का
रण रूप अहङ्कार तथा बुद्धिका कारण महत् तत्व औ अहंकार
की कारणभूत जो अविद्या कहे अज्ञान इस प्रकार से मेरी प्रकृ
ति माया आठ प्रकार की है अथवा पंचभूत तेरूपादि मात्रा
और अहङ्कार से कार्यरूप इंद्री औ मन बुद्धि ये आठ प्रकार जा
नो यद्यपि इहां चौविष भेदो को इन आठ के अन्तर्भूत करि मा
या के आठही प्रकार कहा तोभी देत्रध्याय जो तेरहवां तहां
प्रकृति के चौविश ही तत्वरूप विभाग कहेगे ४ ॥

दोहा

अनल भूमि जल वायु नभ औ मन बुद्धि जोय हंकार यह मोहि
की प्रकृति भिन्नाष्ट विध सोय ४॥

23

अपरेयमितस्त्वन्यांप्रकृतिंविद्धिमेपरां जीवभूतांमहा
वाहोययेदंधार्यतेजगत ५ ॥

शांकरभाष्यटीका

अपरेति अपरानपरानिकृष्टाऽशुद्धानर्थकरी संसाररूपा वन्धनात्मि
केयमितोन्यायथोक्तायास्तु अन्यांविशुद्धां प्रकृतिंममात्मभूतांवि
द्धिमेपरांप्रकृष्टांजीवभूतांक्षेत्रज्ञलक्षणां प्राणधारणनिमित्तभूतां
हेमहावाहोययाप्रकृत्येदं धार्यतेजगदंतःप्रविष्टया ५ ॥

आनंदगिरिकृतटीका

अचेतनवर्गमेकीकर्त्तुं प्रकृतेरष्टधापरिणाममभिधाय विकारा
वच्छिन्नकार्यकलापं चेतनवर्गमेकीकर्त्तुं पुरुषस्यचेतनस्यावि
द्याशक्त्यवच्छिन्नस्यापि प्रकृतित्वं कथयितुमुक्तांप्रकृतिमनूद्यव
र्णयति अपरेति निकृष्टत्वं स्पष्टयति अनर्थकरीति अनर्थकरत्वमे
व स्फोरयति संसारेति कथञ्चिदप्यनन्यत्वव्यावृत्त्यर्थंलक्षणाद्यः अ
न्यामत्यंतविलक्षणामिति यावत् अन्यत्वमेव स्पष्टयति विशुद्धा
मिति प्रकृतिपराद्व्यस्यात्र प्रयुक्तस्यार्थांतरमाह ममेतिप्रकृष्टमेव
मिति प्रकृतिपराद्व्यस्यात्र प्रयुक्तस्यार्थांतरमाह ममेतिप्रकृष्टमेव
भोक्तृत्वेन स्पष्टयति जीवभूतामिति प्रकृत्यंतरादस्याः प्रकृतेर
वांतरविशेषधर्ममाह ययेति नहिजीवरहितं जगद्धारयितुं शक्यमि
त्याशयेनाह अंतरिति ५ ॥

स्वामिकृतटीका

ति माह ॥ अपरामिमांप्रकृतिमुपसंहरन् परांप्र

अष्टधोक्तायाप्रकृतिः इयमपरानिकृष्टाजडत्वात् परार्थत्वाच्च इतः जीवस्वरूपां
सकाशात्परांप्रकृष्टामन्यांजीवभूतांमेप्रकृतिंजानीहि परत्वेहेतुः
ययाचेतनयाक्षेत्रज्ञरूपयास्वकर्मद्वारेणेदंजगद्धार्यते [illegible]
[illegible] ५ ॥

पिशाचभाष्यटीका

अपरानिकृष्टाअशुद्धावंधात्मिकेत्यर्थः यथोक्ताइतअस्मादन्यामां
नरामांतरभूतांमेममेश्वरस्यपरांप्रकृष्टांजीवभूतामात्मभूतांमहा
वाहोययेदंधार्यतेअंतःप्रविष्टयाजगत ५ ॥

रामानुजभाष्यटीका

अपरेयमिति इयंमयापराप्रकृतिः इतस्त्वन्यामितो चेतनतायाः चेतनभो
ग्यभूतायाः प्रकृतेर्विजातीयाकारां जीवभूतां परां तस्या भोक्तृत्वेन प्रधा
नभूतां चेतनरूपां मदीयां प्रकृतिं विद्धि ययेदमचेतनं कृत्स्नं जगद्धार्य
ते ५ ॥

श्रीमनउमकृतटीका

येयमिति प्रत्यक्षेणाया संसारावस्थायां सर्वजनपरिदृश्यमाना साचे
कैव सती प्रकाराष्टकेन भिद्यते इत्येकस्य क्रमाद्व्यन्त्वादेकमेव विस्था
मिति प्रकृतिवादेप्यद्वैतं प्रदर्शितं सेव जीवतत्त्वरूपत्वेपामापरा
सापि ममैव नान्यं च सोभयरूपा वेद्यवेदकात्मकप्रपंचोपरचनवि
चित्रा ननु एव स्वात्मविमलमकुरतलाकलितसकलभावभूमिः
स्वस्वभावात्मिकासः नमव्यभिचारिणी प्रकृतिः सोहमित्यनेन प्र
कृतिः पुरुषपुरुषोत्तमेभ्यो व्यतिरिक्तोपीश्वरः सर्वथा सर्वान्नगान
त्वेन स्थित इति सांख्ययोगयोर्नास्ति भेदवाद इति प्रदर्शितम् इदं
जगद्रूपादि ५ ॥

परमार्थप्रपाटीका

इदानीं परापरत्वविभागमाह अपरेयमिति इयमष्टधा निरूपिता प्र
कृतिरपरा निकृष्टा जडत्वात् इतः सकाशात् परामुत्कृष्टामन्यां जी
वभूतां मे प्रकृतिं विद्धि जानीहि परत्वे हेतुः यया चेतनया देहरू
पया स्वकर्मद्वारेदं जगद्धार्यते ५ ॥

वनमालीटीका

विरूपांश्चेतिमाह अपरेति इयमष्टधाभिन्ना जडरूपाप्रकृर्दृश्याणा
वित्प्रकृतितोपराप्रकृष्टा इतोपराप्रकृतितोन्यां जीवभूतां जीवत्वे
न चिद्रूपत्वेन भूतां सदाविद्यमानां श्रियं प्रकृतिं परां मन्नमां मदधी
नां त्वं विद्धि यया चिद्रूपया जगद्धार्यते चेतनप्रकृत्याधिष्ठिता ज
डाप्रकृतिर्हरीरूपणा काच जगदाकारेण परिणता भवतीत्यर्थः
यद्वा जीवभूतां जीवस्वरूपां भोगजनकप्रकृत्यपेक्षया परां भोक्तृत्वे
न प्रधानभूतां मे मदीयां मदधीनां विद्धि ययेदं कृत्स्नमचेतनं जगा
तः स्वार्जितादृष्टद्वारा धार्यत इत्यर्थः कालशक्तिना भगवता जीवा
दृष्टानुरोधेनैव तु जगतो धारणादिकं न स्वतंत्रो निरपेक्षत्वाद् उदासीन

त्वाच्चेतिभावः ५ ॥ हनुमद्वेजयंतीटीका

अचेतनरूपामिमामपरां प्रकृतिमुपसंहरन् चेतनरूपां परां प्रकृतिमा
ह अपरेयमिति इयं विविधानंतभोगाभोगोपकरणभोगस्थानाद्या
कारकजगद्रूपेणावस्थिता अपरा चेतनरूपायाः प्रकृतेर्निकृष्टा अ
डरूपत्वाच्चेतनाधीनत्वाच्च मदीया प्रकृतिरिति त्वं विद्धि तुशब्दः
पुनरर्थकः एवकारस्थं वारयति तेनयादि तस्य सर्वभागिनि कैवल्यात्
हे महाबाहो आजानुभजमामद्रीकपुरुषलक्षणसमपनेनानेन
पदयपि मनुष्याणामित्यादिनोक्तं शक्तिद्वयसंपन्नमत्स्वरूपज्ञाने
त्वदुर्लभं तथापि त्वं मत्प्रसादात् ज्ञानं प्राप्स्यसीति सूचितं इतोऽचे याः
तनरूपायाः प्रकृतेः सकाशादन्यां विलक्षणां परां चेतनरूपां प्र
कृतिं उत्कृष्टां चेतनत्वात् ज्ञातृत्वाच्च जीवभूतां प्राणधारणरूपां मे
मम प्रकृतिं शक्तिं विद्धि त्वं जानीहि अस्याः परत्वं कुत इत्यपेक्षायामाह
ययेति यया चेतनरूपया प्रकृत्या इदं परार्थसाधनभूतं स्वार्थशून्यं
जडवर्गरूपं जगत् धार्यते स्वतो विशीर्यमाणमनुप्रवेशेनाध्यासेना
दिवास्वभोगाय स्थाप्यते वेत्यर्थः ५ ॥

एवं क्षेत्रलक्षणायाः प्रकृतेरपरत्वं वदन् क्षेत्रज्ञलक्षणां परां प्रकृतिमाह

मधुसूदनीटीका

या प्रागष्टधा प्रोक्ता प्रकृतिः सर्वा चेतनवर्गरूपा सेयमपरा निकृष्टा
(गार्थत्वा) जडत्वात्परार्थत्वात्संसारबंधरूपत्वाच्च इतस्त्वचेतनवर्गरूपायाः क्षेत्र
लक्षणायाः प्रकृतेरन्यां विलक्षणां तु यथाकथंचिदप्यभेदायो
ग्यां जीवभूतां चेतनात्मिकां क्षेत्रज्ञलक्षणां मे ममात्मभूतां विशु
द्धां परां प्रकृष्टां प्रकृतिं विद्धि हे महाबाहो यया क्षेत्रज्ञलक्षणया जी (द)
वभूतया अंतरनुप्रविष्टया प्रकृत्या इदं जगदचेतनजातं धार्यते स्व
तो विशीर्यमाणमुत्तभ्यते अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्या
करवाणीति श्रुतेर्नहि जीवरहितं धारयितुं शक्यमित्यभिप्रायः
५ ॥ [illegible] ॥

सदानंदीटीका

प्रकृतेः क्षेत्ररूपाया अस्याः स्तत्त्वं विभुर्वदन् क्षेत्रज्ञलक्षणां प्राह प्रकृतिं

गी॰
टी॰
सं॰

25

विक्तृतांपरां १ अष्टधोक्तानिकृष्टेयंप्रकृतिर्मलिनात्मना संसारबंधरू
पत्वात्परार्थत्वाज्जडत्वतः १ इतोन्यांप्रकृतिंशुद्धांप्रकृष्टांचेतनात्मि
कां ममात्मभूतांजानीहिपरांक्षेत्रज्ञलक्षणां ३ ययाक्षेत्रज्ञरूपिण्या
सर्वस्यांतःप्रविष्टया जगज्जडमिदंसर्वधार्यतेविश्वधारकं ४ ॥ ५

नीलकंठीटीका

१ ति एवंक्षेत्रात्मिकांप्रकृतिमुक्त्वाक्षेत्रज्ञात्मिकांनामाह अपरेयमिति इ
यंप्रागुक्तासाअपराअश्रेष्ठाजडत्वात् इतस्तुविलक्षणामन्यांपरां
चेतनत्वेनमदनन्यत्वात्उत्कृष्टां मेममसंबंधिनीप्रकृतिंजीवभू
तांप्राणधारणनिमित्तभूतांक्षेत्रज्ञाख्यांविद्धिजानीहिहेमहाबा
हो ययाप्रकृत्यांतःप्रविष्टयाइदंजगत्स्थावरजंगमशरीरात्म
कंधार्यते ५ ॥

आनंदीटीका

१ अस्यां संज्ञातं रेण स्वरूपमाह

१ अपरेयम् इयमष्टप्रकाराप्रकृतिरपरावक्ष्यमाणायाः परप्रकृतेरन्यावि
लक्षणाजडापरतंत्राभोग्याकालतःपरिणामिनीचेत्यर्थः इतस्त्वन्यां
प्रकृतिंविद्धिमेपरां तत्पुनर्व्यतिरेके इतोस्याःप्रोक्तायाअपरायाः प्र
कृतेरन्यांविशिष्टांचेतनांभोक्त्रींस्वतंत्रांनित्यांपरांसर्वतत्त्वप्रेरिकां
मेप्रकृतिंजीवभूतांकालरूपेणशुभाशुभरूपेणचक्षेत्रज्ञतांप्राप्तांविद्धि
ययापरयाप्रकृत्याकर्त्र्याइदंसकलतत्त्वमयंजगद्धार्यतेकालप्रवर्ति
जीवनिबद्धाहिसकलजगत्पदार्थस्थितिः तथाचोक्तं स्वदेहस्था
त्विकंचेतनत्सर्वंसप्तात्स्वचेष्टितं ज्ञानाधिष्ठितः कायोल्वहस्य
वहिलोष्ट्रवत् ५ ॥

रामकंठीटीका

अतएवाह इतउक्तायाःप्रकृतेःतु नरन्यांविलक्षणांपरांप्र
कृष्टांजीवभूतांमायावशाद्वन्योन्यभिन्नत्वेनावभासमानक्षेत्र
ज्ञत्वप्राप्तांमांविद्धि कीदृशीययाकर्तृभूतयेदंयथोक्ततत्वजात
मयंजगद्धार्यते जीवलक्षणपरप्रकृतिनिबद्धाजगत्पदार्थ
स्थितिः एवंमायावभासितपरापरभेदेनजडचेतनेद्वेप्रकृ१
ती ५ ॥ ५ ॥ ५ ॥ ॥

लासिकी टीका

किंच इयं संसारावस्थायां प्रत्यक्षेण परिदृश्यमानाष्टधोक्ता प्र
कृतिरपरा निकृष्टा वेद्यतया स्थूलत्वाज्जडत्वात्परार्थत्वाच्च तुः प
त्नांतरे इतः अर्थ एकात्मना परिणतायाः प्रकृतेः सकाशात्परमा
र्थतोन्यां विलक्षणां तादात्म्यमनापन्नां परां चेतनतया प्रकृष्टां ममे
श्वरस्य प्रकृतिं स्वरूपविस्मरणमापन्नं स्वभावभूतं चिदंशं जीवभू
तोतेत्र त्वंधाम्मां जानीहि नत्वस्वभावभूतस्य चिदंशस्य कथं जीव
त्वशामिरित्यत आह ययेति ययाजीवभूतया प्रकृत्येदं जगद्धार्य
ष्टकादिरूपं तदनुप्रवेशात्सर्वं धार्यते इदमहमिति स्वस्वरूपविस्म
रण इति पूर्वं तादात्म्याध्यासेन परामृश्यते तदुक्तं विरूपाक्षपंचा
शिकायां ग्राहकमेकं त्वजडं जडमन्यद्ग्राह्यमस्ययामनुतेमाया
विमोहितात्माबोधः सोएभेवीसङ्गिरिति तथा च श्रुतिः तेस्व
सृष्ट्वा तदनुप्राविशदिति अनेन जीवेनात्मनानुप्रविश्य नामरू
पे व्याकरवाणीति च स्मृतिरपि कथं त्विदं साक्षिदेहं महतेस्यादि
तीक्ष्णा विदार्य मूर्द्धसीमानं प्रविष्टः संसरत्ययमिति ययेत्येक
वचननिर्देशेन श्रुतस्य बहुत्वं निरस्तमिति तथा च श्रुतिः एक
एव हि भूतात्मा भूते भूते व्यवस्थितः एकधा बहुधा चैव दृश्यते ज
लचंद्रवदिति ५ ॥

पंचोलीटीका

अपरां प्रकृतिमुपसंहरन्परां प्रकृतिमाह अपरेति हे महाबाहो
तग्नः इयं प्रकृतिः अपरा न परा निष्कृष्टा अशुद्धा अनर्थकारि-
णी बंधनात्मका इतः अस्याः यथोक्तायाः प्रकृतेः सकाशादन्यां
विशुद्धां परां प्रकृष्टां जीवभूतां चेतनात्मिकां क्षेत्रज्ञलक्षणां वि
द्धि ययांतःप्रविश्य इदं जगद्धार्यते तां मे मम परां प्रकृतिं वि
द्धि ५ ॥

अपरेयमिति अस्यं भूम्याद्यष्टप्रकारा प्रकृतिरपरा कर्तृसंज्ञादिसा
पेक्षत्वेनास्वतंत्रा नुत्कृष्टा च अतोस्याः प्रकाशनात्परां निरपेक्षां स्वतं
त्रामुत्कृष्टां चान्यां द्वितीयां प्रकृतिं प्रकृष्टायाः स्वजात्युचितत्वेन प्र
कृष्टफलायाः कृतेर्बुद्ध्यादिव्यापारस्य साधनभूतां विद्धि जानीहि
तां च स्वरूपेण कथयति जीवभूतामिति कर्तृस्वरूपामधिकारि
रूपामित्यर्थः अथवा परां सूक्ष्मापेक्षया श्रेष्ठां जीवभूतां जीवंत्यनेने
ति श्रुत्या जीवशब्देन वृत्तिरभिधीयते सा च प्रक्रांतत्वात्क्षत्रि
याणां यजुर्वेदेन सिद्धेति तथा च स्मृतिः ब्राह्मणस्य यजनं भिक्षा
क्षत्रियस्य धनं धनुः वैश्यस्य कृषिवाणिज्यं शूद्रस्य सेवा प्रकीर्ति
तेति एवं च जीवो जीविकाभूतो यजुर्वेदस्तत्स्वरूपां यजुर्वेदप्र
तिपाद्यामिति यावत् तस्याश्च परत्वे हेतुकथनाय ततो विभिन्न
ध्रिययेति यथा च यजुर्वेदस्मृतिपाद्यया प्रकृष्टया बुद्ध्यादिव्यापार
रूपकृत्येदं जगद्धार्यते यजुर्वेदस्य च जगद्धारकत्वमन्नाद्भ
वंतीत्यत्र व्याख्यातं तत एवावधार्यमिति ५॥

मधुभाष्य

५॥

भाषानुवाद

अपर कहे आठ प्रकार निकृष्ट प्रकृति कहिके अब पर कहे उत्कृ
ष्ट प्रकृति को कहते है कि हे महाबाहो यह पूर्व कहो जो अ
ष्ट प्रकार की प्रकृति सो अपर कहे निकृष्ट है क्यों कि वह
जड औ उत्तम प्रकृति के अधीन है किंतु और पर कहे उत्कृष्ट
मेरी प्रकृति व्यवहारिक जीव स्वरूप इस प्रकृति से भिन्न जा
नो जो इस जगत को धारण करती है अर्थात इस के उत्कृष्ट
ता मे कारण यह कि क्षेत्रज्ञ रूप वही चैतन्य शक्ति कर्तृक
स्वकर्म द्वारा इह संसार स्थित है ५ ॥

दोहा

जानहु अपरा यह प्रकृति को यासें दूसरी जोय महाबाहो धरे ज
गत को जीवभूता करि सोय ५॥

27

एतद्योनीनि भूतानि सर्वाणीत्युपधारय अहं कृत्स्न
स्य जगतः प्रभवः प्रलयस्तथा ६ ॥

शांकरभाष्यटीका

एतदिति एतद्योनीन्येते परापरे क्षेत्रक्षेत्रज्ञलक्षणे प्रकृती योनी
येषां भूतानां तान्येतद्योनीनि भूतानि सर्वाणीत्येवमुपधारय जा
नीहि यस्मान्मम प्रकृतिर्योनिः कारणं सर्वभूतानां अतोहं कृत्
स्नस्य समस्तस्य जगतः प्रभवः उत्पत्तिः प्रलयो विनाशस्तथा प्रकृ एं
तिद्वयद्वारेणाहं सर्वज्ञ ईश्वरो जगतः कारणमित्यर्थः ६ ॥

आनंदगिरीकृतटीका

उक्तप्रकृतिद्वये कार्यलिंगकमनुमानं प्रमाणयति एतद्योनीनीति
प्रकृतिद्वयस्य जगत्कारणत्वे कथमीश्वरस्य जगत्तत्कारणत्वं न
उपगतमित्याशंक्याह अहमिति एतद्योनीत्युक्ते समनंतरप्रकृत
ते जीवभूतप्रकृतावेवन्यग्भूतस्याव्यवधानात् प्रकृतिमाशंक्य व्याक
रोति एतद्गति सर्वाणि चेतनाचेतनानि जनिमंतीत्यर्थः सर्व
भूतकारणत्वेन प्रकृतिद्वयमंगीकृतंचेत् कथमहमित्युद्युक्त
मित्याशंक्याह यस्मादिति ममप्रकृती परमेश्वरस्योपाधितया
स्थिते इत्यर्थः नहि प्रकृतिद्वयं कारणमीश्वरश्चेति जगतोऽने
कविधकारणाङ्गीकरणं स्यादित्याशंक्याह प्रकृतीति अपरप्र
कृतिरचेतनत्वात् परप्रकृतेश्चेतनत्वेपि किञ्चिदुक्तत्वात् ईश्व
रस्यैव सर्वज्ञस्य सर्वकारणत्वं युक्तमित्याह सर्वज्ञेति ६ ॥

स्वामिकृतटीका

अनयोः प्रकृतित्वं दर्शयन् स्वस्य तत्त्वा
...स्यादिकारणत्वमाह ॥ एतद्योनीनीति एते क्षेत्रक्षेत्रज्ञस्वरूपे प्रकृती योनी कारणभूते ये
षां तान्येतद्योनीनि स्थावरजंगमात्मकानि सर्वाणि भूतानीति उपधा ति
रय बुध्यस्व तत्र जडा प्रकृतिर्देहरूपेण परिणमते चेतनात्ममदं
शभूता भोक्तृत्वेन देहेषु प्रविश्य स्वकर्मणा तानि धारयति ते च
मदीये प्रकृती मत्तः संभूते अतोहमेव कृत्स्नस्य सप्रकृतिकस्य ज
गतः प्रभवः प्रकर्षेण भवत्यस्मादिति प्रभवः परमकारणमहं

एषां भूतानां [illegible]परापरत्वेनविभक्ता प्रकृतिर्योनिः कारणं येषां तानि एतद्योनीनि भूतानि सर्वाणीत्युपधारय अवगच्छ अतः परं प्रकृति
रूपेण स्थितोऽहं विश्वस्य जगतः प्रभव उत्पत्तिस्थानं प्रलयस्तथा ६

गी॰ त्यर्थः तथा प्रलीयते तेनेति प्रलयः संहर्ताप्यहमेव इत्यर्थः [illegible]
टी॰ पिशाचभाष्यटीका
स॰ [illegible] ६ ॥

रामानुजभाष्यटीका

एतच्चेतनाचेतनसमष्टिरूपमदीयप्रकृतिद्वययोनीनि ब्रह्मादिस्तंवपर्यं
तानि उच्चावचभावेनावस्थितानि चिदचिन्मिश्राणि सर्वाणि भूतानि म
दीयानीत्युपधारय मदीयप्रकृतिद्वययोनीनि हि तानि मदीयान्येव
तथा प्रकृतिद्वययोनित्वेन कृत्स्नस्य जगतस्तयोर्द्वयोरपि मद्योनित्वेन
मदीयत्वेन च कृत्स्नस्य जगतोऽहमेव प्रभवः [illegible] अहमे
व परमपुरुषयोनित्वं [illegible] महानव्यक्ते लीयते अव्यक्तं
[illegible]लीयते तमः परे देव एकीभवति विसाल[illegible]दिते हे
रूपे प्रधानं पुरुषश्च विप्र प्रकृतिर्या मायाख्या [illegible]व्यक्ताव्यक्तस्वरूपिणी
पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि परमात्मा च सर्वेषामाधारः पर
मेश्वरः विष्णुनाम स वेदेषु वेदान्तेषु च गीयते इत्यादिका हि स्मृतिस्ट
[illegible]तयः ६ ॥

श्रीअभिनवगुप्ताचार्यकृतटीका

उपधारय अभ्यासाहितान्तर्भवक्रमेणात्मसमीपं कुरु ६ ॥

परमार्थप्रपाटीका

अथ तदेवाह एतद्योनीनीति एतत्परापरनामकं प्रकृतिद्वयमेव यो
निः कारणं येषां तानि सर्वाणि स्थावराणि जंगमात्मकानि भूतानीति
अवधारय उभयस्वतत्वज्ञाय प्रकृतिर्देहरूपेण परिणमते चेतनात्म
दशा भूतानां भोग्यत्वेन देहेषु प्रविश्य स्वकर्मणा तानि धारयति ते च मदीये ४०
प्रकृती मत्तः संभूते अतोऽहमेव कृत्स्नस्य सप्रकृतिकस्य जगतः प्रभवः
प्रकर्षेण भवत्यस्मादिति प्रभवः परमकारणमहमित्यर्थः तथा प्र
लीयते तेनेति प्रलयः संहर्ताप्यहमेव अत्र ब्रह्मणा द्वितीयाकृति
रपि परमात्मा विश्वं भवनानि यद्व[illegible]निर्हृतानि आसीदन्ति तानि तः सम्रा

णिधाङ्विणमिक्रमानः प्रथमकृद्देवतानाविवेशेतिभाष्यं इयमेनिज्ञयोद॰
र्यंचेत्क्रिंचैश्वकर्मदैवत्यंत्रैष्टुभमितिसर्वानुक्रमः यइमेति योविश्वकर्मा
परमेश्वरः इमाइमानिविश्वाभूतानिजुह्वत् प्रलयकालेयानेपृथिव्या
दीनिमानसप्तलोकान्स्वात्मन्याजुतिप्रक्षेपवत्संहरन् ऋषिरंतोऽि
यार्थदृष्टासर्वज्ञोहोतासंहाररूपस्यहोमस्यकर्तानोस्माकंपिताजन
नकोनिषसादस्वरूपेणास्थितवान् लोकान्संहृत्यस्वयमेकएव
वासीत् आत्मावाइदमग्रएकएवासीत्सदेवसोम्येदमग्रआसीत्
इत्यादिश्रुतिभ्यः सतादृशः परमेश्वरः आशिषाबहुस्यांप्रजायेये
त्येवंरूपयापुनःसिसृक्षयाइविणमिक्रमानः धनोपलक्षितंज
गज्जगमाकांक्षमाणः प्रथमकृत् प्रथममस्व्यक्तिः प्रपंचयाम्मा॰
र्थिकंरूपमाचृण्वन् अवपन्सस्वष्टान् प्राणिहृदयवेशानाविवे
शजीवरूपेणाविष्टवान् अत्रसृष्टिकालेप्रथमकृत्पदेनभूतेषा॰
त्मानंजुह्वामीनिवामीतिवाजसनेयब्राह्मणार्थोदर्शितः ब्राह्मणं
च हुंताहंभूतेष्वात्मानंजुह्वामिभूतान्यात्मनीतितत्सर्वेषुभू
तेष्वात्मानंजुह्वामीतिवाजसनेयब्राह्मणार्थोदर्शितः ब्राह्मणं
च हुत्वेति तत्त्वदेवं नत्वान स्तस्मि ८ ॥

वनमालीटीका

यतस्प्रकृतिद्वयकारणकं कृत्स्नंजगदित्याह यतइतिएतेपरापर
प्रकृतीयोनीयेषांतानिभूतानिभवनधर्मकानिसर्वाणिचेतना
चेतनात्मकानिनिखिलानीत्युपधारय ननुप्रथमेपरोऽदेचिद॰
चिदात्मकप्रकृतिद्वयपरिणामरूपमिदंविश्वंद्वितीयेब्रह्मसृष्टाराजीवापि
श्रुतनन्दप्रकृतेरेवपरिणामस्तस्य सर्वेश्वरस्याप्रक्रोपयोगस्तत्राह
अहमिति यतोवाइमानिभूतानिजायंतेयेनजातानिजीवंतियं
प्रयंत्यभिसंविशंतितद्विजिज्ञासस्वतद्ब्रह्मेत्यादिश्रुतेः कृत्स्नस्यप्रकृत्तू
स्तुजगतः प्रभवः प्रकर्षेणभवत्यस्मादितिप्रभवः उत्पादकः प्रकर्षे
णलीयतेस्मिन्नितिप्रलयः प्रकर्षेणलयप्रदस्वातंत्र्यप्रकृतिद्वया
दानमहंतस्यामीक्षणाद्यवीर्यपायकः होमकः कार्यकारयोरनः
प्रविशप्रधारकस्त्वनंतः कर्तानिर्विकारोचिंत्यशक्तिर्गजन्मादि

गी॰
टी॰
स॰

29

हेतुत्वाद्यत्तन्मम हि महिमविशिष्टो मम तत्त्वेय इति भावः नच निमित्तहेतौ लयो
न दृष्ट इति जगल्लयस्यात्तेन तस्योपादानत्वमिति वाच्यं निमित्तहेतो
स्तन्तुवायादेस्तन्तौ लयदर्शनात् नच तन्तोरुपादानत्वं तन्तूनामिति वाच्यं त
स्यानाशेपि तन्तूनामवस्थानात् उपादानत्वे ब्रह्मणो विकारापत्तेः
न वा समसत्ताकोन्यथाभावरूपो विवर्त्तनपदप्रपंचो ब्रह्म
ण इति वाच्यं अन्यथाभावो ह्यन्यथाभवनमन्यथाभानमात्रं वाद्या
ये विकारित्वापत्तिः द्वितीये विवर्त्तद्रष्टुरधिष्ठानातिरिक्तस्याविव
र्त्तरूपस्याभावेन विवर्त्तासंभवात् विवर्त्तस्य मायिकस्य मायामोहं
विनापरोक्षासंभवेन स्वस्य तत्पालकत्वासंभवात् विवर्त्तकस्य मा
यिकस्य मायामोहं विनापरोक्षासंभवेन स्वस्य तत्पालकत्वासंभ
वात् सत्तयोतप्रतन यत्तस्मात्सर्वमस्त्वनन तत्सृष्ट्वा तदनुप्रावि
शदित्यागमालोचनद्वैकस्य स्रष्टृप्रवेशाद्यनुपपत्तेः नहि शुक्तिरी
दृशएवंकरूप्यं सृजति तत्रानुप्रविशति च अतो वह्नमाकादिनाका
र्यकारणात्मकादिनानियमकत्वसत्ताप्रदत्वाद्यनंतगुणविशि
ष्टो मम तत्त्वेय इति सिद्धम् ६ ॥

उत्तमवैजयंतीटीका

एवं परापरात्मकप्रकृतिद्वयं निरूप्येदानीमनयोः प्रकृतिरूपत्वे दर्शय
न्नेतद्द्वारैव सर्वस्याखिलजगतः कारणमाह एतद्योनीनीति एते चे
तनाचेतनरूपे उभे प्रकृती योनी प्रकृती येषां तानि तथा सर्वाणि स
मस्तानि स्थिरजंगमानि भूतानि ब्रह्मादिस्थावरांतरूपाणि तत्राचेत
नप्रकृतिर्ब्रह्मादिस्थावरांतानामुच्चावचदेहाद्याकारेण देहरूपेण स्थि
ता चेतनरूपा तत्र चेतनरूपा देहेंद्रियादीनवष्टभ्य देहस्थरूपेणा
वस्थिता एवं मत्प्रकृतिद्वयोद्भूतानि भूतानि भवंतीत्येवंप्रकारेण त्व
मवधारय तत्र चेतनाचेतनरूपं तद्वयापि द्वयमेव देहदेहस्थरूपे
ण सर्वेषां स्थिरचररूपाणां भूतानां यद्वियोनिरूपं स्यान्नहि देहबीज
योरिव तयोरेव जगत्कारणत्वसिद्धेः परमेश्वरस्य तेन तत्त्वं नास्तीति वदे
त्तन्नेवं मत्स्वयमहमेव सर्वेषां जगतां कारणं भवामीत्याह अह
मिति अहमहमयाभिन्नस्वरूपः सर्वकारणं भवामीत्याह अह
कारणकारणं सर्वेश्वरः

कृत्स्नस्य समस्तस्य चेतनाचेतनात्मकप्रकृतिद्वयसहितस्य जगतः प्रभवः
प्रभवत्यस्मादिति प्रभव उत्पत्तिकर्ता भवामि तथा तेनैव प्रकारेण प्रलयः
प्रलीयतेऽस्मिन्निति प्रलयो नेनेनेति वा सुत्पत्तेः संहारकर्ताहमेव भवा
मि इत्येवं प्रकृतिद्वययोः सर्वभूतयोनित्वं परमद्वयस्य तु तयोर्यो
नित्वं च श्रुतिस्मृतयोप्याहुः महानव्यक्ते लीयते ऽव्यक्तमक्षरे लीयते
क्षरं तमसि लीयते तमः परे देवे एकीभवति विश्वः स्वरूपान्तरतो दि
ते हेतुरूपेण प्रधानं द्वयस्य प्रकृतिर्या मया व्याख्याताव्यक्ताव्यक्तस्वरू
पिणि द्वयस्याप्युभावे नो लीयते परमात्मनि परमात्मा च सर्वेषा
माधारः परमेश्वरः विश्वनामसु वेदेषु वेदांतेषु च गीयते इत्यादयः
नत्वजामेकां लोहितशुक्लकृष्णां सा प्रजो ऽसेको जुषमाणोऽनुशेते त्व
यमणुक्तं च अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरी
रे अविनाशि तु तद्विद्धि नान स्याहि कथं वा सत्त्वक्षवं जन्मस्तन
स्यचेत्यादिश्रुतिस्मृतिभिः प्रकृतिद्वयस्याजत्वमविनाशित्वं च प्र
तिपादितं स्यात्तद्द्वयात्मकस्य जगतः प्रभवः प्रलयश्च भगवान् क
थं भवति यतोऽजस्याविनाशिनो वस्तुनो जन्मनाशासंभव इति चेत्सत्य
स्यनयोरजत्वेविनाशित्वे सत्यपि आविर्भावतिरोभावमात्रमेव जन्म
नाशशब्दाभ्यामुच्यते जगतस्तु विकारसत्तावतो अचेतनरूपायाः प्र
कृतेर्विकाररूपत्वादनित्यत्वात्परिणामस्वभावत्वाच्च तस्योत्पत्तिर्वि
नाशश्च मृद्घटादिवद्देहाद्याकारेण संभवत्येव चेतनरूपा प्रकृति
स्तु निर्विकारत्वेन यथात्मस्वरूपेण कर्तृत्वभोक्तृत्वादिरूपेणाति
ष्ठति अतः परमेश्वरादजयोरनयोः प्रकृतिद्वययोस्तदात्मका
स्य सरूपस्य जगतः अजन्मादिकं संभवत्येव नासंभवशंकाशंय
लेशोपि सत्कार्यवादस्तु नासतो विद्यते भाव इत्यस्मिन् श्लोके स्व
ष्टतरेणोक्तस्तत्रैव द्रष्टव्यः संदिग्धचित्तैरित्यर्थः ६ ॥

उक्तप्रकृतिद्वये कार्यलिंगकमनुमानं मधुसूदनीटीका प्रमाणयन्नुत्पत्तिस्थितिनाशजगत्स्रष्टादिकारणत्वं दर्शयति॥

एते परत्वेनापरत्वेन च प्रागुक्ते द्वे त्रज्ञलक्षणे प्रकृती योनी येषां तान्ये
तद्योनीनीति भूतानि भवनधर्मकानि सर्वाणि चेतनाचेतनात्मकानि
जनिमंति निखिलानीत्येवमुपधारय जानीहि कार्याणां चिदचि
द्ग्रंथिरूपत्वात्तत्कारणमपि चिदचिद्ग्रंथिरूपमनुमिनु इत्यर्थः

गी॰
टी॰
स॰

30

एवं क्षेत्रक्षेत्रज्ञलक्षणोममोपाधिभूतेयतः प्रकृतीजगतः ततस्तद्द्वाराहंस
र्वज्ञः सर्वेश्वरोनंतशक्तिर्मायोपाधिः कृत्स्नस्यचराचरात्मकस्यजगतः
सर्वस्यकार्यवर्गस्यप्रभवउत्पत्तिकारणंप्रलयस्तथाविनाशकारणंस्वाप्ति
कस्येवप्रपंचस्यमायाश्रयत्वविषयत्वाभ्यांमायाव्यहमेवोपादानंदृष्टा
चेत्यर्थः ६ [illegible]
[illegible] ॥

सदानंदीटीका

एतेपरापरेप्रोक्तेक्षेत्रक्षेत्रज्ञलक्षणे प्रकृतीयोनिरुत्पत्तिस्थानमेतद्योनीनि
तानिवै १ चराचराणिसर्वाणिभूतानीत्युपधारय एवंचोपाधिभूतेमे
क्षेत्रक्षेत्रज्ञलक्षणे २ जगतःप्रकृतीयस्मात्तद्द्वाराहंततोहरिः सर्व
ज्ञोनंतशक्तिश्चमायोपाधिरधीश्वरः सर्वस्यकार्यवर्गस्यजगतोजन्म
कारणं विनाशकारणंतद्वत्स्थिरजंगमरूपिणः स्वाप्तिकस्येवविश्व
स्यमायकस्यास्यसर्वतः उपादानंतथाद्रष्टामयाविश्वादहंहरिः ५॥६

नीलकंठीटीका

एतदिति एतेपरापरेक्षेत्रक्षेत्रज्ञरूपेप्रकृतीयोनिः उत्पत्तिलयस्थानं
येषांभूतानांतानिएतद्योनीनिभूतानिचतुर्विधानिइत्येतदुपधार
यसम्यग्जानीहि किंपानंजलानामिवएतेप्रकृतिर्ईश्वराद्भेदइत्या
शंक्याह अहमिति कृत्स्नस्यस्वप्रकृतिसहितस्यजगतोजडा
जडरूपस्यप्रभवःप्रभवत्यस्मादितिप्रभवउत्पत्तिकारणं तथाप्रली
यतेस्मिन्नित्यप्रलयःलयस्थानंच अतस्तेउभेअपिप्रकृतीमत्तोना
तिरिच्येते ६ ॥

आनंदीटीका

एतेमदीयेपरापरीप्रकृतेयोनिरुत्पत्तिकारणंयेषामीदृशानिसर्वाणि
भूतानिभूमिरापोनललेतिप्रोक्तानिसंतीत्युपधारयअस्याहंसर्वस्यज
गतःप्रकृतिविकृतिरूपेणापरिणामगच्छतस्तत्ववर्गस्याहंपरमे
श्वरएवप्रभवस्तथाप्रलयश्चअतःपरमकारणात्सर्वंप्रादुर्भवतिमय्ये
वसर्वंलीयतेचेत्यर्थः दर्शितावात्रचात्रतात्पर्यप्रकृतिसृष्टतिप्रमा
णाप्यपाविरूपोज्ञातेतच्चात्मप्रकृतानांविकृतिवर्गस्योत्तरोत्तरायचा
तद्यात्ममाव्यक्तारणांतरापेक्षानांतत्वाह ६ ॥

रामकंठीटीका

एतेयथाप्रतिपादितस्वरूपेमदीयेप्रकृतीयोनिरुत्पत्तिकारणमेषांता
दृशानिसर्वाणिभूतानीत्युपधारयबुद्ध्यावनिश्चयेन जीवभूताहिप्रकृ
तिश्चित्स्वरूपत्वाद्व्यभिचारात् वस्तुतः परमकारणात्परमात्मनो
मत्तः परमेश्वरादभिन्नापिमन्मायावशाद्भेदमिवाऽपन्नाजडयाप्रकृ
त्याऽनादित्वेनसंबद्धासतीतामेवगुणात्मिकांप्रकृतिमहंतादि
भावेनपरिणतामात्मत्वेनाऽभिमन्यमानास्वत्वादिसाधनभावेनचे
तनाऽचेतननानाभावरूपंविषयमपेक्षितइत्यादिप्रकृतिभ्रमरूप
संबंधेजगतःकारणमित्येतेप्रकृतीसर्वभूतानांयोनिरित्युक्ते न
याचवक्ष्यति यावत्किंचित्संभवतिसत्त्वंस्थावरजंगमं क्षेत्रक्षेत्र
ज्ञसंयोगात्तद्विद्धिभरतर्षभेति एवंजगत्कारणभूतयोश्चेतनयोर्मत्त
एवोत्पत्त्योः प्रकृत्योर्मन्मायैवैःवमवभासनेकारणमिति कृत्स्नस्य
सर्वस्यनिरवधिकचराचरभूतभेदमयस्यजगतःप्रभवःप्रलयश्चाह
मत्तएवैतत्सर्वं भवति मय्येवैतल्लीयतइत्यर्थः मत्संकल्पमा
त्रेणाविर्भावितयामाययैवचेतनाजडाजडेप्रकृतीआभास्येते नान्निबंधनौ
चसर्गसंहाराविस्येतयोर्जगत्प्रभवप्रलययोरहमेवमूलकारण
मित्यर्थः

६ ॥ लाक्षिकी ~~वल्लभी~~टीका

एवंमायावभासितेनपरापरभेदभिन्नेजडचेतने द्वेप्रकृतीजगत्का
रणइतिकार्यलिंगादनुमानेनप्रमाणयति ॥ एतेपरापरेप्रकृती
योनिरुत्पत्तिकारणंयेषांतान्येतद्योनीनिसर्वाणिचतुर्दशविधा
निभूतानि स्थावरजंगमात्मकानि इत्युपधारयनिश्चयेनबुद्ध्या
व कार्यलिंगेनसामान्यतोदृष्टेनानुमिन्वित्यर्थः तत्रजडाप्रकृ
तिर्देहरूपेणपरिणमते चेतनात्मरूपाभूतःभोक्तृत्वेनदेहेष्वप्र
विष्टस्वकर्मणानानिधारयतीत्यर्थः तेचमदीयप्रकृतीमत्तआ
विर्भूतेइतिस्वस्वामितामाह अहमिति अहमीश्वरः कृत्स्नस्यज

गी॰
टी॰
सं॰

31

प्रकृतिकस्य जगतस्तथा च भेदाभिन्नस्य मयि महेश्वरे उपस्तत्यायेन अभेदे
नसत एव तदुक्तं स्वामिना आत्मसंस्पर्शस्वभावज्ञानस्वभासनम् अ
त्येवन विना तस्मादिच्छामणेः प्रवर्तते इति प्रभवः सेच्छया अभेदेन
आविर्भावकः अहमिदमितीदंतोद्रेकेण प्रलयस्तिरोभावकस्य इ
दमहमिति अहंतोद्रेकेण मत्संकल्पमात्रेणैव यया मायया देवब्रह्म ते
तीआभास्यते तन्निबंधनौ च सर्गसंहारौ इत्यतोऽहमेव मूलकार
णमित्यर्थः यथोक्तं विज्ञानभैरवे जलस्येवोर्मयो वह्नेर्ज्वालाभंग्यः
प्रभा रवेः ममैव भैरवस्यैता विश्वभंगो विनिर्गता इति विद्रूपाद्व
पंचाशिकायां स्वांगोचितगता नात्मनि जगत्यादनि भेत्स्वशक्तिलह
रीणां संभेदविभेदाभ्यां सृजति ध्वंसयति चैव जगदिति ८ ॥

पंचोलीटीका

अनयोः प्रकृतित्वं दर्शयन् स्वस्य तत्द्वारा सृष्ट्यादिकारणत्वमा
ह एतदिति हे अर्जुन सर्वाणि भूतानि एतद्योनीनि एते परापरे द्वे
अवेते अत्र लक्षणे प्रकृती योनिर्येषां भूतानां तानि एतद्योनीनि इति उप
धारय अवधारय यस्मात् मम प्रकृतिः सर्वभूतानां कारणं अतः अहं
कृत्स्नस्य जगतः प्रभवः प्रलयो विनाशश्च भवामि ६

तत्वदीपिका टी॰

एते परापरे प्रकृती योनिः कारणानि कारणं येषां तान्येतद्योनीनि सर्वाणि
चतुर्दशविधानि भूतानि स्थावरजंगमात्मकानि [illegible] अवधारय निश्च
तेन उभयस्य कार्यलिंगेन [illegible] दृष्टानुमितिनिर्णयः तत्र जडा
प्रकृतिर्देहरूपेण परिणमते [illegible] मदंशभूता भोक्तृत्वेन देहेषु
प्रविश्य स्वकर्मणा तानि धारयतीत्यर्थः [illegible] मदीये प्रकृती मत्त आवि
भूतेस्ततः [illegible] मितामाह अहमिति अहमीश्वरः कृत्स्नस्य प्रकृति
जस्थाणुजंगमस्थावरभेदभिन्नस्य [illegible] उपस्तत्यायेन अभेदेन सत
एव तदुक्तं स्वामिना आत्म[illegible]भावज्ञानस्वभासनं अत्येवन
विना तस्मादिच्छाणवीः प्रवर्तते इति [illegible] सेच्छया भेदेन आविर्भाव

रणवीरसमिद्धोधिनी ॥

एतदेव स्फुटयति एतद्योनीनीत्यर्थेन एते पूर्वोक्ते द्विविधे
प्रकृती योनी परम्परया कारणभूते येषां तादृशानि सर्वाणि
भूतानि भवंतीत्युपधारय बुद्ध्यस्व परम्परा वान्नाऽवतीत्यत्र·
प्रतिपादिता एते च प्रकृती मत्तः संभूते अतोऽहमेवास्य कृत्स्न
स्य सकलस्य यद्वा क्रियते इति कृतं कर्माणि किं कृतिक
र्मणि स्थातीति कृत्स्नाः कर्माधिकारी तस्य भीष्मादिनाश्रियरू
पस्य जगतो जंगमवर्गस्य वा प्रभव उत्पत्तिकारणं प्रलयः सं
हारकारणं वास्मीति मयैवैते संह्रियंते निमित्तमात्रं त्वं मा
स्वधर्मान्निवर्तस्वेति भावः ६ ॥

मधुभाष्य

६ ॥

32

भाषाअनुवाद

प्रकृति के पर औ अपर ये दो भेद देखाय के अब प्रकृति के द्वारा
सृष्टि आदि की आप ही कारण है सो कारणत्व कहते है कि
हे धनंजय क्षेत्र कहे शरीर औ क्षेत्रज्ञ कहे जीव यह जो दो प्र
कारकी प्रकृति है योनि कहे कारण जिनका ऐसे स्थावर जं
गमयावत् भूत इसी कारण से उत्पन्न है यह जानो और विशे
ष यही है कि जड़रूप निकृष्ट प्रकृति देहरूप अनेक रूप धार
ती है और मेरा अंश जो चैतन्य सो भोक्तारूप शरीरमे प्रवेश
करके अपने कर्मके अनुसार अनेक देह धारण करता रहता
है और यह प्रकृति हमी से उत्पन्न है इस कारण संपूर्ण जग
तके प्रभव कहे उत्पन्न करणेवाले औ प्रलय कहे संहार कर्ता
भी हमही है ६ ॥

दोहा

मेरों यासमजगतकोप्र
यासें होते जीवसभ हे अर्जुन यहजान
लय उत्पत्तिस्थान ६॥

33

मत्तःपरतरंनान्यत्किञ्चिदस्तिधनंजय मयिसर्व
मिदंप्रोतंसूत्रेमणिगणाइव ७ ॥

शांकरभा

यस्मादेतत्तस्मात् मत्तः इति मत्तःपरमेश्वरात् परतरंअन्यत् कारणान्तरं किञ्चिन्नास्तिनविद्यतेअहमेव जगत्कारणमित्यर्थः हेधनंजय यस्मादेवं तस्मान्मयिपरमेश्वरे सर्वाणिभूतानिसर्वमिदंजगत् प्रोतमनुस्यूतमनुगतमनुविद्धं ग्रथितमित्यर्थः दीर्घतन्तुषु पटवत्सूत्रेच मणिगणाइव ७ ॥

आनंदगिरीकृतटीका

प्रधानादेः परमात्मनोपि परादन्यत् परस्या न्तोःक्तनात् पुरुषवत् प्रकृतिद्वयद्वारा सर्वकारणत्वमीश्वरस्योक्तं नयजीवा दिरूपांशक्यप्रकृतिद्वयद्वारा सर्वकारणत्वमीश्वरस्योक्तं मयीति पर परिहरति यस्मादिति नान्यदस्ति परमित्यत्र हेतुमाह मयीति पर नरणार्थमाह अन्यदिति स्वातन्त्र्यव्यावृत्त्यर्थमंतरपाठः निषेध फलंकथयति अहमेवेति सर्वजगत्कारणत्वेन सिद्धमर्थं हिनी याद्व्याख्यानेन विशदयति यस्मादिति ओतादीर्घेषु तिर्यक्चय दत्वादिनेषु तंतुषु पटस्यानुगतिरवगम्यते तद्वन्मय्येवानुगतं जग दित्याह दीर्घेति यथाचमणयः सूत्रेऽनुस्यूतास्तेनैव धार्यंते तद्वत् भावे विप्रकीर्येत तथा मय्येवात्मभूतेन सर्वं व्याप्तं ततो निष्कृष्टं विनष्टमेव स्यादिति श्लोकोक्तं दृष्टान्तमाह सूत्रेइति ७ ॥७ ॥

स्वामिकृतटीका

यस्मादेवंतस्मात् ॥ मत्तः सकाशात्परतरंश्रेष्ठंजगतः सृष्टिसंहारयोः स्वतंत्रंकारणंकिंचि
विन्याहमयीति दपिनास्ति किंचिद्धेतुरप्याह मयिसर्वमिदंजगत् प्रोतंग्रथितंआश्रि [illegible] ७ ॥
तमित्यर्थः दृष्टांतःस्पष्टः [illegible]

पिशाचभाष्यटीका

मत्तःपरमेश्वरात्परमन्यत्किंचिन्नास्तिधनंजय मयि [illegible] सर्वाधारे सर्वमिदंप्रोतंस्यूतंसूत्रेमणिगणाइव ७ ॥

रामानुजभाष्यटीका

यथा सर्वकारणस्यापि प्रकृतिद्वयस्य कारणत्वेन सर्वाचेतनवस्तुशेषिणश्चेत
नस्यापि शेषित्वेन कारणतया शेषितया वाहं परस्तथा ज्ञानशक्तिबला
दिगुणयोगेन चाहमेव परतरः मत्तो व्यतिरिक्तं मदाश्रितज्ञानबलादिगुणान
न्तरयोगि परतरं नास्ति सर्वमिदं चिदचिद्वस्तुजातं कार्यावस्थं कारणा
वस्थं च मम शरीरभूतं सूत्रे मणिगणा इवात्मतयावस्थिते मयि प्रोतमा
श्रितं यस्य पृथिवी शरीरं यस्यात्मा शरीरं एवं सर्वभूतान्तरात्मापहत
पाप्मा दिव्यो देव एको नारायण इत्यात्मशरीरभावेनावस्थानं जगद्ब्रह्मणो
न्तर्यामिब्राह्मणादिषु प्रसिद्धं ७ ॥

दित्यारभ्य मोहितं नाभिजानाति

दैवं नस्यात् मत्त इति

श्रीअभिनवगुप्तकृतटीका ७ मत्तः परतरं नान्य
तिमामेभ्यः परमव्ययम् इत्यन्तम्

परमार्थप्रपाटीका

मत्तः सकाशात्परतरमुत्कृष्टमन्यत्किंचिदपि नास्ति यद्वासतेनेतदव
रमेव सर्वप्रभवप्रलयनिमित्तमहमेवास्मीत्युक्तमिदानीं स्थितिनिमित्त
महमेवास्मीत्याह मयीति इदं सर्वं विचित्रभूतजातं मयि प्रोतं किमि
व सूत्रे मणिगणा इव गुणग्रथितेन विचित्रवर्णग्रथमाणाकृतयो मणयः
कस्मिन् सूत्रे प्रोतास्तिष्ठन्ति तद्वत् ७ ॥

वनमालीटीका

जगज्जन्मस्थितिनिकर्तृत्वं स्वतन्त्रं यत्स्वस्योक्तं तदुपपादयति मत्त इति यथा
सर्वकारणभूतायाः प्रकृतेर्बद्धाबद्धजीवजातस्य च नियामकत्वेन धार
कत्वेन कार्यमात्रोत्पादकत्वेनाहं परस्तथाचिन्त्यशक्तिज्ञानबलैश्वर्य
वीर्यवैभवयोगेनाहमेव परतरोऽतिश्रेष्ठो मत्तोऽन्यत्किंचित्परतरं नास्ति य
द्यपि मत्तोऽन्यत्परं किंचिन्नास्त्येवेति वाच्यं न त्वस्त्यभ्यधिकः कुतोऽन्यपर
निवक्ष्यमाणत्वेन समाधिकमात्रस्य निषेधात्सिद्धान्तः प्रत्ययोर्व्यर्थः स
मस्य वदधिकस्य कस्यचित्तत्त्वेष्यनिर्णयाधिक एव निषेधस्तदर्थकः
त्वेन नञर्थकस्यान्यथापि सर्वोत्तमानं न गुणवत्त्वेनोत्तमत्वासिद्धावपित
नोपहास्यकर्मकरणसंप्रदानापादानाधिकरणैर्विश्वस्याप्युपयु
क्तस्य कुलालकर्तृकघटादिस्रष्टो मृदादेरिव स्वातन्त्र्यांशकारणात्त्रिरा
मायतरप्प्रत्ययः आह भगवान् तदनन्यत्वमारंभणशब्दादिभ्यः यथ
पिजलालादिकर्तृकास्तदेहिः स्वातन्त्र्यबजसाधनापेक्षत्वाद्दृष्टान्तस्यापितर

वृहष्टांतेनब्रह्मणःसृष्टिस्तथानकल्प्याकिंतुस्वतंत्रसाधनस्य
तदनन्यत्वंश्चान्यत्वाभावः स्वतंत्रसाधनेनास्तीत्यर्थः किं।
स्विदासीदधिष्ठानमारंभणंकतमत्स्विदितिस्वतंत्राधिष्ठा
नायासीत्तपकारंभणशाब्दादिभ्यश्चारभ्यतेनेतत्यारंभणंस्या
यत्नं अधिष्ठानमधिकरणं अग्रेउत्तराभावात्प्रश्नार्थकः
किंस्विदितिशब्दः किंत्वाक्षेपार्थकमेव नचस्वरूपेणवान्य
स्यनिषेधोस्तुसंकोचेमानाभावादितिवाच्यं सत्वाच्चावर
स्येतिसूत्रेणतमआसीत्तमसागूढमग्रेप्रकेतं अस्मान्मा
यीसृज्यतेविश्वमेतदितिश्रुत्याच अवरस्येश्वराधीनस्यस
त्वबोधनात् असद्व्यपदेशान्नेतिचेन्नधर्मांतरेणवाक्यशेषा
दितिसूत्रेणस्पष्टेः प्रागसदेवेदमग्रआसीदितिसत्वमाशं
क्य धर्मांतरेणैवनिषेधउक्तः नैवेहकिंचनाग्रआसीत्तमि
षिदितिवाक्यशेषमिथ्यात्वेनविकासिततेनैवहिनिषेधः।
स्वरूपेणैवनिषेधोंगीकारेमतोनान्यदित्येतावतैवसि।
यापरतरंमितिवैपथ्यमित्रेः भिन्ननिषेधस्यापिभिन्नत्वेनभि
न्नमात्रनिषेधस्यव्याहतत्वाच्च नकेवलंविश्वोत्पादिकर्तृ
त्वेनैवपरोपितुसर्वाधारकत्वेनापीत्याहमयीति यथा
मणिगणाः सूत्रेप्रोतातिष्ठंतितथेदंबद्धमुक्तजीवजडा
त्मकंविश्वंसकलश्रुतिप्रतिपाद्याचिंत्यानंतशक्तिमपिम।
य्योतंमदधीनसत्ताकंतिष्ठति द्युभ्वाद्यायतनंस्वशब्दा
दितिसूत्रेण यस्मिन्द्यौःपृथिवीचेत्यादिनोक्तेद्युभ्वाद्यायत।
नेतमेवैकंजानथआत्मानमितिस्वस्यब्रह्मणैवावका।
त्मशब्दप्रयोगात् द्युभ्वाद्यायतनेपरंब्रह्मैवेत्यर्थकेनवा
युनाभैतमस्सूत्रेणायंलोकःपरलोकश्चसर्वाणिभूता।
निसंचारणानिभवंति सर्वावावपतेप्राणाश्चप्राणिनश्च
देवाश्चदिव्याणिचलोकाश्चलोकिनश्चविश्वावेवोता
श्चप्रोताश्चकृत्वा यत्रोतमेतत्प्रोतंचविश्वमंतरसंज्ञके
आधारसर्वभूतस्यसप्रसीदतमेहरिरितिवैस्त्वेनयस्मि

गी॰
टी॰
स॰

35

त्रिस्थतनेतंतेहृष्टेस्वर्गेवतिष्ठति सदसद्रूपितंविश्वंविश्वं
गेविश्वकर्मणि यस्मिंविश्वानिभूतानितिष्ठंतिचविशंति।
च गुणाभूतानिभूतेशाहृत्रेमणिगणाइव बुद्धिर्मनामह
द्वायुस्तेजोभिः खंमहीचया चतुर्विधंचयद्भूतंसर्वंब्रह्मस्म
प्रतिष्ठितं चतुर्विधानांभूतानांत्रिषुलोकेषुमानवः प्र
भवेष्वेवसर्वेषांनिधनं
मेवयुधिष्ठिरेतिमहाभा
रत नचसर्वथारकाले
नसुखदुःखहेयस्यसर्वे
तंतंसिद्धम् १ ॥

[illegible]

इत्सम्मैवेजयंतीटीका

नन्वकालोभवाययभूतानामभवायचप्राणाएव कालमूलमितिज्ञा
त्वाभवस्यैर्यपरोजनेतस्त्रष्टाकालेनकालेनपुनर्यास्यन्तिसंयमंका
लात्मकमिदंसर्वंज्ञात्वाप्राममवामृहीतिस्तृतिवाक्यात्कालस्यक
र्मणाज्ञायतेजंतुः कर्मणैवविलीयतेइतिवचनात्कर्मणश्चस्वभा
वमेकेकवयोवदंतीतिवचनात्स्वभावस्यचगोरनाद्यनंतवनीजनि
श्रीभूतभाविनीत्रिगुणांतज्जगद्योनिरनादिप्रभवाप्ययमित्यादिवाक्या
त्प्रधानस्यच जीवाद्भवंतिभूतानिजीवेतिष्ठंतिचंचलाः जीवेप्रल
यमिच्छंतिनजीवात्कारणंपरमितिश्रुतिवाक्याज्जीवस्यचहिर
ण्यगर्भःसमवर्ततताग्रे आदिकर्तासभूतानांब्रह्माग्रेसमवर्ततब्रह्मा
देवानांप्रथमःसंबभूवविश्वस्यकर्ताभुवनस्यगोप्तेतिश्रुतिवाक्या
द्धिरण्यगर्भस्यच नसन्नचासच्छिवएवकेवलइतिश्रुतिवाक्या
च्छिवस्यापिजगज्जन्मादिकारणत्वेस्थितेसति अहमेवसर्वजगतः
प्रभवःप्रलयस्तथभवामीतितन्वोन्निरचटितेवमेभातीत्याशंक्यत्व
स्यसर्वकारणपरत्वमाह मत्तःपरतरमिति हेधनंजयपूर्णाप्राण
८७ धनजयकर्त्तइत्यनेनयथात्वंसकलत्रिभुजलेस्वर्यवीर्यादिकंनि
रस्यस्वंलतेजसातिष्ठसितथाहमपिस्वैश्वर्यबलेनयत्किंचिद्बल
कारणत्वेनप्रतिपन्नानपिकालदेवादीन्निरस्याचिन्त्यानंतगुण
पाक्तिवैभवत्वेनात्मैश्वर्येण संतिष्ठामीतिसूचितमतःसर्वस्मात्
[illegible]लेयात्क
रान्सकलकारणकारणात्केसारेस्वतमात्
स्मात्परतरंनिरतिशयाचिंत्यानंतगुणगणाश्रेयश्चर्यादिकत्वेनान्य
त्परमन्यत्कश्चिमतिशयसाम्यशून्यंसर्वकारणमन्यदपरंकालक
र्मामरादिवस्तुजातंकिंचित्स्वल्पमपिनास्तिभूतभविष्यतोरप्युप
लक्षणं अनादौभूतकालेपिनासीत्अनाद्यनंतेभविष्यत्कालेपि

गी॰
टी॰
स॰

36

न भविष्यतीत्यर्थः यद्वा मत्तोऽन्यत् मद्व्यतिरिक्तं परतरं निरतिशयपाल
कं सृष्टौ वा किंचिदपि वस्तुजातं नास्ति किंत्वहमेव मातापित्रादेरप्यतिश
यवांस्त्वया सर्वेषां जगतां पालकोऽन्यथा चेतनाचेतनवस्तुषु सर्वे
ष्वंतरात्मस्वरूपत्वेन परिपूर्णोऽस्मि सङ्क्षेपेणेनत्वमस्य पूर्णत्वमेव दर्श
यति मयीति मयि सर्वकारणात्मके सर्वाधिष्ठानस्वरूपे सर्वेश्वरे सर्वं
चराचरात्मकं ब्रह्मेशादिस्थावरान्तमिदं विश्वं प्रोतं ग्रथितं तत्र दृष्टा
न्तः यथैकस्मिन्नेव सूत्रे लग्नावधिपर्यन्तानां मणिगणानां मणिसमूहाः
ग्रथिताः सन्तस्तदाधारमवलंब्यातिष्ठंति तथैवाधारभूतं मामाश्रि
त्य सर्वं चिदचिद्वस्तुमात्रं तिष्ठतीत्यर्थः इत्यनेन सद्रूपोऽधिष्ठानस्व
रूपस्यैव चिदचिन्मयस्य जगतश्चापि यत्स्वरूपचिंतं एवं यथास्य मे
व भगवतस्स्वस्य सर्वकारणत्वं सर्वपरत्वं च स्वमुखेनैव प्रतिपादि
तं तथा श्रुतिस्मृत्यादिवाक्यैरपि तथा हि यतो वा इमानि भूतानि जा
यंते यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येकः
स कारणं कारणाधिपाधिपः न कस्य कश्चिज्जनिता न चाधिपः प्रधा
नपुरुषाव्यक्तकालानां कारणं हि यत्पपंनिसृयोनिस्य न हि सोः
परमं पदं अनादिर्भगवान्कालो नान्तोऽस्य द्विज विद्यते न सोऽस्ति प
स्ययो लोके यत्र कालो न भासते ज्ञः कालकालो गुणी सर्वविद्यः
इत्यादिकैः कालादिकारणत्वप्रतिपादकानां वाक्यानामपि पर
मेश्वरकारणप्रतिपादनपरत्वमेव स्यान्न तु तद्भिन्नत्वेन तेषां कार
णत्वं संभवति तथा हि केवलः कालो जगत्कारणं न स्यात् यतः का
लं तथात्वे परिमृश्यमाना इति श्रुत्या कालवादिनां भ्रान्तित्वश्रवणा
त् ज्ञः कालकालो गुणी सर्वविद्यः इति श्रुत्या च सर्वं तस्येश्वरनिय
म्यत्वादीश्वरशक्तित्वादचेतनत्वाच्च कालो भवायेत्यादीनि वाक्यानि
ततन्नाम्नानप्रयुक्तं परमेश्वरं कारणं वदंति कालः कलयतामहं का
लोऽस्मि लोकक्षयकृत्प्रवृद्धः इत्यादिवक्ष्यमाणस्ववचनस्वारस्यात्
केवलस्य कर्मणोऽपि जगत्कारणत्वं न स्यात् जडस्वरूपत्वात् अविद्या
कर्मसत्तान्यात्तृतीया शक्तिरिष्यते इति वाक्यात्परमेश्वरशक्तित्वेन
तन्नियम्यत्वाच्च वाक्यानि तत्तत्प्रेरकत्वेन तन्नाम्नेश्वरस्यैव कारण

त्वेवहं तिनामानि सर्वाणि यमाविशन्ति सर्वनामं सर्वकर्मेत्यादिवाक्यप्र
माणेन स्वभावस्यापि जगत्कारणता नास्ति अघटितत्वात् तथाहि
जन्मने च न कारणसापेक्षकार्यमपि तत्स्वजन एव तत्र एकस्मिन्ने स्वाभावि
केजगति निप्रतिज्ञाय तत्साधको हेतुरस्ति न वेति भावपदे स्वभाववा
दहानिः यत्तु साधकं हेत्वन्तरं तदेव तत्र मुख्यकारणं तस्यैवोपचारत्वा
पत्तेः द्वितीये हेत्वन्तराभावपदे मूकतापत्त्या प्रतिज्ञाभंगात्स्वभाव
वादसिद्धिः वाक्यानां त्वयमर्थः स्वस्यासौ भावश्च स्वभावः स्वसत्पद्
पदस्यार्थः यद्वा भावो जन्म संसारो वा भव एव भावः स्वार्थे णप्रत्ययः
स्वैनैव स्वेच्छयैव भावो जन्म यस्य सतस्तथा स्वस्मिन्भावः संसारो यस्य सत
ध्या स्वे स्वीया असाधारणा स्वाभाविका वा गुणादयो यस्य सतस्तथेत्यादि
समासेवी तस्यापि न द्वाचकत्वात् स्वाभाविकी ज्ञानबलक्रिया चेति श्रु
नेः अन्यकल्पनायामनेकदोषाणामवश्यंभावादघटनोक्तिर्वेत्यर्थः अभा
वोपि न जगद्धेतुः यतः स्वतो भावस्य गगनकुसुमायमानस्य भावान्म
ककार्योत्पादने कथमप्यसामंजस्यान्नहि शशविषाणादीनां का
र्योत्पादनं कुत्रापि दृष्टिश्रुतिगोचरं स्यात् वाक्ययोस्त्वयमर्थः अत्र ग्र
सोनिश्रुतेः अक्षराणामकारोस्मीति वक्ष्यमाणाच्च अस्यासौ सत्त्वेनिक
र्मधारयसमासेन अकारवाच्यं स्वरूपं ब्रह्मेति सिद्धं किमर्थाद्धृदयस्यान्यवा
चकत्वात् अस्यासौ कश्चिन्निवासहृदेवरूपोऽन्यत्र इत्यर्थः एवं शून्यवाद
स्यापि नैव कारणता सदेव सौम्येदमग्र आसीत् ब्रह्म वा इदमेकमे
वाग्र आसीदेको ह वै नारायण आसीत् न विलस्तदासीद्धरिरेवानिष्कल
रित्यादिश्रुतिकदंबेन शून्यवादस्याशून्यत्वप्रापितं स्यात् केवलस्य
प्रधानस्यापि जगत्कारणत्वं न संभवति मृत्स्ववर्णादिवत्स्वतन्त्रा
त्वादचेतनत्वाच्च यथा मृत्स्वर्णादयो घटकुण्डलादियोनयोपि कु
म्भकारस्वर्णकारादिकं विना घटकुण्डलादिकार्योत्पादनेऽसमर्थाः
स्तत्त्वेयं प्रकृतिः सर्वभूतयोनिर्भूतापि महदादिनिरेकेण समर्था स्यात्
मदीदृशो नैव कार्यमन्यद्यत्तन्यथा नदैत्तनवजस्वा इत्युक्तेनेश्वा
इमिति निश्रुतिर्ह्यप्रामाण्यात् मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधा
म्यहमित्येवोक्तत्वाच्च एवं जीवस्यापि जगत्कारणत्वं न च वक्तव्यं सदेव सो

गी॰
टी॰
स॰

37

स्यदमग्रआसीदेकमेवाद्वितीयंब्रह्मेत्यादिनाकारणस्यैकत्वप्रतिपादनात्
चेतनश्चेतनानामित्यादिनाअंशोनानाव्यपदेशादित्यादिनाचजीवाना
मनन्तत्वोक्तेर्जीवकारणवादेवजन्तत्वप्रसंगाच्च वाक्यंतुजीवयतिप्राण
यतीतिश्रुत्याजीवपाद्धेनपरमात्मानंवदति अन्यथाय आत्मनम
न्तरोयमयतीत्यादिश्रुतीनांजीवस्यनियम्यत्वप्रतिपादकानांव्याप
कोपप्रसङ्गःस्यात् एवंचहिरण्यगर्भस्यापिजगत्कारणतानस्यात् न
सन्नचासांख्यवएवकेवलःहिरण्यगर्भएवनिजायमानमित्यादि
वाक्येभ्यस्तस्यपूर्ववर्तित्वाभावात् वाक्यानितुहिरण्यानिहिरण्यम
यानिब्रह्माण्डानिगर्भेयस्येतिसमासेनहिरण्यगर्भसंज्ञकंपरमात्मा
नंवदंति अण्डानांतुसहस्राणांसहस्राण्ययुतानिचईदृशानांतथा
तत्रकोटिकोटिशतानिचेतिपराशरवचनात् एवंब्रह्मादिशब्दोपि
परमेश्वरवाचकः बृहिवृद्धौबृंहिबृहत्त्वाद्ब्रह्मावित्यस्माद्धातोरौणादिकमन्प्रत्य
यसिद्धोबृहत्त्वात् बृंहणत्वाच्चेतिनिर्वचनात् एवंचशिवस्यापिजगत्का
रणत्वंनस्यात् यतस्तस्यापिकालादिपारतन्त्र्यश्रवणात् ममापि
कालोग्रसनेऽजनः अत्ररसायनमित्यादिनास्कंदंपुत्रंप्रतिस्वयमेव
त्रिलोचनेनोक्तत्वात् वाक्यंतुशिवपरत्वेनानंदवाचकंतुपरमात्मा
नंवदतिविज्ञानमानंदंब्रह्मेतिश्रुतेः इतएवएकोहवैनारायण
आसीन्नब्रह्मानेशानः नारायणाद्ब्रह्माजायतेनारायणाद्रुद्रोजायते ५४
यस्माद्ब्रह्मानथालिशःमहद्ब्रह्मक्रादश्रुतेःएवमेवब्रह्महादित्येरित्या
दिश्रुतिस्मृतिविरोधादित्यलंविस्तरेण ८ ॥
यस्मादहमेवमाययासर्वस्यजगतोजन्मस्थितिभंगहेतुः तस्मात्परमार्थतः॥ मदन्यदस्तीटीका
निखिलदृश्याकारपरिणतमायाधिष्ठानात्सर्वभासकात्मनःसद्रू
पेणचस्फुरणरूपेणचसर्वानुस्यूतात् स्वप्रकाशपरमानंदचैतन्या
त्परमार्थसत्यात् स्वप्नदृष्टइववास्तविकंमायाविनइवमायिकं त्रि
पाकालवच्छिन्नचैतन्यादिवत्तदत्तानुकल्पितंरजतं मत्तःपरतरं
परमार्थसत्यमन्यत्किंचिदपिनास्ति हेधनंजय मयिकल्पितंप
रमार्थतोमत्तोनभिद्यतेइत्यर्थः तदनन्यत्वमारंभणशब्दादिभ्यइति
न्यायात् व्यवहारदशायांतुमयिसद्रूपेस्फुरणरूपेचसर्वमिदंजडजा

न

तंपेतंग्रथितं मत्स्त्रयासदिवमतस्फुरणेनस्फुरदिवव्यवहारायमायाम
यायकल्पनेसर्वस्यचैतन्यग्रथितमात्रेदृष्टांतः सूत्रेमणिगणाइव ग्रथ
वास्तूत्रेणैनसात्मनिहिरण्यगर्भस्त्वमहष्टिस्तमग्रामामणिगणाइवेति भेद
सर्वोशेपिदृष्टांतोव्याख्येयः अन्येतुपरमतस्तेनूनमानसंबंधमपदे
योभयइतिसूत्रोक्तस्यसर्वस्यदृश्यत्वेनश्लोकमिमंव्याचक्षते मत्तः
सर्वज्ञात्सर्वशक्तेः सर्वकारणात्परतरंप्रशस्यतरंसर्वस्यजगतः स्
ष्टिसंहारयोः स्वतंत्रकारणमन्यन्नास्तिहेधनंजय यस्मादेवंतस्मान्म
यिसर्वकारणेसर्वमिदंकार्यजातंप्रोतं ग्रथितंनान्यत्र सूत्रेमणिगणा दिव
इवेति दृष्टांतस्तुग्रथितत्वमात्रेणानुकारणत्वेकनकेऽंगुलादिनित [illegible]
योगपोदृष्टांतः ७ ॥ [illegible]
[illegible] ॥

सदानंदटीका

ततोमत्तोमहामायाधिष्ठाना
यनोहंसर्वजगतोजन्मस्थित्यादिकारणं ततोमत्तोमहामायाधिष्ठाना
जगदीशात् १ सत्तास्फुरणरूपेणानुस्यूतात्स्वप्रकाशात् वस्तुसत्य त्वि
परंकिंचिन्नान्यदस्तिधनंजय २ नमय्यारोपितंमत्तोभिद्यतेपरमार्थतः ता^
व्यवहारदृशात्सर्वंसच्चिद्रूपेमयीश्वरे ३ जडज्ञानमिदंसर्वंप्रोतंमत्स्वरूपा
ततं प्रोतत्वमात्रेदृष्टांतःसूत्रेमणिगणाइति ४ स्वामिकामणयोयह
स्त्रमहष्टिकल्पिताः सूत्रेणैनसद्रूपेनसर्वेलेवानिदर्शितं ५ ॥७

नीलकंठटीका

एवमेकविज्ञानात्सर्वविज्ञानंप्रकृतंआत्मनोजगदुपादानत्वेनोपपा
द्यतनुतस्यवास्तनोनिर्विकारत्वहानेःप्राप्तेआह मत्तइति कारणात्सदा
देपरंदृश्यभूतंघटादि व्यवहारेतयोर्भेदानभवात् परतरंतुगवाश्वा
दि स्वदनुपादनकत्वात् एवंब्रह्मणःपरतरंनदृश्यपादनकंकिंचिद
पिनास्तिहेधनंजय एवंप्रपंचेब्रह्माव्यतिरेकंप्रदर्श्यब्रह्मणिप्रपंचव्य
तिरेकसदृष्टांतमाह मयीति मयिसद्रूपेणास्फुरणरूपेणचसूत्रवत्
सर्वज्ञानस्यूते यदिदंसर्वंमणिवत्परस्परव्यावृत्तंतत्प्रोतं तेनव्यावृत्ते
भ्यःअन्वृतंभिन्नमितिन्यायेनप्रपंचान्नितोहमतोनममविकारित्व
मित्यर्थः ७ ॥

गी॰ टी॰ स॰

38

यथास्य प्रकृतिविकृतिवर्गस्येश्वरोत्तरापेक्षा तथात्र ममात्र कारणान्तरापेक्षा नास्तीत्याह

आनंदीटीका

यतो हमस्य जगतः प्रोक्तक्रमेण कर्ता संहर्ता च अतो हे अर्जुन मत्तः वासुदेवात्परब्रह्मणः परतरमन्यत्कृष्टतमं प्रेरकतमं च किंचिन्नास्ति अत एव मयि सर्वगते सर्वजगत्कारणे सर्वाधिष्ठातरि सर्वमिदं तत्वजातं प्रोतं स्यूतं ग्रथितं यथा तिर्यक्तन्तुषु तन्तुसंततेषु मणिगणा अन्योन्यविलक्षणाः पृथग्भूताः एकत्र स्थितिमनुभवंति तथा प्रकृतिविकृतिनामापन्नानां जडरूपेणाविलक्षणोपि तत्वसंघातः मयि परमात्मनि जीवात्मनि चानुस्यूतमित्यर्थः अत्र ह्यात्मनः सूत्रस्य च सर्वेषामेकत्र योजनसंहरणमात्र साधर्म्येणोपमा ७ ॥ विक्षरण

रामकंठीटीका

अत एव ममैव परमकारणत्वात्स्वरूपलाभे कारणान्तरापेक्षा नास्तीत्याह ॥

जडापकृतिरपरेत्युक्तान्तदपेक्षया जीवभूतापरेत्युक्ता तयोस्तत्कारणभूतोहं परतर इति मत्तोन्यत्किंचित्स्वतंत्रं न संभवति यस्मात्कारणेतत्परतमं स्याद्हं स्यामेव कारणमित्युत्तरमित्यर्थः यत इदं सर्वं भावजातं मयि सर्वाश्रयभूते प्रोतमनुस्यूतं कथमेकस्मिंस्तंतौ यथा परस्परं पृथग्भूता अपि मणिगणाव्यवस्थितिमनुभवंति तथा मन्मायोज्ञाविनाऽन्योन्यभेदास्त्राचराभावा मय्येवैकास्मिन्नाश्रये तिष्ठन्तीत्यर्थः ननु भेयते न जडाजडौ मम प्रकृती प्रकृतिस्वस्वभावेति तत्कथमहं यचित्मात्रस्वरूपस्य जडात्मकत्वाद्भिन्नस्वरूपस्य तत्तोपरस्पराः वक्ष्येदानीना नानारूपस्वभावउपपद्येतेति वास्तवं प्रमात्रवेदेन प्रतिपादयितुमाह ७ ॥

लासिकी [illegible]टीका

यस्मादेवं तस्मात् मत्तः परमेश्वरात्मकाशादन्यद्वाद्यभ्युपगतं यथा तत्परमाण्वादि परतरं श्रेष्ठं जगतः सृष्टिसंहारयोः स्वतंत्रं कारणं किंचिदपि नास्ति तथाचोक्तं कपिलः प्रधानमाह इत्यादीकणभुगस्य विश्वस्य कालं कारणमेके स्वभावं परे परे जगुः कर्म नेति । तन्नस्तीत्याह मयीति मयि अहंताप्रत्ययेयपरमेश्वरे सर्वमिदं इदंतावच्छिन्नत्वाद्यपरतरं सर्वजगत्तत्रैव प्रोतं स्यूतं इदंतापुरिणाजगत्प्रोतं अहमिदमिदमहमिति समधृतत्वाच्छन्यायेनानुस्यूतं तंतुपटवत्तत्समवेतं अहमेव समवायिकारणमपीत्यर्थः उक्तं ह्यागमरहस्ये यथा स्वयं व्यपदिश्य ॥ ते

ति निमित्तहेतुत्वेतैरर्पितातिलजलांजलिरीशताये अन्यांगतोप
नयनेनवशीकृतस्यकामीश्वरस्थितिममीवतसंगिरंतेइतिय।
थासूत्रेमणिगणाअत्रसूताः यथातंतुरनाध्रियमानरूपोप्यंत
लीनतयाविशरणस्वभावस्यमणिगणस्यग्रंथिरूपतयाचास्थितः
एवमहंसर्वत्र ७ ॥

पंचोली टीका

यस्मादेवंतस्मात् मत्तइति हेधनंजययस्मात्मत्तःपरमेश्वरात्पर
तरंश्रेष्ठतरमन्यत्कारणांतरंकिंचिन्नास्तिइदंसर्वंमयिविषयेप्रो
तंग्रथितंसूत्रेमणिगणाइव यथासूत्रेमणिगणाःप्रोतास्तथेदं
सर्वंजगन्मयिप्रोतमित्यर्थः ७ ॥

रामावीरसमिद्धोयिनी॥

किंबहुनासारमेतदेवार्जुनजानीहीत्याह मत्तइतिमत्तःसका
शात्परतरंश्रेष्ठतरमन्यत्किंचिन्नास्ति अहमेवास्यजगतःसृष्टि
संहारयोःस्वतंत्रःकर्तेतिभावः मय्येवैतत्स्थितमपीत्याह मयी
ति इदंभूम्यादिकंसर्वंमयिसर्वेश्वरेप्रोतंग्रथितमाश्रितमित्यर्थः
अत्रदृष्टांतः सूत्रेमणिगणाइवेति यथामणिगणाःसूत्रेस्थिता
एवंमयीदंजगत्स्थितमित्यर्थः ७ ॥

मधुभाष्य

७॥

39

भाषाअनुवाद

सो हे धनञ्जय इसी से हम से और कोई भी जगत की सृष्टि औ
संहारका श्रेष्ठ स्वतंत्र कारण नहीं है और स्थिति के भी हेतु
हम है यह कहते है कि मेरे ही मे समस्त जगत ग्रथित है
जैसे सूत मे मणि गण पोहे रहते औ कपडे मे सूत ओत प्रोत
रहते है ७ ॥

दोहा ॥

मोसे औरन दे कछु अधिक धनंजय सोय मोमेहै सब ग्रथित ज्यों
सूत्रमणीगण होय ७ ॥

40

रसोऽहमप्सु कौन्तेय प्रभाऽस्मि शशिसूर्ययोः प्रण
वः सर्ववेदेषु शब्दः खे पौरुषं नृषु ८ ॥

शंकरभाष्यं

केन केन धर्म्मेण विशिष्टे त्वयि सर्वमिदं प्रोतमित्युच्यते रस इति रसोऽहम
पाय: सार: रसस्तस्मिन् रसभूते मय्याप: प्रोता इत्यर्थ: एवं सर्वत्र यथा
हमप्सु रस एवं प्रभास्मि शशिसूर्य्ययो: प्रणव: ओङ्कार: सर्ववेदेषु
तस्मिन् प्रणवभूते मयि सर्ववेदा: प्रोतास्तथा खे आकाशे शब्द: सार
भूत: तस्मिन् मयि खं प्रोतं तथा पौरुषं पुरुषस्य भाव: पौरुषं यत: पुंबु
द्धिर्नृषु तस्मिन् मयि पुरुषा: प्रोता: ८ ॥

आनन्दगिरिकृतटीका

अबादीनां रसादिषु प्रोतत्वप्रतीतिस्त्वय्येव सर्वं प्रोतमित्ययुक्तमिति
मत्वा शङ्कते केनेति तत्रोत्तरमुत्तरग्रन्थेन दर्शयति उच्यत इति
सारो मधुरो हेतुरिति यावत् रसोऽहमिति कथं तत्राह तस्मिन्निति
अप्सु यो रस: सारस्तस्मिन्नपि मधुररसे कारणभूते प्रोता आप इति
वत्तत्र सर्वत्र व्याख्यानं कर्तव्यमित्याह एवमिति उक्तमर्थं दृष्टा
न्तेनात्मना प्रभास्मीत्यादि व्याचष्टे यथेति चन्द्रादित्ययोर्या प्रभा तद्रू
ते मयि वेदा: प्रोता इत्यर्थ: तत्र वाक्यार्थं कथयति तस्मिन्निति प्रण
वभूते तस्मिन् वेदानां प्रोतत्ववदाकाशेऽय: सारभूत: शब्दस्तद्रूपे
परमेश्वरे प्रोतमाकाशमित्याह तथेति पौरुषं नृष्विति भागं [illegible]
बुद्धिभजते तथेत्यादिना पुरुषत्वमेव विपादयति यत इति पुं
त्वसामान्यात्मके परस्मिन्नीश्वरे प्रोतास्तद्विशेषास्तदुपादानत्वे
न तत्स्वभावत्वादित्यर्थ: ८ ॥

जगत्स्थितिहेतुत्वमेव प्रपंचयति ॥

स्वामिकृतटीका

रसोऽहमिति पंचभि: अप्सु रसोऽहं रसतन्मात्ररूपया विभूत्या तदाश्रय
त्वेनाप्स्ववस्थितोऽहमित्यर्थ: तथा शशिसूर्ययो: प्रभास्मि चन्द्रार्कयो: प्र
भास्वरूपया विभूत्या तदाश्रयत्वेन स्थितोऽहमित्यर्थ: एवमुत्तरत्रा
पि द्रष्टव्यं सर्वेषु वेदेषु वैखरीस्वरूपेषु तन्मूलभूत: प्रणव: ओंकारो

गी॰
टी॰
स॰

स्मिन्वेऽप्यकारोऽयन्तन्मात्रस्वरूपोऽस्मिन्स्वगुरुस्वेषुपौरुषंअस्मोऽस्मिअस्यमेहि गुरुवास्तिहेति ८ ॥ विश्वावभाष्यटीका

रसइति रसोमधुर्योऽहमपस्कोनेयप्रभाचकाशाशुक्तिवहंभवामिशशि सूर्ययोःप्रणवओंकारःसर्ववेदेषुशब्दःखेअकाशोपौरुषंपुंस्त्वंनुशिन्दं गुरुस्वेषु ८ ॥

रामानुजभाष्यटीका

अतःसर्वस्यपरमगुरुस्वरूपारितत्त्वेनात्मभूतपरमपुरुषप्रकारत्वात् सर्व प्रकारःपरमपुरुषएवावस्थितइतिसर्वैःशब्दैःस्तस्यैवहाभिधानमिति नत्समानाधिकरणेनाह ८ रसोहमिति चतुर्भिः ॥

श्रीमभिनवगुप्तकृतटीकायांवक्तव्यम ८

परमार्थप्रपाटीका

अथनगत्स्थितिहेतुत्वमाह रसोहमिति पंचभिः अप्सुउदकेष्वहंरसो ऽस्मिरसतन्मात्ररूपविभूत्याआश्रयत्वेनास्थितोऽस्मि तथाशशि सूर्ययोःप्रभास्मि चंद्रेऽर्केवाप्रकाशरूपयाविभूत्यास्मि एवमुत्तरत्रा पिद्रष्टव्यं सर्ववेदेषुवैखरीरूपेणप्रणवोवाऽनओंकारोऽस्मि खेआ काशेशब्दतन्मात्ररूपोन्स्वगुरुषेषुपौरुषमुद्योगरूपोऽस्मि ८ ॥

वनमालीटीका

सर्वनियामकत्वेनानन्तविभूतिमत्त्वेनसर्वव्यापकत्वेनचचिंतयितमश क्यानामारंभकानांचिन्तनार्थंकाश्चिद्विभूतीराहरसइत्यादिचतु र्भिःसादिव्यापकत्वानियामकत्वाद्विभूतिमत्त्वाच्चरसादिपदवाच्योऽह मेवसर्वंसमाप्नोषिततोऽसिसर्वइतिवक्ष्यमाणत्वात् सर्वव्यापकत्वेना ध्यानन्मात्ररूपाशशिसूर्ययोःप्रभाभास्वरशुक्लरूपेनअहंस्प्रवाव ऽवेदमूलंप्रणवःखेशब्दस्तत्तन्मात्ररूपःनृषुपौरुषंअहं ८ ॥

उत्तमनवनयंतीटीका

एवंस्वस्यसर्वपरत्वंसर्वकारणत्वंचोक्तमिदानींकेनप्रकारेणत्वंसर्व परःसर्वकारणंचत्वंभवसिनहदेतस्यपेक्षायांतत्प्रकारंदर्शयन्स् स्यसर्वात्मत्वमाह पंचभिःरसोहमितिद्वेकोनायकंमीष्ठत्रप्स

नलेषु रसो रसतन्मात्ररूपोऽहमेवास्मि स्वविभूत्यात्मकेन रसतन्मात्ररू
रूपेण जलाधारभूतेनाधःकारणरूपेणाद्यः परस्वरूपेणान्तःपालयन्स्थि
तो भवामीत्यर्थः शशिसूर्ययोः शशिनि सकलौषधिनक्षत्रराश्यादी
नां पत्यौ सूर्ये सकलग्रहदिवसपर्यन्त्यादीनां पत्यौ च प्रभा तयोस्सा
रभूतामहद्विभूतिरूपिकाहमस्मि तया तौ पालयन् तत्तदाधारत्वेन त
त्तदात्मनेन च तयोरहं स्थितोऽस्मीत्यर्थः सर्ववेदेषु सर्वेषु ऋगादिषु सा
माथर्वाख्येषु चतुर्ष्वपि वेदेषु प्रणवः ओं कारस्तेषां कारणभूतोऽहमस्मि र तेऽ
तेन महद्विभूतिरूपेणाधारभूतेन वाक्प्रतानं तान्विधृत्य तिष्ठामीत्यर्थः
यथा शंकुना सर्वाणि पर्णानि संतृण्णान्येवमोंकारेण सर्वा वागिति श्रु
तेः खे आकाशे शब्दः शब्दतन्मात्रात्तदाधारभूतोऽत्कारणरूपोऽहमस्मि त
तया महद्विभूतिरूपया तमाकाशं विधृत्य तिष्ठाम्यहमित्यर्थः नृषु म
नुष्येषु पौरुषं पुरुषस्य भावः पौरुषमद्यमोऽहमस्मि यास्मिन्विभूति
रूपेऽद्य मेन तदाश्रयरूपे पुरुषास्तिष्ठंति तेन रूपेण तान्पालयन्नहं ति
ष्ठामीत्यर्थः ८ ॥

मधुसूदनीटीका

अबादीनां रसादिषु प्रोतत्त्वप्रतीतेः कथं सर्वमिदं त्वयि प्रोतमिति वचनं शंक्य रसादिरूपेण ममैव सत्त्वादित्याह ॥

पंचभिः ॥ रसः पुण्यो मधुरस्तन्मात्ररूपः सर्वासामपां सारः कारणभूतो योऽप्सु स
र्वास्वनुगतः सोऽहं हे कौंतेय तद्रूपे मयि सर्वा आपः प्रोता इत्यर्थः एवं स
र्वेषु पर्यायेषु व्याख्यातव्यं इयं विभूतिराध्यानायोपदिश्यत इति नातीवा
भिनिवेष्टव्यं तथा प्रभा प्रकाशः शशिसूर्ययोरहमस्मि प्रकाशसामा
न्यरूपे मयि शशिसूर्यौ प्रोतावित्यर्थः तथा प्रणव ओंकारः सर्ववेदेषु
नुस्यूतोऽहं तथा च यथा शंकुना सर्वाणि पर्णानि संतृण्णान्येवमोंकारेण सर्वा
वागिति श्रुतेः संतृण्णानि ग्रथितानि सर्वा वाक् सर्वो वेद इत्यर्थः श
ब्दः गुणः शब्दतन्मात्ररूपः खे आकाशेऽनुस्यूतोऽहं पौरुषं पुरुषत्वसामान्यं
नृषु पुरुषेषु यदनुस्यूतं तदहं सामान्यरूपे मयि सर्वे विशेषाः प्रोताः औ
नैडुक्रम्यादिदृष्टांतेरिति सर्वत्र द्रष्टव्यं ८ ॥

सदानंदीटीका

रसादिषु जलादीनां ग्रथितत्वप्रतीतितनुः त्वयि सर्वं कथं प्रोतमिति शंकां
कुन्तः स्पष्टं १ रसोऽस्म्यहमपां सारभूतः प्रोता रसे मयि १ इन्दर्कयोः प्रभा
सारः प्रभारूपे च तौ मयि १ प्रोतौ तथैव वेदेषोंकारोऽनुस्यूतईश्वरः प्रोते

गी॰
टी॰
स॰

42

शब्दात्मनिव्योममयीपोसर्वकरणे ३ ॥ ८

नीलकंठीटीका

नन्वेवंप्रपंचपरमात्मनोर्मृद्घटवदुपादानोपादेयभावोपिनस्यात् न
हिउपादानंचघटनहत्वंचेतिघटते मृद्घटादावदर्शनादित्याशंक्यस्व
ममायेंद्रजालरज्जूरगतल्पत्वंप्रपंचस्योपपाद्योभयमप्यविरुद्धमित्व
पदिष्टंचेदयमकस्माद्ब्रह्मिभविष्यतीतिमत्वादृष्टांतांतरैरेवानुवृत्तिं
व्यावृत्तिंचिज्जडयोर्दर्शयति रसइति यथारसोऽप्सु एकमपि परमाणु
मपरित्यज्यानुस्यूतोऽतएवतेरसरूपेमयिआपःप्रोताः एवंप्रभायांचं
द्रस्याःप्रोताःप्रणवेसर्वेवेदाःप्रोताः तद्यथाशंकुनासर्वाणिपर्णानिसं
तृण्णान्येवमोंकारेणसर्वावाक्संतृण्णेतिवाङ्मात्रस्यप्रणवानुस्यूति
श्रवणात् संतृण्णानिसंग्रथितानि एवमाकाशेशब्दःसारभूतस्तस्मिन्न
यिवंप्रोतं सर्वपुरुषेषुसारंपौरुषंपौरुषंधैर्यादिरूपंतत्रपुरुषाःप्रोताः
एवमग्रेपिद्रष्टव्यम् ८ ॥ आनंदीटीका

एतत्सर्वेषांप्रोतत्वंस्वात्मनिदर्शयति ॥ तदेतत्सर्वमेवासीद्ध्यज्ञात्वाव्यक्त
स्वरूपश्चादिनिर्गुणोपदेशेनविस्तरेवसर्वेषांयोनिः प्रकृतिरितिप्राग्
हेकौंतेय अप्सुविकृतिषुरसस्तन्मात्ररूपाप्रकृतिरहंवासुदेवएव
शशिसूर्ययोः प्रकाशविकारयोः प्रकृतिरूपःप्रकाशोहमेवमय्येवे
तस्मिन्नोतमित्यर्थः तथाचश्रुतिः तस्यभासासर्वमिदंविभातीति एवमुक्त
त्रापिप्रोतत्वंव्याख्येयं सर्ववेदेषुवाङ्मयेषुप्रणवओंकारोहं प्रणवि
तेहिइदंप्रपंचसारे शब्दब्रह्मेतियत्प्रोक्तंतच्छब्दात्मप्रपंचोते शब्दब्र
स्यतिशब्दावगम्यमर्थंविदुर्बुधाः स्वतोर्थानवबोधत्वात्प्रोक्तोचेतनाद
शारवः सतत्सर्वत्रसंस्यूतोजातेभूताकरेपुनः आविर्भवतिदेहेषुश्च
णानामतिविस्तरतः प्रकृतौकालवशात्तद्यागुणान्तःकरणमनीति
नादोस्मात्प्रपंचे हकारःपुरुषःप्रोक्तःसइतिप्रकृतिस्मृता अजप
यंतथाशाक्तिमंत्रादक्षिणवामतः बिंदुर्दक्षिणभागस्तुविसर्गोवाम
भागतः सौचदक्षिणवामाख्यौभागौशुक्लविशेषितौ बिंदुःपुरुष
हृदयोविसर्गःप्रकृतिःस्मृता शुंभप्रकृत्यात्मकोहंसस्तादात्मक

मिदंजगत् पुंप्रकृत्यनुसंधानात्सोहंभावमुपागतः सकारंचह
कारंचलोपयित्वाप्रयोजयेत् संधिंतत्पूर्वरूपाख्यानततोसौप्रणवो
भवेत् इत्यादिचतुर्थपटले एवंप्राहतन्मात्ररूपआकाश योह
यंपुंस्त्वप्रजननसामर्थ्यंतत्पुरुषप्रकृतिषु ८ ॥

रामकंठीटीका

संवेद्यमानाःसंतःसर्वेभावाःस्वंतमात्मानंलभंतेसंवेद्यमानताव्य
तिरिक्तेनप्रकारांतरेणकस्यांचिदवस्थायांकेषामप्यनुपलंभात् रूभावं
इत्थंवास्तवएकएवसंवेदितासंविदतेवस्तुजातं ततोभावरू
पसंवेदितुरेवप्राक्तिविजृंभते नान्यत्तद्व्यतिरिक्तंकिंचिदिद
अतःपरापरमेयप्रकृतीस्वभावभूतेइतिस्वतःसिद्धप्रमात्रहंतेग त्व
भोक्तृत्वापक्रमएव यदुक्तं तदुसोहमित्यादिनाज्ञाकतस्थये
नोपपादयति तत्रयोयस्यप्राधान्येनवर्ततेगुणःसएवतस्यात्मे
ति अपारसएवात्मासचाहं यतउक्तन्यायेनरस्यमानतया संवे
द्यमानतयासंवेद्यमानाआपोरसरूपमात्मानंलभंते ततोरसयि
त्वेवरसात्मिकाप्राप्तिंसिमैवचानुभवितृत्वलक्षणस्वभावाव्य
भिचाराद्रसयितृत्वं ततोप्सुःअहंरसइत्युक्तं यथाऽहमस्तआत्म
त्वेनव्यवस्थितएवंदर्शितंगंधः पार्थिवविभावस्तेनोलक्षण
भूतभेदेषुप्रकाशात्मतेजः शास्त्राभिहितोरूपगुणआत्मत्वेनव्य
वस्थितस्तथाविशाहंगुणः एवंवायुस्पर्शगुणोप्यत्रपरिसंख्ये
यइतिभूतपंचकेगंधादिप्रधानगुणात्मनापूर्वोक्तन्यायेनाहं
वावस्थितइतिपूर्वोक्तविभागेनभूतपंचकसंस्कारहीनतत्त्वविंश
तिरूपतउपक्रान्तविभागेममस्वभावइत्युपपादिते ८ ॥

लासिकी [illegible]टीका

ननुकेनदृष्टांतेनतत्त्वेश्वरस्यसमवायिकारणत्वंतदनुमीयतेइ
त्याशंकानिराकरणायाह ॥ यइत्ततन्मात्रेषुसद्रूपतयाप
रिणमंते तदहमेवइत्यर्थः समवायकारणमहमेवेत्य
वंसर्वत्रबोद्धव्यं तदुक्तं तन्मात्राणिविशेषास्तेभ्योभूतानिप

गी॰ चपंचभ्यः एतेस्सनाविशेषाः शांताघोराश्चमूढाश्चेति तथातेजोवि

म॰ शेषयोः शशिसूर्ययोः प्रभास्मिउत्तवेउत्वादिरहितः प्रकाशात्तन्मा

टी॰ त्रास्मि सर्वेषुवेदेषुब्रह्मणोनिःश्वासतयोत्कृष्टपवनभेदस्तत्तन्मू

लभूतः प्रणवओंकारोनभ्युपगामरूपोब्रह्मसंस्पर्शलक्षणोहं ।

43 विश्राकाशेशब्दतन्मात्रोस्मि जीवभूतेषुनृष्वहंकाराभिमानेष्वहंका

रजीवितभूतं पौरुषंयेनतेजसापुरुषोहमिति सार्वभौमंप्रतिप

द्यते ८ ॥

पैचोलीटीका

केनकेनधर्मेणविशिष्टेत्वयिसर्वप्रोतमित्याह रसोहमिति
हेअर्जुनअप्सुअपांयःसारभूतोरसःसोहंतस्मिन्मयिआपः
प्रोताइत्यर्थः एवंसर्वत्रशशीसूर्ययोःप्रभाप्रकाशःअहम
स्मिसर्ववेदेषुप्रणवःवेदमूलभूःओंकारःअहंखेआकाशेश
ब्दतन्मात्रःरूपःनृषुमनुष्येषुपौरुषंउद्यमःअहं ८

[illegible]टी

एवंतन्मात्रेषुअहंमदस्पृपरा[illegible]
[illegible]नैवते[illegible]तः
विशेषत्वेनोक्तानितिं[illegible]सर्वेषनोयं तदुक्तं [illegible]
[illegible]मूढाश्चेति तथाते[illegible]
[illegible]शशिसूर्ययोः[illegible]
[illegible]निःश्वासतयोत्कृष्टपवनभेदस्तत्तन्मूलभूतः
[illegible]प्रणवओंकारोनभ्युप
गामरूपोब्रह्मसंस्पर्शलक्षणोहं विश्राकाशेशब्दतन्मात्रोस्मि
जीवभेदेषुनृष्वहंकाराभिमानेष्वहंकारजीवितपौरुषंयेनते
जसापुरुषोहमितिसार्वभौमंप्रतिपद्यते किंच ८

रणवीरसमिद्धोधिनी

ननुकथंभूम्यादयोमवसंस्थापितमहत्फलकस्वस्वजात्युवि
त्युरुद्भिदिरूपप्रयत्नात्मकप्रकृतिसाधनभूताःशक्तिमंतोभवंती
त्यर्जनाभिप्रायमाशंक्यमहंशानुस्मृतत्वात्तेषांस्वस्वकार्यसाध

ने प्राक्तिरित्याह रसोऽहमिति हे कौंतेय ऽत्याप्रपत्यत्वेन स्वकीय
स्यैव तवाश्रेयहं पांडवस्य मह्याव्यते इति संबंधनाभिप्रायः अप्सु
जलाधिदेवतेषु वारुणाद्यस्त्रेषु विषयेऽहं रसो जलरूपेणास्थि
तोस्मि येन परकीयं सैन्यं सकलमाप्लाव्यते परप्रयुक्ताग्नेयाद्य
स्त्रजालं वा विफलीक्रियते इति शशिसूर्ययोरेतद्देवतयोरस्त्रयोर
हं प्रभास्मि प्रकाशरूपेणास्थितोस्मि यया प्रभया परप्रयुक्तसंतम
साद्यस्त्रजालं विफलीकृत्य स्वीयपरकीयादिविवेको विजृंभते इ
ति सर्ववेदेषु वेदशाखोक्तप्रकीर्तितत्वाद्द्वेदपरः बहुवचनं च मंत्रा
नेत्यापेक्षं तथा च सर्वेषु सर्वदेवतेषु यावत्प्रकारेषु च वेदेषु पृथग
वेदपठितमंत्रेषु अहं प्रणवः ॐकारध्वनिः येनाद्यवसानयोरुच्चा
रितेन संपुटीकृतो मंत्रो विनियोगसाधको भवतीति शब्दः खे इति
खे शून्यतासंपादके प्रस्वापनाद्यस्त्रे ऽहं शब्दः स्वनः कलध्वनिः
यंशुनैव विपक्षोलसीभूता निद्रयाभिभूयंत इति अथवा खे खवक्ष
हुगुणत्वेन शब्दवेधि निवाणादेशशाह्वोऽहमस्मि येनान्वितं तच्छ
हमेवान्वेषत इति नृषु वीरेषु अहं पौरुषमहंकारः पराक्रमरूपो
व्यापाररूपो वास्मि येन करणभूतेन शस्त्रादिप्रयोगः संपाद्यते
इति ८॥ मधुभाष्य

८॥

44

भाषाअनुवाद

इस श्लोक से ले कर पांच श्लोक तक जगत की स्थिति का कारण
विस्तार करि कहते है कि हे कुंतीपुत्र अर्जुन जलमे रसरूप औ
चंद्र सूर्य मे प्रकाशरूप और वेद मे मूलभूत प्रणव ओंकार रू
प मैंही हूं तथा आकाश मे शब्द रूप औ पुरुषों मे पौरुष क
हे उद्यमरूप भी मैंहीं यह जानो ८ ॥

दोहा

हों कौंतेय रसजल विषें रवि शशिमें हूं भास॥ मे ओंकारसमवेद
में नर नभ पौरुष शब्दनिवास ८॥

45

पुण्यो गन्धः पृथिव्यां च तेजश्चास्मि विभावसौ । जी
वनं सर्वभूतेषु तपश्चास्मि तपस्विषु ९ ॥

शांकरभाष्यं

पुण्य इति पुण्यः सुरभिर्गन्धः पृथिव्यां चाहं तस्मिन्मयि गंधभूते पृ
थिवी प्रोता पुण्यत्वं गन्धस्य स्वभावत एव पृथिव्यां दर्शितम् अबादिषु
रसादेः पुण्यत्वोपलक्षणार्थम् अपुण्यत्वं तु गंधादीनाम् अविद्याधर्माद्य
पेक्षं संसारिणां भूतविशेषसंसर्गनिमित्तं भवति तेजो दीप्तिश्चास्मि ^
तपस्विषु तस्मिन् तपसि मयि तपस्विनः प्रोताः ९ ॥

^ विभावसावग्नौ तथा जीवनं सर्वभूतेषु येन जीवन्ति सर्वा[illegible]णि भूतानि तज्जीवनं तपश्चास्मि

आनंदगिरिकृतटीका

मयि सर्वमिदं प्रोतमित्यस्यैव परिपूरणार्थं प्रकारान्तरमाह पुण्य इ
ति पृथिव्यां पुण्यः हितो यः सुरभिर्गन्धः सोऽहमस्मीत्यत्र वाक्यार्थं
कथयति तस्मिन्निति कथं पृथिव्यां गंधस्य पुण्यत्वं तत्राह पुण्यत्व
मिति यत्तु पृथिव्यां गंधस्य स्वाभाविकं पुण्यत्वं दर्शितं तदबादिषु
रसादेः स्वाभाविकपुण्यत्वस्योपलक्षणार्थमित्याह पृथिव्यामिति
प्रथमोत्पन्नाः पंचापि गुणाः पुण्या एव सिद्धादिभिरेव भोग्यत्वादि
तिभावः कथं तर्हि गंधादीनामपुण्यत्वप्रतिभानं तत्राह अपुण्यत्व
^ति त्विति तदेव स्फुटयति संसारिणामिति गंधादयः स्वकार्यैर्भूतैः
सह परिणममाणाः प्राणिनां पापादृष्टवशादपुण्याः संपद्यन्त
इत्यर्थः पञ्चाप्रोतेजः तद्भूते मयि प्रोतोऽग्निरित्याह तेजश्चेति जी
वनभूते च मयि सर्वाणि भूतानि प्रोतानीत्याह तथेति जीवनशब्दा
र्थमाह येनेति अन्नरसेनामृताख्येनेत्यर्थः तपश्चास्मीत्यादि ता
त्पर्यमाह तस्मिन्निति चित्तैकाग्र्यम् अनाशकादि वा तपस्तदात्मनी
श्वरे प्रोतास्तपस्विनो विशेषणाभावे विशिष्टस्य वस्तुनो भावादित्य
र्थः ९

स्वामिकृतटीका

पुण्येति किंच ^ पुण्योऽविकृतो गंधः गंधतन्मात्रं पृथिव्याश्रयभूतमहमित्यर्थः
यद्वा विभूतिरूपेणाश्रयत्वस्याविवक्षितत्वात् सुरभिर्गंधस्योत्कृष्टत
याविभूतित्वात् पुण्यो गंध इत्युक्तं तथा विभावसावग्नौ यत्तेजः स

गी॰ टी॰ स॰ 46

तद्दीप्तिः तदहं सर्वभूतेषु जीवनं प्राणधारणं आयुरहमित्यर्थः तपस्विषु
वानप्रस्थादिषु द्वंद्वसहनरूपं तपोस्मि ९ ॥

पैशाचभाष्यटीका

पुण्यो गंधस्सुरभिः पृथिव्यां चास्मि तेजो दीप्तिश्चास्मि विभावसौ वह्नौ जीवनं प्रा
णः सर्वभूतेषु तपश्च तपश्चास्मि तपस्विषु ९ ॥

रामानुजभाष्यटीका [illegible] ९ स्पष्टार्थम्

अभिनवगुप्ताचार्यटीका [illegible] ९

परमार्थप्रपाटीका

किंच पुण्यो विकृतैर्गंधः गंधतन्मात्रं पृथिव्यामहमस्मि [illegible]
[illegible] विभावसावग्नौ यद्दीप्तं तेज
स्तदहं सर्वभूतेषु जीवनं प्राणधारणमायुरहमित्यर्थः तपस्विषु वानप्र
स्थादिषु तपः इह महिमत्वरूपेणाहमस्मि श्रुतिरपि यजुः संहितायां व
सोः पवित्रमसि द्यौरसि पृथिव्यसि मातरिश्वनो घर्मोसि विश्वधा असि
परमेण धाम्नेति भाष्यं वसोः विराजः [illegible] वस्य [illegible] चीकृतभूतविग्रह
त्वं पवित्रं वाह्यान्तः शोधकमुपकमसि पवित्रमपि प्राणधारमित्युक्त
त्वात् द्यौराकाशोसि तथा पृथिव्यसि मातरिश्वनो वायोः सकाशात्
घर्मः तेजोसि वायोरग्निरित्युक्तत्वात् वायोः शोषकत्वरूपेणांतर्गतं तेजस्त्व
र्थः अग्न्यादित्यैकेन कियद्वाच्यं अतस्तथाह विश्वधासीति विश्वप्रका
रेणावर्तमानत्वात् द्यपिकेन परमेण धाम्ना नन्तसामर्थ्यदानपराक्रमेन रसा
दितन्मात्ररूपेण धाम्ना तेजो विशिष्टेत्यर्थः ९ ॥

वनमालीटीका

पृथिव्यां पुण्यो गंधः सौरभः विभावसावग्नौ तेजः सर्वभूतेषु जीवनं प्रा
णधारणं तपस्विषु तपश्चाहं ९ ॥

उत्तमैवेजयंतीटीका

किंच पुण्यः इति पृथिव्यां चराचरकारणरूपिन्यां महत्या पुण्यः श्रेष्टः
गंधः गंधतन्मात्राख्योऽहमस्मि यस्मिन्कारणरूपमहिभूत्वात्मके पृथि

वीनिष्टुनितेनैवरूपेणाप्संनिष्ठुतांपालयामीत्यर्थः चपाह्योवायोर्यास्पर्श
तन्मात्रासाप्यहमेवास्मियथामद्विभूतिरूपयाधीतोस्पर्शव्याकुलाना
जनानांसुखप्रदंदन्नस्मिंस्तिष्ठामीतियोतयतिविभावसौपावकेयत्ते
जःसकलवस्तुदहनप्रकाशनात्मरूपंतदहमस्मिसर्वभूतेषुचराचरेषु
तजीवनमायुरहमेवास्मियेनमद्विभूतिरूपेणायुषाब्रह्मादिस्थावरांता
नांसर्वेषांजीवानांस्थितिर्भवति तपस्विषुसर्वेषुयत्तपः सुखदुःखा
दिद्वंद्वसहनंतदप्यहमेवास्मि चकारेणगंधादीनांपंचतन्मात्राणां
पंचमहाभूतकारणत्वान्मुख्यत्वमस्तिगंधादीनांपंचविषयाणांतथा
चभूतगुणत्वादप्रधानत्वमपितत्तद्रूपेणाविभूतित्वेनाधाराधेयरूपे
णस्थितानामपितेषांमाधारत्वेनतत्तद्रूपंपालयंस्तेषुतेष्वहमेवस्थि
तोस्मीतिसूचितम् यद्वाविभावसुपावकेतेजसःकार्यत्वात्तयोरभेद
विवक्षयातेजणत्वेनोक्ततेतेजस्तद्रूपतन्मात्रायाःकार्यत्वादभेद
विवक्षयारूपतन्मात्रोक्तेनेतेनविभावसौतेजस्तियत्तेजःरूपतन्मात्रंस
प्यहमेवास्मिसर्वभूतेषुसर्वेषुभूतरूपेषुपकोनपंचपात्स्वरूपकेषु
वायुषुयज्जीवनंतेषांमात्मरूपंकारणंस्पर्शतन्मात्ररूपंमहमेवास्मि
वायोःसर्वगतत्वाज्जगत्प्राणत्वाच्चसर्वभूतत्वस्पर्शसंभवः आकार
भेदात्प्राणःसिनामादिरूपतामगुणभेदात्प्राणभेदाच्चनस्पवहतोकि
रेष्वपर्यवनक्ककांदोगेःप्राणसंवादेनवैवाचोनचक्षूंषिनश्रोत्रा
णिनमनांसीत्याचक्षतेप्राणोह्येवैतानिसर्वाणिभवतीत्यादितेस्तिप्र
थमस्यचपाद्यस्याभिप्रायःद्वितीयस्यतुरसादिषु वतुस्तुत
न्मात्रास्वगुणत्वसमुच्चायकत्वेनचार्थ्येस्मिन्नेवमित्यर्थः ॥ ९ ॥

मधुसूदनीटीका

पुण्यःसुरभिरविकृतोगंधःसर्वपृथिवीसामान्यरूपस्तन्मात्राख्यःपृ
थिव्यामन्तस्थतोहं चकारोरसादीनामपिपुण्यत्वसमुच्चयार्थःपाठसू
पीरूपरसगंधानांहिस्वभावतएवपुण्यत्वंअविकृतत्वंप्राणिनामधर्म
विशेषात्तेषामपुण्यत्वंनतुस्वभावतइतिद्रष्टव्यं तथाविभावसौव
ह्नौयत्तेजःसर्वदहनप्रकाशनसामर्थ्यरूपमुष्णस्पर्शसहितंसितभा
स्वररूपंपुण्यंतदहमस्मिचकाराद्यावायौपुण्यःउष्णस्पर्शोनत्वाणाम

गी॰
टी॰
स॰

47

प्यायकः शीतस्पर्शः सोऽप्यहमिति द्रष्टव्यं ^सर्वेषु प्राणिषु सर्वेषु भूतेषु जीवनं प्राणधारण
मायुरहमस्मि तद्रूपे मयि सर्वे प्राणिनः प्रोता इत्यर्थः तपस्विषु नित्यं तपो
युक्तेषु वानप्रस्थादिषु यत्तपः शीतोष्णक्षुत्पिपासादिद्वंद्वसहनसामर्थ्यरू
पं तदहमस्मि तद्रूपे मयि तपस्विनः प्रोता विशेषणाभावे विशिष्टाभावा
त् तपश्चेति चकारेण चित्तैकाग्र्यमांतरं जिह्वोपस्थादिनिग्रहलक्षणं
वाह्यं च सर्वं तपः समुच्चीयते [illegible]
[illegible] ॥

सदानंदीटीका

गंधोऽहं यावतो भूमौ गंधभूते महीमयि प्रोता गंधस्य पुण्यत्वं स्वभावादे
व संमतं १ च पुण्यत्वं रसादीनां स्वभावादेव गम्यतां गंधादीनां पुण्य
त्वं प्राणिनामदृष्टतः २ तेजः प्रकाशरूपं यत्सितं भास्वरमग्निगं तद
हमयि तद्रूपे ग्रथितो सौ विभावसुः ३ चकारात्पावनः स्पर्शो यो वायोः
सोऽप्यहं हरेः प्राणधारणमायुर्यत्सर्वप्राणिषु जीवनं ४ तदहमयि
तद्रूपे संप्रोताः प्राणिनोऽखिलाः तपोद्वंद्वसहिष्णुत्वमहमस्मि तपस्वि
षु तपोरूपे मयि प्रोताः युक्तचित्तास्तपस्विनः ५ ९

नीलकंठीटीका

पुण्य इति रसादिष्वपि द्रष्टव्यं अपुण्यस्य सर्वस्याविद्यमात्रविलस्य
त्वात् विभावसौ वह्नौ तेजः दहनशक्तिः जीवंत्यनेनेति जीवनमन्नं
विराजं तत्र हि सर्वाणि भूतानि प्रोतानि अन्ये तु जीवनमायुरिति व्या
वदंते तपश्चेति तपो धर्मस्तद्रूपे मयि तपस्विनः प्रोताः ९ ॥

धानंदीटीका

पुण्यो निर्विकारो गंधतन्मात्रं विभावसौ वह्नौ तेजस्तन्मात्रं जीवनं प्राण
नं यद्वायोः प्रधानं रूपं सर्वेषु भूतेषु प्राणिषु वर्णानां नियतं कर्म तद्देवा
भिहितं तप इति स्मृतेः सर्वेषां वर्णाश्रमिणां स्वस्वधर्मानुष्ठाने क्रिया
शक्तिरहमेवेत्यर्थः ९ ॥

रामकंठीटीका

पुण्यशब्दस्यात्र प्राधान्याविवक्षया सर्वगुणेषु विशेषणत्वेनानुवर्तनीयः

एवं भूतेषु प्राणिषु धर्माऽविरुद्धः कामः संकल्पो मनोहं तथान्त्येषु
जीवेषु पौरुषकारात्मकं पुरुषत्वमहमेव ९ ॥

लासिकी टीका

किंच पुण्यो विकृतो गंधो गंधतन्मात्रं पृथिव्यामहं विभावसावग्नौ
तेजोरूपतन्मात्रमस्मि सर्वेषु भूतेषु जीवनमंतःकरणत्रयस्पश्रा
णधारणलक्षणा सामान्या वृत्तिः यथाभूतानां जीवसंज्ञाः सप्त
ऋवः साहं तदुक्तं सामान्यकरणवृत्तिः प्राणाद्या वायवः पंचेति
तपस्विषु वानप्रस्थादिषु तयो मनःसंकल्पनिमित्तं द्वंद्वसहनरू
पमहं एवं यदीयं भूम्यादीनां सूक्ष्मं तन्मात्रादिरूपं तदहं स्थूलं
त्वसाहतं ९ ॥

पंचोली टीका।

किंच पुण्य इति च पुनः पृथिव्यां यः पुण्योऽविकारि स्वाभाविकः
गंधतन्मात्रं सोहं च पुनः विभावसौ वैश्वानरे तेजः दीप्तिरूपमः
स्मि सर्वभूतेषु जीवनं प्राणधारणमायुः सोहं तपस्विषु शीता-
सादिद्वंद्वसहनरूपं तपः स्वरूपम् ९ ॥

रणवीरसमिद्बोधिनी॥

पुण्य इति न सत्यान्यरमो धर्म इति स्मृतेः पुण्यं सत्यप्रधानोऽथ
र्मः तद्विशिष्टो गंधः लेशोऽपि गंध इत्यनुप्रासनात्तत्क्षोभाः तस्व
रूपेण चाहं पृथिव्यां भूमिराप इत्यत्र पूर्वं व्याख्यातत्वात् स्वरूपे शुद्धो वि
तेऽरुद्वेत्रादिप्रदेशोस्मि यस्मात्स्थास्येन देशांतराणि विहाय तत्रैव
समस्य योयनानन्तताबीरपुरुषाः पुण्यलोकानासाद्य पर्यंते मत्सा
पुण्यं गच्छंतीति यद्वा पृथिव्यां पूर्वव्याख्यानुसारेणैव प्रतिपादि
तस्वरूपे पार्वती याय सज्जातेहं पुण्योगंधः सूक्ष्मतदेशा सत्यस्व
रूपेण योनस्थितोस्मीति येनांशेनाधिष्ठितानि तान्यस्थानि

48

प्रसुवाते समर्थानि भवंतीति केनचिद्धार्यमाणं हि पार्थिवं व
स्तु लब्धस्थितिकं सत् स्वकार्यसाधने शक्तिमद्भवतीति सिद्धं
सत्यस्याधाभासत्ये लोका प्रतिष्ठिता इति स्मृतेः प्रसिद्धा तथा वि
भावसौ सूर्यवह्नी विभावसू इति कोशात् सूर्यैतद्देवते स्वे तेजः पर
कीयवद्वः प्रतिघातकमस्मि यदसहिष्णवो रिपवो दस्युप्राया
विमुखीभूय पलायंते इति यद्वा विभावसौ वह्निदेवतास्वे तेजो
रादशक्तिरस्मि येन रिपवो दह्यंत इति तथा सर्वभूतेषु सर्वेषु
प्राणिषु शुक्रे ह्मासहन्ते भूते प्राणयनीते समे त्रिष्विति कोशात् स
वेदविद्यादिशास्त्रेषु कृताभ्यासौ भूतेषु सर्वदर्शिषु शुद्धादिकादि
स्थितियावत् स्नेहादिवशाद्धि वसंप प्रयंतो ऽदिमयोषु ह्यत्रि वर्तंते
इति न ते नश्यायि क्रियंते इति तेषु च जीवनं प्राणोऽस्मि येन शुक्लास्ते
रिपून्कृंतन्नप्ययुक्तंते इति तथा तपस्विषु कायवाङ्मनसां शुद्धापह
रूपमानैकविषयीकरणं तपस्तेषु तपसां तव्यवर्तकोऽहमेवा
स्मीति ९॥

९॥ मधुभाष

भाषाअनुवाद

और पवित्र गंधरूप मात्रा पृथिवी मे और तेजरूप अग्निमे तथा जीवनरूप सब भूत कहे प्राणीयों मे और तपस्त्रियो मे तपरूप मैं हूं अर्थात् मेरी ही विभूति है ९ ॥

दोहा

छिति मह गंध पवित्र हों तेज हों पावकमाहि जीवन हों सब जीवमें तपस्विनमे तपसाहि ९ ॥

49

वीजंमांसर्वभूतानांविद्धिपार्थसनातनं बुद्धिर्बुद्धि
मतामस्मितेजस्तेजस्विनामहं १० ॥

शांकरभाष्य

वीजमिति वीजंप्ररोहकारणं मांविद्धिसर्वभूतानां हेपार्थसनातनं चि
रंतनंकिंच बुद्धिर्विवेकशक्तिरन्तःकरणस्य बुद्धिमतां विवेकशक्ति
मतामस्मि तेजःप्रागल्भ्यं तद्वतांतेजस्विनामहं १० ॥

आनन्दगिरिकृतटीका

ननुसर्वाणिभूतानि स्वकारणेप्रोतानिकथंतेषांत्वयि प्रोतत्वंतत्राह
वीजमिति वीजांतराद्यपेक्षयानवस्थां वारयति सनातनमिति चेतन
स्याभिव्यंजकं तत्वनिश्चयसामर्थ्यं बुद्धिस्तद्वतां याबुद्धिस्तद्भूते
मयिसर्वेबुद्धिमन्तः प्रोताभवंतीत्याह किंचेति प्रागल्भ्यवतां
यत्प्रागल्भ्यं तद्भूतेमयितद्वंतः प्रोताइत्याह तेजइति तद्धिप्रा
गल्भ्यं यत्पराभिभवसामर्थ्यं परैरप्रधृष्यत्वं १० ॥

स्वामिकृतटीका

बीजमिति

किंच सर्वेषांचराचराणांभूतानांवीजं सजातीयकार्योत्पादनसाम
र्थ्यं सनातनंनित्यंउत्तरोत्तरसर्वकार्येष्वनुस्यूतं तदेववीजंमद्विभू
तिंविद्धितत्तद्व्यक्तिव्याप्तिंविनश्यत् तथाबुद्धिमतांबुद्धिः प्रज्ञाहम
स्मितेजस्विनांप्रागल्भानांतेजः प्रागल्भ्यमहं १० [illegible] ॥

पिशाचभाष्यटीका

वीजंप्ररोहणसमर्थंमांसर्वभूतानांविद्धिपार्थसनातनंचिरंतनं बुद्धि
बुद्धिमतामस्मितेजः प्रागल्भ्यंतेजस्विनामहं १० ॥

रामानुजभाष्यटीका [illegible] १० स्पष्टार्थम्

अभिनवगुप्तकृतटीका [illegible] १०

परमार्थप्रपाटीका

किंचसर्वभूतानांचराचराणांवीजंमं|कुरोत्पादनसामर्थ्यंसनातनं

गी॰
टी॰
स॰

नित्यं अन्तरेण न सर्वकार्येषु न स्यात् तदहमस्मि तथा बुद्धिमतां बुद्धिः प्रज्ञाहमस्मि तेजस्विनां तेजः प्रागल्भ्यमहमेवास्मि १०॥

वनमालीटीका

सर्वभूतानां चराचरभूतानां बीजं सजातीयकार्योत्पादनसामर्थ्यं सनातनमन्तरेण न कार्येषु न स्यात् बुद्धिः प्रज्ञा तेजस्विनां प्रागल्भानां तेजः प्रागल्भ्यम् १०

अथ सर्वतंत्रयंतीटीका

किंच बीजमिति हे पार्थ सर्वभूतानां स्थावरजंगमरूपाणां बीजं प्ररोहकारणं सनातनं नित्यं प्रतिव्यक्तिभिन्नं यदात्मान्नादिबीजं मां विद्धि विभूत्यात्मकेन तद्रूपेण तेषु स्थित्वाहं तानि पालयामीति त्वं जानीहीत्यर्थः बुद्धिमतां सारासारविवेकवतां बुद्धिर्व्यवसायात्मिकाहमस्मि यया विभूतिरूपया तेषु स्थितेहाम त्वं च तेभ्यः सुखभोगादिकं प्रदायतान्पालयामीत्यर्थः तेजस्विनां तेजस्वतां यत्तेजः परैरनभिभूतत्वे सति पराभिभवसामर्थ्यं तदप्यहमेवास्मि महद्विभूतिरूपेण तेजसा तेषु तिष्ठन् तत्तज्जीवेभ्यस्तान् रक्षामीत्यर्थः १०॥

सर्वाणि भूतानि स्वस्वबीजेषु प्रोतानि — मधुसूदनीटीका — न तु त्वयीति चेत्तत्राह॥

यत्सर्वभूतानां स्थावरजंगमानामेकं बीजं कारणं सनातनं नित्यं बीजं तदेतदं न तु प्रतिव्यक्तिभिन्नमनित्यं वा तदव्याकृतं व्याख्यसर्वबीजं मामेव विद्धि न तु मद्भिन्नं हे पार्थ अतो युक्तमेकस्मिन्नेव मयि सर्वबीजे प्रोतत्वं सर्वेषामित्यर्थः किंच बुद्धिः तत्वातत्वविवेकसामर्थ्यं तद्रूपेण बुद्धिमतामहमस्मि बुद्धिरूपे मयि बुद्धिमंतः प्रोता विशेषणाभावे विशिष्टाभावस्यौक्तत्वात् तथा तेजः प्रागल्भ्यं पराभिभवसामर्थ्यं परैश्चा
२ नभिभाव्यत्वं तेजस्विनां तथाविधप्रागल्भ्ययुक्तानां यत्तदहमस्मि तेजोरूपे मयि तेजस्विनः प्रोता इत्यर्थः १०॥

सदानंदीटीका

स्वस्वबीजेषु भूतानि प्रोतानि न तु त्वयीति चेत् प्रा॰ सर्वेषां स्थावराणां भूतानां यच्चिरंतनं १ बीजं अव्याकृतं व्यक्तं मां विद्धि प्रोतान्यतो मयि बुद्धिमतो विना बुद्धिं तादृशीन विवेकिनः १ पराभिभवसामर्थ्यं तेजः प्रागल्भ्यम्

चते १ परेष्वानभिभाव्यत्वं यत्तत्तेजस्विनामहं तेजस्विनः परिप्रोता
स्तेजोरूपे मयीश्वरे ध ॥ १० ॥

नीलकंठीटीका

बीजं कारणं सर्वभूतानां पिंडब्रह्मांडात्मकानां बीजे मयि पिंडादि
कं प्रोतं कनककुंडलादिवत् सनातनं नित्यं बीजांतरादनु
त्पन्नं बुद्धिरूपे मयि बुद्धिमंतः प्रोताः तेजः प्रागल्भ्यं तद्रूपे मयि ।
प्रगल्भाः प्रोताः १० ॥

आनंदीटीका

चवेहेतुमाह सनातनं बीजं तत्व्रीह्यादिवद्विनश्वरं बुद्धिमतां विवे
षां बुद्धिस्तत्त्वात्तत्त्वविचारः तेजस्विनां राज्ञां तेजः परेषामभिभवे साम
र्थ्यं १० ॥

रामकंठीटीका

तथा बुद्धिमतां बुद्धिरहमेवेति मनोहंकारबुद्धिलक्षणमंतःकरणं गुह
घाणां प्रधानं धर्मत्रयं सर्वोत्पाद्येताः हमेवेति त्रिभिरेतैः सहितस्व
यो विंशतिभेदः कार्यकारणवर्गश्चतुर्विंशतिप्रधानेनांतर्गतोज
इप्रकृतिप्रपंचो ममैव स्वभावइति व्यवहितैः पादैः प्रतिपादितं एव
मेव सर्वभूतेषु जीवनं प्राणनं प्रधानं तदप्यहमेव तथा सर्ववेदेषु
प्रणवओंकारः सोदितः विकृतधन्यात्मकोहमेव तस्य हि प्रकृतिभू
तत्वात्सर्ववेदेषु प्रधानं तस्य विकारभूता हि सर्वे वेदाः १० ॥

लासिकी [illegible]टीका

ननु प्राकृतस्य स्थूलरूपस्य स्फुटतया भासमानत्वात्कथं तत्र सर्गान्त 'सर्वेषां चराचरात्मक
स्य तत्त्वप्रतीतिः स्यादित्यत आह ॥ 'स्फुटतया प्राकृतत्वेन भासमा
नानां भूतानां बीजं सूक्ष्मादिकारणं मामीश्वरं जानीहि सनात
नं नित्यं न तु प्रतिव्यक्ति विनश्यत् १० ॥ न केवलं जगत्कारणमस्य
वाहंकारणं [illegible] जानीहि यावदैश्वर्यलाभस्यापीत्याह बुद्धिमतां प्र
शान्तबोधशालिनां बुद्धिर्बु [illegible] द्धिवृत्तिरहमेव तथा तेजस्विनां
सत्त्वमहेश्वराणां सदाशिवभूमिकारूढानां यत्तेजः स्वेच्छाप्रत्येयस्य भा
वचक्रस्योन्मीलितमात्रचित्रकल्पमवभासनं तदहम् [illegible]
[illegible]

गी॰ टी॰ स॰

51

किंच बीजमिति हे पार्थ सनातनं नित्यं मां सर्वभूतानां सर्वेषां च-
राचरभूतानां बीजं सजातीयविजातीयकार्योत्पादनसामर्थ्य-
महिभूतिं विद्धि बुद्धिमतां बुद्धिरन्तःकरणस्य विवेकशक्तिरहं ते-
जस्विनां तेजः प्रागल्भ्यमहं १०

तत्त्वदीपिकाटी॰

सर्वेषां चराचरात्मकानां स्फुटतया प्राकृतत्वेन भासमानानां भूता-
नां बीजं मूलमादिकारणं मामीश्वरं जानीहि सनातनं नित्यं न तु प्र-
तिक्षणिकं विनश्यत् न केवलं जगत्परिणामस्यैवाहं कारणं यावद्बु-
सर्वलाभस्यापीत्याह बुद्धिमतां प्रशान्तबोधशालिनां बुद्धिर्बुद्धिवृ-
त्तिरहमेव तथा तेजस्विनामप्यहमेव तेजसां सदाशिवभूमिकारूढा-
नां योगेश्वराणां प्रत्ययस्य भावकस्योज्जीवितमात्राधिष्ठानत्वमप्य-
वास्तवं तदहं १०

रणवीरसमिद्धोधिनी ॥

बीजमिति हे अर्जुन मां सर्वेश्वरं सर्वभूतानां सर्वेषां भूतानां प्रो-
क्तलक्षणानां भूम्यादितत्त्वानां सनातनं बीजं मूलकारणं विद्धि
जानीहि मय्येवैतानि पूर्वोक्तलक्षणानि भूम्यादीनि व्याख्यातस्व-
रूपप्रकृतिसाधनीभूतानि तद्विश्राणमर्थस्पष्टानीति भावमेते-
त्कार्यसाधनशक्तभावसंभावनां कुर्विति तात्पर्यं बुद्धिमतां
दृढनिश्चयात्मकधीविशिष्टानां बुद्धिस्ताहमेवास्मि तथा
तेजस्विनामिंद्रियपाटववतां तेजश्चाहमेवास्मि १० ॥

मधुभाष्य

१० ॥

भाषाअनुवाद

और हे पार्थ स्थावर जंगम जो कछु भूतमात्र है उस का सना तन
कहे उत्तरोत्तर समस्त कार्यो मे अनुगत कहे प्राप्त अनाशी बीज
रूप हमे जानो अर्थात् समान जातीय कार्य उत्पादन सामर्थ्य
रूप जो कारण सो भी मेरी ही विभूति जानो परंतु सामान्य बी
ज जैसी अंकुर होने पर नष्ट होते है तैसे मेरा विभूति रूप बी
न नाश नहीं होता इसीसे सनातन है और बुद्धि मानो की बुद्धि
कहे विवेक शक्ति मेंही हो और तेजस्वियों मे तेज कहे प्रगल्भ
ता प्रताप रूप भी मही हूं यह जानो १० ॥

दोहा

भूत सभी को बीज मोहि पार्थ सनातन जान प्रज्ञावंतमें बुद्धिहों
तेज तेजस्विमे मान १०॥

52

वलंवलवतांचाहंकामरागविवर्जितं धर्मावि
रुद्धोभूतेषुकामोऽस्मिभरतर्षभ ११ ॥

शांकरभाष्यं

वलमिति वलंसामर्थ्यमोजो वलवतामहं तच्चवलं कामरागवि
वर्जितं कामश्चरागश्च कामरागौ कामस्तृष्णा असंनिकृष्टेषु वि
षयेषुरागोरंजना प्राप्तेषुविषयेषुताभ्यांकामरागाभ्यां विवर्जितं
देहादिधारणमात्रार्थं वलंसत्वमहमस्मि नतद्यत् संसारिणां त
ष्णारागकारणं किंचधर्माविरुद्धो धर्मेणशास्त्रार्थेन अविरुद्धोयः
प्राणिषु भूतेषुकामोयथा देहधारणमात्राद्यर्थोऽशनपानादिवि
षयः कामोऽस्मि हेभरतर्षभ ११ ॥

आनन्दज्ञानटीका

यच्चवलवतां वलंतद्भूते मयित्वेषांप्रोतत्वमित्याह वलमिति का
मक्रोधादिपूर्वकस्यापि वलस्यानुमतिं वारयतितच्चेति कामरा
गयोरेकार्थत्वमाशंक्यार्थभेदमावेदयति कामस्तृष्णेत्यादिना
विशेषणसामर्थ्यसिद्धं व्यावर्त्यं दर्शयति नत्विति शास्त्रार्थावि
रुद्धकामभूते मयि तथाविधकामतां भूतानां प्रोतत्वं विवक्षित्वा
ह किंचेति धर्माविरुद्धं काममुदाहरति यथेति ११ ॥

स्वामिकृतटीका

किंच वलमिति कामोऽप्राप्तेवस्तुन्यभिलाषो राजसः रागः पुनरभिलषितेऽर्थे प्राप्तेऽपिपुनरपि
केऽर्थे चित्तरंजनात्मकस्तृष्णापरपर्यायस्तामसः ताभ्यांविवर्जितंवलव
तांवलमहमस्मि सात्विकंस्वधर्मानुष्ठानसामर्थ्यमह मित्याह मित्यर्थः
स्वधर्मेणाविरुद्धःस्वदारेषुपुत्रोत्पत्तिमात्रोपयोगीकामोऽहं ११ ॥

॥ पैशाचभाष्यटीका

वलंवलवतामिति कामरागविवर्जितं कामश्चरागश्चताभ्यांविव
र्जितं कामोऽहपणमानेषु तृष्णासमृध्यमानेषुरागइतिविशेषः धर्मावि
रुद्धोभूतेषुप्राणिषुकामोऽस्मिभरतर्षभ ११ ॥

गी॰ टी॰ त॰

53

रामानुजभाष्यटीका

५४

एते सर्वे विलक्षणा भावा मत्त एवोत्पन्नाः मच्छेषभूता मच्छरीरतया मय्येवाव
स्थिताः अतस्तत्प्रकारोऽहमेवावस्थितः किंविशिष्योतेभिधीयते ॥

अभिनवगुप्तकृतटीका [illegible] ॥

परमार्थप्रपाटीका

किंच बलवतां कामरागविवर्जितं बलमहमस्मि तत्र कामः प्राप्तेव
स्तुनि अभिलाषो रागस्तु रागः पुनरभिलषितेर्थे प्राप्ते अभिरंजनात्म
कस्तस्यापरपर्यायस्तामसानाभ्यां वर्जितं यद्बलवतां पुरुषार्थ
वतां वीराणां बलं शौर्यं कामेषु विजयेषु गुणाः प्रीतिस्तद्विवर्जितं निः
संगत्वेन स्वधर्माचरणरूपमित्यर्थः भूतेषु धर्माविरुद्धाः स्वदारेषु
पुत्रोत्पत्तिमात्रोपयोगी कामो मदनरूपेणास्मि ॥ ॥

वनमालीटीका

कामादिविवर्जितं बलं धर्माविरुद्ध अतत्कालिकः प्रजार्थकामश्चा
हं यद्वा रसयति रसं प्रेरयति रसनाति चेत्यादे रस इत्युच्यते प्रातिपदि
कसंज्ञायामन्यप्रत्यये सति णिचो लोपेन रस इति भवति एवं प्रभासयता
त्प्रभाप्रेरकत्वाद्वेति प्रभा घ्राणोति स्तौति स्तवकं प्रेरयति स्वयं व
क्ति णाहं प्रेरयति चेति प्रणवः शाह्व श्रा पुण्यगंधं करोति तदा च पुरु
ति पुण्यो गंधः तेजयति तेजः प्रेरयति वा तेजः जीवनं करोति प्रेर
यति वा जीवनं तनपति तपः प्रेरयति चेति तपः बीजं करोति तदा च प्रे
प्रेरयति वा बीजं स्वयं बुद्धत्वाद्बुद्धिप्रेरकत्वाच्च बुद्धिः भोगनिरपेक्ष
ज॰५ बलयुणां कामविवर्जितं बलं अप्राप्ते अप्रयुज्यमानत्वाद्रागवर्जि
तं बलं रागिणोऽप्राप्ते बलं प्रयुक्ते रेवं समन्वयार्थो योज्ञरीत्या स्वक
ल वैदिकशास्त्रवाच्यो भगवांस्तथात्मनः मणाकस्वत्कतिपयशास्त्रवा
च्यत्वेन चिंत्य इति भावः ॥ ॥

जसमंवेजयंतीटीका

किंच बलमिति बलवतां बलिष्ठानां पुरुषाणां यद्बलं सामर्थ्यमोज

सामर्थ्यमोजस्तदहमस्मि कीदृशं कामरागविवर्जितं प्राप्तेषु विषयेषु
त्सक्तिरूपः कामः प्राप्तेषु विषयेषु पुनस्तत्तोऽधिकप्राप्त्यभिलाषो रंजन
रूपो रागः कामश्च रागश्च कामरागौ ताभ्यां विवर्जितं विषयाणां राजसता
मसरूपाभ्यां कामरागाभ्यां वर्जितं केवलं देहेंद्रियादिधारणमात्रार्थं
कं सात्विकरूपं बलमहमस्मि न तु संसारिणां तस्माद्रागकारणं न
दित्यर्थः किंच हे भरतर्षभ भरतश्रेष्ठ त्वमनेन त्वयापि त्रैलोक्यविजयसा
मर्थ्यमस्ति तदप्यहमेवास्मि अतो भारत विजये संसारविजये च त्वं संदे
हं मा कुरु सर्वमहमेव त्वां कारयिष्यामीति सूचितम् भूतेषु प्राणिमा
त्रेषु यः कामः धनपुत्रकलत्रादिविषयाभिलाषः सोऽप्यहमेवास्मि की
दृशः स धर्मविरुद्धः धर्मशास्त्रेनात्र प्रतिपाद्यप्रतिपादकयोरभेदविव
क्षया तत्प्रतिपादकं शास्त्रमुच्यते धर्मोद्धर्णाश्रमादिधर्मप्रतिपादक
शास्त्रदविरुद्धः अप्रतिकूलः यद्वा धर्मात् सद्धर्मात् अविरुद्धः अप्र
तिकूलः सद्धर्मकामस्य सात्विकत्वेन संसारनिवर्तकत्वात् मोक्षहे
तुत्वम् अन्यधर्मकानां तु राजसतामसत्वेन संसारप्रापकत्वाद्बंधन
हेतुत्वमतः सर्वेभ्यो मदितरदेवोपासनादिरूपधर्मकामेभ्यो मद्धर्मका
मपवश्रेष्ठतरः सन्ममैव विभूतिरूपः स्यादित्यभिप्रायः ११ ॥

मधुसूदनीटीका

अप्राप्तो विषयः प्राप्तिकारणाभावेऽपि प्राप्यतामित्याकारः चित्तवृत्ति
विशेषः कामः प्राप्तो विषयः क्षयकारणे सत्यपि न क्षीयतामित्येवमा
कारः चित्तवृत्तिविशेषः रंजनात्मा रागः ताभ्यां विशेषेण वर्जितं सर्व
था तद्कारणं रजस्तमोविरहितं यत्स्वधर्मानुष्ठानाय देहेंद्रियादि
धारणसामर्थ्यं सात्विकं बलं बलवतां नाहं यस्तात्विकबलयुक्तानां सं
सारपराङ्मुखानां तदहमस्मि न तु रूपं मयि सर्वे बलवंतः प्रोता इत्यर्थः
५ कामरागविवर्जितमेव बलं मद्रूपत्वेन ध्येयं न तु संसारिणां कामराग
कारणं बलमित्यर्थः चशब्दस्तु पाठार्थो भिन्नक्रमः क्रोधाद्यर्थो वार
गणार्थो व्याख्येयः धर्मो धर्मशास्त्रेण नाविरुद्धो प्रतिषिद्धो धर्मानुकू
लो वा यो भूतेषु प्राणिषु कामः शास्त्रानुमतजायापुत्रवित्तादिविष
याभिलाषः सोऽहमस्मि हे भरतर्षभ एतच्चाविरुद्धकामभूते मयि तथा

गी॰
टी॰
स॰

54

विषकामयुक्तानांभूतानांयोनत्वमित्यर्थः ॥ [illegible] ॥

सदानंदीटीका

ग्रामिसामर्थ्यभावेपिप्राप्यत्वाभिनिवांछनं अप्राप्तविषयेकामोरागः
प्राप्तेत्रिरंजना १ नदीयनामी नैकास्यात्तत्वपिद्वयकारणो नाभ्याविव
र्जिनस्वीयधर्मानुष्ठानसिद्धये २ वलेदेहेंद्रियादीनांसामर्थ्यंयद्वथा
रणो नद्रूपेमयितंयोनावलवंनःशरीरिणः ३ धर्मशास्त्रे विरुद्धोयः
कामःप्राणिषुधर्मकत्व शरीरयात्रासिद्ध्यर्थेकामोवाभोजनादिषु ४
सोहंतस्मिन्मयियोनाःकामिनोधर्मतत्पराः ॥ ॥

नीलकंठीटीका

वलरूपेमयिबलवंनःयोनाः कामरागविवर्जितं कामस्तृष्णा रागः
रंजना नौहिप्राविषयकौ अतोनिरवद्यस्यवलंनद्वर्जितं यवंधर्माविरुद्धकामरूपेमयिईश्वराःकामवंनःयोनाः ॥ ॥

आनंदीटीका

वलंनत्वज्ञारणसामर्थ्यंकामेणविषयाभिलाषेण रागेणतेत्रेवासक्त्या
चविवर्जितं नथैवभूतेषुप्राणिषुधर्मेणधर्मशास्त्रेणाविरुद्धोदेशकाले
कालेपेक्षयानिषद्धःकामः कंदर्पोस्मि अथच कामशब्देनसंकल्प
विकल्पात्मकंमनः बुद्धिसाद्वादिवांतःकरणमपिरूपमित्यहंकारइत्यनदं
नःकरणत्रयमहमेवास्मीत्यर्थः अपिचात्रोक्तमाजगत्स्थितिहेतवः
परमेश्वरैक्यात्मायेक्षयापरमेश्वरात्मस्तावर्णिताः विभूत्याध्याये
कारणत्वाकारणत्वानपेक्षयासामान्यतउक्तःष्टानिमत्वानिदर्षणे
इतितात्पर्यं ॥ ॥

रामकंठीटीका

तथासर्वक्रियासतपोमयीक्रियाप्रधानंतनत्तपस्विषुवर्तमानंतपो
ऽहमेव कामरागविवर्जितंबलंबलवतांप्रधानंतदपिसर्वोक्तत्वाय।
नाःऽहमेव तथानेजस्विनांप्रभावातिशययुक्तानांतेजःप्रभावोस्म्य
त्वमेतदप्यहमेव एवमनेनक्रमेणसर्वभूतानांबीजंहेतुरहमेव
ति तदुक्तेनतभेदेनद्विधाप्रकृतिर्ममैवस्वभावः इत्यनेनप्रकारेण

विग्रहरूपसमन्वयैः पदैः प्रतिपादितमेवं सोहमित्यादिप्राधान्य
विवक्षयोपलक्षणमात्रत्वेन प्रतिपादितं परमार्थस्तु एवं ज्ञात्वा
येन तत्पदार्थज्ञाने किंचन न संभवति [illegible]
[illegible] ११ ॥

नासिकी टीका

नचैवं त्वमत्तवद्विग्रहाणांसौ वाह्रूवत्वं चापि चैवं धर्मलाभस्यापीत्या
म ॥ बुद्धिमतां मत्वेनैव वीर्यशालिनं बुद्धिबलिनामहमेव न
यावेबलिनां च महं धर्माणां बलिनां भूमिकारूपज्ञानायवेज
दवेनाप्यसमभावबलादेवाशीलितमाद्विविकल्पाविभास
वेत्सवद्वे बलवतां मत्रेश्वराणां ईश्वरभूमिकारूपज्ञानायद्वलंप्र
तिविकल्पतयाभाववर्गपरामर्शात्तदहं कीदृशं कामराग
विवर्जितं कामोभिलाषो रागश्चासक्तिस्ताभ्यां विशेषेण निरव
शेषतया वर्जितं तदुक्तं कस्यास्तीत्र ज्ञानं प्रशान्तं नवबोधवृत्ति
वैश्वर्यं स्वधर्मप्रसरापरेषां प्रकाशनं प्रत्यपियोगरूपाणां क्रिवे
हिः स्थैर्यवतीवलेसा उत्पन्नबाह्यप्रसरा तद्वीर्यं तेजस्त्ववाह्यान
वभासयंती शेषितमेकैवतत्वलशक्तिर्वीर्यावमर्पणात्मभवेदवि
घेति तथाभूतेषु कामस्कासंविन्मात्ररूपायस्यां घटपटादिभि
र्धर्मरूपैर्नास्तिविरोधः सोहं इच्छाहमेवं भगवच्छक्तितयानुया
यिनी न च विच्छित्तिरूपानैः धर्मैस्त्यागं तकैर्घटपटादिभिर्भिद्यते
इति तदुपासकतयाशुद्धसंवित्स्वभावत्वज्ञानिनः उक्तं च श्रि
वोपनिषदि इच्छायामथवाज्ञाने जाते चित्तं निवेशयेदिति
ज्ञाने एव न तत्प्रसक्तेरित्यर्थः एवंव्याख्यानं तत्कायेपरस्पराव
पद्मातकं त्रिवर्गसेवनेत्याशयेन व्याचक्षते ते संप्रदायक्रम
मजानाना भगवद्रहस्यं च व्याचक्षाणा मनस्कार्यापव ११ ॥

पंचोलीटीका

किंच बलमिति हे भरतर्षभ भगवन्तः बलवतां तेजस्विनां का
मरागविवर्जितं बलं ऊर्जस्सामर्थ्यमहं भूतेषु धर्माविरुद्धोयः
कामः स्वदारेषु पुत्रोत्पत्तिमात्रोपयोगी कामोहं ११

गीं टीं सं

55

भावदीपिकाटी

बलंबलतां मेत्रेश्वराणामीश्वरश्रीकामरूपकार्यानुरस्तत्वान्मयि वीज
भूतेत्वमिश्रितत्वयाप्राकृतत्वेनभासमानसायिभाव दर्शितवत
यीनैवमतेत्याह ॥

रगावीरसमिश्रबोधिनी

तथा बलवतां यावीरस्य सामर्थ्यवतामहमेव बलमस्मि तच्चब
लं रागादिव पुत्रमित्रादिविषये प्रतिहतं सदधर्मायैव क
ल्पते इति तत्वं निषेधयति कामरागविवर्जितमिति काम्यंते इ
ति कामाः पुत्रमित्रादयस्तेषु विषये यो रागः प्रवृत्तिनिरोधकत्वे
नाधर्मजनकस्तेन वर्जितमित्यर्थः ननु यदि रागोधर्मजनक
स्तत्कृतं स्वर्गाद्यैषणया प्रयुक्तेन युद्धेनापीत्यत आह धर्माविरु
द्ध इति भूतेषु सर्वेषु पुत्रमित्रसपत्न्यादिषु विषये समदर्शित्वा
ततायित्वे समानमेव वध्यतायां प्रयोजकं विचारयतस्तु त्रिवि
प्रवरेषु विषयेदं धर्माविरुद्धः शास्त्रविहितत्वेन धर्मानुसारे
कामः शास्त्रानुयायि अभिलाषो हमेवास्मि येन देहनातिशोरेपि
पितृपुत्रादिषु वधकामस्तादृशासंकल्पात्मकः शास्त्रनिषिद्ध
त्वेनाधर्मजनकएवेति तस्य धर्मविरुद्धत्वमिति ११॥

मधुभाष्य

११॥

भाषाअनुवाद

और काम राग विवर्जित अर्थात् काम कहे अप्राप्त विषय मे अभिलाष स्वरूप जो रजोगुण का कार्य इच्छा और राग कहे अ मिलषित अर्थ पायके उस से भी अधिक के अर्थ जो चित्तका अनुराग कहे तमो गुण का कार्य लक्ष रूप इच्छा है इन दो नो को छोडि और यावत बल वानो का बल भी मैहों अ र्थात् सात्विक स्वधर्म्मानुष्ठान की सामर्थ्य मैहूं और हे भ रतर्षभ भरत वंशमे श्रेष्ठ अर्जुन धर्म अविरुद्ध अर्थात् स्वभा र्यामे पुत्र मात्र उत्पत्ति के अर्थ उपयोगी जो काम हो भो ग सो भी मैही धर्म अविरुद्ध कहने से वध आदि कामका निषेध आया ११ ॥

दोहा

मैहों बलबलवानमे कामरागबिन सोय धर्मअविरोधिभरत वर कामभूत मैहोय ११॥

56

येचैवसात्विकाभावाराजसास्तामसाश्चये मत्तएवेति
तान्विद्धिनत्वहंतेषुतेमयि १२ ॥

शंकरभाष्यं

किंचयेचैवेति येचैवसात्विकाःसत्वनिर्वृत्ताःभावाःपदार्थाराजसाः
रजोनिर्वृत्तास्तामसास्तमोनिर्वृत्ताश्चये केचित् प्राणिनांस्वकर्म
वशात् जायन्तेभावास्तान् मत्तएवजायमानानित्येवं विद्धिसर्वा
न् समस्तानेव यद्यपितेमत्तोजायंते तथापिनत्वहं तेषु तदधीनः
तद्वशोयथा संसारिणस्ते पुनर्मयि मद्वशामदधीनाः १२ ॥

आनन्दगिरिकृतटीका

चिदानन्दयोरभिव्यंजकानां भावानां ईश्वरात्मत्वाभिधानादन्येषा
मनदात्मत्वप्राप्तावुक्तं किंचेति प्राणिनां त्रैविध्यहेतुं दर्शयन् वा
क्यार्थमाह येकेचिदिति नहिपितुरिव पुत्राधीनत्वं ततोजाय
मानानां तदधीनत्वं तवापि स्यादिति विक्रियावत्वदुःखत्वप्रसक्ति
रित्याशंक्याह यद्यपीति ममपरमार्थत्वात्तेषां कल्पितत्वात्तद्गु
णदोषौ मयिस्यातामित्यर्थः तेषामपि तद्वदेव स्वतन्त्रतासंभवा
त् किमिति कल्पितत्वमित्याशंक्याह तेषुतरिति त्रिविधानां भा
वानां नस्वातंत्र्यमीश्वरकार्यत्वेन तदधीनत्वात्तथा चकल्पितस्याधि
ष्ठानसत्ताप्रतीतिभ्यामेव सत्वात्तन्मात्रत्वसिद्धिरित्यर्थः १२ ॥

स्वामिकृतटीका

किंच येचान्येपिसात्विकाभावाःशमदमादयःराजसाश्चहर्षदर्पाद
यः तामसाश्चयेशोकमोहादयः प्राणिनांस्वकर्मवशाज्जायंतेतान् त्रय
सर्वान्मत्तएवजातान्विद्धि मदीयप्रकृतिगुणकार्यत्वात् एवमपितेते
ष्वहंनवर्तेजीववत्तदधीनोहंनभवामीत्यर्थः तेतुमयिमदधीनाःसं
तोमयिवर्तंतइत्यर्थः [illegible]
[illegible] १२ ॥

पिशाचभाष्यटीका

येचैवसात्विकाःसत्वगुणनिर्वृत्ताःभावाःप्राणिनांराजसाःरजोगुणनिर्वृ

त्ता

ते मत्तो जायंते तथापि

गी॰ टी॰ स॰

57

त्रामसास्तमोगुणनिर्वृत्ता अप्येते मत्त एवेश्वराज्जातानान्विद्धि यद्यप्यहं न त्व
हं तेषु तद्वशो हं न भवामि ते मयि मद्वशा इत्यर्थः ॥ १२ ॥

रामानुजभाष्यटीका

ये इति सात्विका राजसास्तामसाश्च जगति देहत्वेनेंद्रियत्वेन भोग्य
त्वेन तद्धेतुत्वेन चावस्थिता ये भावास्तान्सर्वान्मत्त एवोत्पन्नान्विद्धि
ते मच्छरीरतया मयि स्थिता इति च न त्वहं तेषु नाहं कदाचिदपि तदा
यत्तस्थितिः अन्यत्रात्मायत्तस्थितित्वेपि शरीरस्य शरीरिणात्मनि स्थित्या
पि उपकारो विद्यते मम तैर्न कश्चित्तथाविध उपकारः केवलं लीलैव प्र
योजनमित्यर्थः ॥ १२ ॥ अभिनवगुप्तकृतटीकाव्याख्यातं १२

परमार्थप्रपाटीका

किंच ये चान्ये सात्विका भावाः शमदमादयः राजसा हर्षदर्पादयस्ताम
साः शोकमोहादयः प्राणिनां स्वकर्मवशाज्जायंते तान्सर्वान्मत्त एव
जातान्विद्धि मदीयप्रकृतिगुणकार्यत्वात् अथापि न तेषु तेषु प
दार्थेषु कारणात्मना तन्नरूपेण वर्तमानोपि असंगत्वेन तिष्ठामीत्या
ह न त्वहमिति तेषु पदार्थेषु नाहं तद्धर्मान्स्पृशामि अथवा तेषु भा
तिभासकत्वान्मयि न संति शुक्तिकायां रजतमिव ॥ १२ ॥

वनमालीटीका

न केवलं रसादीनां धर्मिणां व्यापकत्वेन प्रेरकत्वेन च तत्तत्पदवाच्यो
हमपि तु पृथिव्यादिधर्मिव्यापकत्वादिना तत्तत्पदवाच्योहमित्याह
ये इति सात्विका मनइंद्रियाधिष्ठातृदेवादयः सात्विकोहंकारश्च त
द्वत् राजसानींद्रियाणि अहंकारस्तद्वत् तामसा भूतमात्रादयः च शब्दा
त्प्रकृतिमहत्तत्वे सर्वे भावाः पदार्थाः मत्त एव तान्विद्धि तेषां मत्तः उत्पत्तिस्थि
तिलयमत्राधिकं मदधीनान्विद्धीत्यर्थः ननु भूधरयोरिवान्योन्याधीनत्वम
पि तदधीनः स्यात् नेत्याह न त्विति न मय्याधेयत्वेन स्थिताः न त्वहं तेष्वाधे
यत्वेन तिष्ठामि मणिषु सूत्रमिव तन्मते व हारपवनतनुदाधेयः भूतास
न विभ्रियमाणो बिभर्ति एको देवो वजूर्थानिविष्टः तदाश्रितं न गगनासौ गुह्य त्सर्वं
विधाश्रितं दृश्यादिश्रुतेः इतरनिरपेक्षः सर्वजगज्जन्यादिकर्तासर्वाधारः सर्वप्रेर
कः सर्वव्यापक उदासीनो भक्तवत्सलः सर्वदा ह्यभिप्रायोज्जायमानो वस्तुदेवस्तु
न रज्जुनेत्युच्योहमिति भावः ॥ १२ ॥

ति

नन्वेते सर्वे भावाः प्रकृतिगुणोद्भूताः सन्तो नेषां त्वद्विभूतित्वं कथमुपपद्यते [illegible] यो यस्माज्जातः स तस्यैव विभूतिः स्यादिति नियमादिति चेत्तत्रा ह येचैवेति ये एव च सात्त्विकाः सत्त्वगुणोत्पन्ना मनोबुद्ध्यादिरूपाः श मदमादिरूपाश्च ये चैव राजसा रजोगुणोत्पन्ना इंद्रियादिरूपाः हर्ष दर्पादिरूपाश्च ये चैव तामसास्तमोगुणोत्पन्ना देहाद्याकाराः शोकमो हाद्याकाराश्च भावाः पदार्थाः प्राणिकर्मादिवशाज्जायन्ते तान्सर्वा न्मदर्थान्मत्त एव परमेश्वरादेव जायमानान्विद्धि त्वं जानीहि नन्व यद्येवं तर्हि त्वं किं विकारेण तद्वशश्चासीति तत्राह नत्विति नत्वहं तेषु यथा रागीति श्चयेवानेषु भावेषु तदधीनस्तत्तद्विकारयुक्तश्च भूत्वा संसा रीवाहं सन्नत्र सर्वेश्वरो नैव निष्ठामिश्रस्वतन्त्रसनाकत्वान्निर्विका रत्वान्निर्लेपत्वाच्च कर्मक्लेशविपाकाशयैरस्पृष्टस्याविलक्षणानुरि तिवचनात् मयि पुनरेतेन भाववर्तन्ते नेषां मदधीनस्थितिप्र वृत्तिकत्वादित्यर्थः ॥१२॥

मधुसूदनीटीका

किमेवं परिगणनेन॥

ये चान्येऽपि भावाः चित्तपरिणामाः सात्त्विकाः शमदमादयः ये च राजसा हर्षदर्पादयः ये च तामसाश्च शोकमोहादयः प्राणिनां विपाककर्मा दिवशाज्जायंते तान्मत्त एव जायमानानिति अहं कृत्स्नस्य जगतः प्रभव इत्युक्तप्रकारेण विद्धि समस्तानेव अथवा सात्त्विका राजसास्ता मसाश्च भावाः सर्वेऽपि न उद्वर्गाद्याख्येयाविशेषवहेतुत्वाभावात् एवका रश्च समस्तावधारणार्थः एवमपि न त्वहं तेषु मत्तो जातेष्वपि न तद्वशस्त द्विकारदूषितो रज्जुरिव कल्पितसर्पविकारदूषितोऽहं न भवामि सं सारीव ते तु भावा मयि रज्ज्वामिव सर्पादयः कल्पिता मदधीनसत्तास्फू र्तिका मदधीना इत्यर्थः ॥१२॥ [illegible] बुद्ध
[illegible] कस्य संसारित्वमेवं विपरीत [illegible]
[illegible] ॥

सदानंदीटीका

भावाश्चित्तपरीणामाः सात्त्विकाः शमादयाः राजसा हर्षदर्पाद्यास्तामो हाद्यास्तामसाश्च ये १ विपाककर्मादिवशान्तोनायनेदेहिनां हितान् मत्तः सर्वेश्वरात्सर्वा जायमानान्वेहि भोः २ नत्वहं तेषु भावेषु म

गी॰ टी॰ स॰
58
व॰

ज्ञानतेपिसर्वतः नाहमस्मिनदायज्ञोमदायज्ञाभवंतिते ३ मन्त्रः एषपद्र
नेतंतिनेभ्योभिन्नोस्म्यहंसदा रज्ञोसपादयोयद्दकाल्पिनेथपिनङ्गमेः
ज्ञोनास्मिमनागलेपोनयाममनतङ्गमेः ५ ॥ १२

नीलकंठटीका

सात्विकाः धर्मज्ञानवैराग्यैश्वर्यादयः राजसाः लोभप्रवृत्त्यादयः ताम
साः निद्रालस्यादयः नात्सर्वात्मतएवरसतन्मात्रादिरूपाः तत्रात्म
नोनिर्गताइतिविद्धि नन्वेवंतवसर्वजगदात्मनोविकारित्वापत्त्या
कौटस्थ्यहानिरित्याशंक्याह नत्वहंतेषुतेमयीति येषवादयः
प्रोतास्तेषुसूत्रावयवभूतेषुरसादिषुअन्तनतदूपेषवाधितामचि
न्मात्ररूपोघटणावोदंचनादाविस्तनास्ति अन्तनस्यास्यसत्तास्फु
रणेयवस्वकीयेप्रयच्छामिनत्वन्तनात्माभवामीत्यर्थः नेतमध्यवा
ध्यस्तामदनत्याः यथारज्ज्वामध्यस्ताः सर्पादयोरज्जुवनत्याः नद
नन्यत्वमारंभणशब्दादिभ्यइतिन्यायात् अनन्यत्वंव्यतिरेकेणाभा
वः नावल्वनन्यत्वमितिभेदभ्रमः किंतुभेदनिषेधमात्रः श्रुतः आ
रंभणशब्दात् वाचारंभणंविकारोनामधेयमितिविकारस्यवागा
लंबणत्वेनस्वममायेंद्रजालिकविषयसाम्यश्रुतेः नह्यात्मनोवि
चित्रप्रपंचात्मत्वेनमयीत्यंशाविरोधोपिनत्वहंतेष्वित्यंशेनविरोध
परिहारोयुज्यते कार्यस्यकारणात्मकत्वावश्यंभवात् नस्माद्विव
र्तवादाश्रयेणैवब्रह्मणोनतज्जपादानत्वकूटस्थत्वेनिर्वहतइति
साधूक्तंनत्वहंतेषुतेमयीति १२ ॥

आनंदीटीका

उक्तैर्थनउपसंहरति ॥ नदेवंप्रोक्तक्रमेणपरमेश्वरात्संभूताः प्रकृतिवि
कृतिरूपाः सात्विकादयोभावाः परीक्षापर्वणिवक्ष्यमाणाः येभावाः
सर्वेस्मिन्वर्तनते अहंकृत्स्नस्यजगतः प्रभवः प्रलयस्तथेतीदृशात्ता
त्सर्वात्मत्वावात्देवादेवजाता इतिविद्धितेषुतदहंपरमेश्वरस्तेषु
भावेषुनास्मि स्वतंत्रत्वादहंतदधीनप्रवृत्तिर्नास्मीत्यर्थः तेमयिम
दाश्रितामदधीनप्रवृत्तयएवते एषचभावाभवंतीतिव्युत्पत्यासा
त्विकादेवादयो राजसामनुष्यादयः तामसाः सरीसृपासुरादयः

इतिसर्वोजीववर्गोमत्तएवसंभूतः तस्मात्तनीहंतेष्वाश्रितोस्मितेमयि तेनत्प्रलयेमय्येवलीयंते तथायोगाभ्यासात्सत्वशुद्धिक्रमेणमत्सा युज्यंचयांतीत्यर्थः अत्रायंवाक्यार्थः यथाघटशरावादयः परम कारणान्मृदःसंभूताअथस्तास्मदेवभवंति वर्तमानानांचतेषांभि न्नाकाराणांभिन्नवर्णानांमृण्मयमृण्णलिमाता संबधितथाकाश देसंबंधः परमकारणभूतायांमृत्तिकायांनास्ति तथासर्वेषांपरम कारणस्यापीश्वरस्यजीववर्गसंबधिकर्मफलादिसंबंधोनास्तीति ११ ॥

यत्राहमितिप्रतिपादयितुमाह॥ रामकंठीटीका

अथयंतेभावप्रपंचेप्रकृतिपरिणामरूपत्वात्सर्वभावस्य त्रैगुण्यस्थि तेकेचित्सत्वप्रधानागुणीभूतरजस्तमस्काःकेचिदेवमेवराजसःप्रधा नाः केचित्तमःप्रधानाइतितारतम्यभेदानंत्यमनपेक्ष्यत्रिविधत संगृहीतः इतियेकेचनसर्वेभावाह्रियात्संभवंतितान्सर्वान्कृत्वा योनमत्तएवमत्कार्यत्वात्मद्रूपाज्ञानाज्जानीहि किंतुतेषुमत्कार्यते यद्रूपतयालब्धात्मकेषुभावेषुमत्तस्तेनाहंभवामि नतत्सत्ताधी नसद्भाववानामसत्स्वभावसिद्धनित्योपलब्धिमात्रधर्मकस्यविद्यते तेनतथारूपामयिसंतिभवंति उक्तोपपत्त्यामत्सत्ताधीनसद्भावा भावाःसर्वेएवेत्यर्थः [illegible]

८ [illegible]

[illegible]

[illegible] ११ ॥

लास्यकी [illegible]तीटीका

एवंसर्वान्सतत्त्वान्मयिबीजभूतेसत्यपिस्फुटतयाप्राकृतत्वेन भासमानस्यापिभाववर्गस्यमदधीनैवसत्तेत्याह ॥ येचैवान्येसा त्विकाभावाराजसभावाश्चयादयःस्वभावावा घामदमादयः राज साभावा वाह्यादयोहर्षदर्पादयश्च तामसाभृम्यादयः शोकमोहादय श्च तान्सर्वान्मत्तएवजातानीतिविद्धि मदीयप्रकृतिगुणकार्यत्वात् एवमपितेष्वहंनवर्ते जीववत्तदधीनोनभवामि तेतुमदायत्तस्थि तितयामदधीनाःसंतः मय्यपारेवर्तंतेसत्तांलभंते तदुक्तंस्यादे

गी॰ टी॰ स॰

59

गुणादिस्पंदनैः छिदाः सामान्यस्पंदसंश्रयात् लब्धात्मलाभाः सततं
स्वर्गास्था परिपंथिनः अप्रबुद्धधियस्तेन त्वयि निष्परागतो यतः
पातयंति च हन्तारे घोरे संसारवर्त्मनि अतएव भगवन्मयः सर्वं भ
गवद्भावेन संवेदयते न तु नानाविधपदार्थविज्ञाननिष्ठो भगव
त्तत्वं प्रतिपद्यते इति सकलमानसावर्जकपद्यक्रमः अनेनैवाश
येन वक्ष्यति वासुदेवः सर्वमिति ज्ञानेन यो वा अज्जन्मोपभोगार्ज
ितकर्मसमतासमनन्तरसमुत्पन्नपरमाक्षिपातानुगृहीतांतः
करणो सौ प्रतिपद्यते भगवत्तत्वं सर्वं वासुदेव इति बुद्ध्या स महा
त्मा सुदुर्लभ इति ॥ १२ ॥

पंचोलीटीका

किंच ये चेति च। ये अन्येपि सात्विका भावाः सत्वनिष्पन्नाः श
मदमादयः यथा राजसा रजो निष्पन्नाः हर्षदर्पादयः तथा ता
मसास्तमोगुणनिष्पन्नाः शोकमोहादयः तान्मत्त एव विद्धि ता
ध्याप्यहं न तेषु वर्ते न तदधीनस्ते तु मयि मदधीनाः १२

तत्वदीपिकाटी

ये चैव चान्ये सात्विका भावा जडभावा अभ्यादयः स्वभावा वा शमद
मादयः राजसा भावा वा घादयो हर्षदर्पादयश्च तामसाश्च अमादयः
शोकमोहादयश्च तान् सर्वान् मत्त एव जातानिति विद्धि मदीयप्रकृ
तिगुणकार्यत्वात् एवमपि तेष्वहं न वर्ते जीववत्तदधीनो न भवामि
किंतु मदावर्त्स्फूर्तितया मदधीनाः स्तेते मय्याधारे वर्तंते सतां लभ
ते गडकेश्वरे गुणादिस्पंदनैः छिदाः सामान्यस्पंदसंश्रयात् ल
ब्धात्मलाभाः सततं स्वर्गास्था परिपंथिनः अप्रबुद्धधियस्तेन त्व
यि निष्परागतो यतः पातयंति च हन्तारे घोरे संसारवर्त्मनि इति अत
एव भगवन्मयः सर्वं भगवद्भावेन संवेदयते न तु नानाविधपदार्थ
विज्ञाननिष्ठो भगवत्तत्वं प्रतिपद्यते इति सकलमानसावर्जकपद्यक्र
मः अनेनैवाशयेन वक्ष्यते वासुदेवः सर्वमिति ज्ञानेन यो वा अज्जन्मो
पभोगार्जितकर्मसमतासमनन्तरसमुत्पन्नपरमाक्षिपातानुगृही
तान्तःकरणो सौ प्रतिपद्यते भगवत्तत्वं सर्वं वासुदेव इति बुद्ध्या स महा
त्मा सुदुर्लभ इति एवंभूतं त्वां परमेश्वरमयं जनः किमिति न जानाती
त्याह १२

किं बहुना सर्वमेव बुद्ध्यादिविषयकं मदुत्पादितमेवेत्याह ये चैवे॰
ति ये च भावाः भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मस्थितिको
पात् चेष्टाबुद्ध्यादिव्यापाराः सात्विकाः सत्वप्रधानाः सत्वेन धैर्ये
ण निर्वृत्ता वा तथा ये च राजसा रजःप्रधाना रजसा भजोवदावरके
ण कामेन निर्वृत्ता वा तथा ये च तामसास्तमः प्रधानास्तमसा॰
मोहेन निर्वृत्ताश्च भवंति हे अर्जुन तान्सर्वान्मत्त एव परमकार
णाज्जाताद्विद्धि जानीहीत्यर्थः मय्येवैते सर्वे बुद्ध्यापारविशेषा
त्मकास्थिविधाभावाबुद्धसमाधीभूताः स्रष्टा इति ननु भवतोपि वे
साधनापेक्षा कार्यसिद्धिस्तत्कीदृशं स्यात्तेष्वंत वेत्याशंक्याह न
त्विति न त्वहोवधारणे तेष्वित्यनेनान्वेति नच्छब्देन वभूम्यादयः
परामृश्यंते तथा चायमर्थः यद्यपि साध्यसिद्धिः साधनैरेव भ॰
वति तथापि तेषु साधनेषु सत्स्वेवाहं न प्रवृत्तो भवामीति शेषः
किंतु विनापि साधनं साध्यं साधयामीति भावः ते च भावाः साधन
रूपा मयि स्वतंत्र्ये कर्तरि सत्येव प्रवृत्ता भवंतीति शेषः मदंशानु
स्यूताः संतस्ते स्वकार्यं साधयितुं प्रभवंतीति भावः अस्मच्छब्दस्य
कर्तृमात्रोपलक्षकः तथा च यः कश्चिद्बुद्ध्यधिकारी स साधनेस
त्वेतदसत्वे वा प्रवर्तेत नियमेन साधयेत न चेत्स्यात्तदृयत्नवाहु
ल्येव विघ्नं प्रतियावेदितिभावः १२॥

मधुभाष्य

१२॥

60

भाषाअनुवाद

और जो सात्विक भाव अर्थात् शम दम आदि और राजस भाव
कहे हर्ष गर्व आदि औ तामस भाव जो शोक मोहादि ये सब
प्राणी मात्र को स्वकर्म वशते जैसेहै सो मेरे से उत्पन्न जानो
जिस हेतु वे मेरी माया की तीन गुणो के कार्य है किंतु
मै भी उन मे हम वर्तते नही अर्थात् जीव के समान इन गु
णों के अधीन होते नही वल ये गुण मेरी अधीन होय मेरे
मे रहते है सोई कहा कि वे मेरेमे है और मै उनमे नही
यह हो जैसी संसारी मेरी अधीनहै यह जानो १२ ॥

दोहा

सात्विक राजस तामस भावहिं मोसें होय जानहु तिनमें मो
हु नहि मोमे वर्तै सोय १२॥

61

त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् मोहितं नाभिजानाति मामेभ्यः परमव्ययं १३ ॥

शंकरभाष्यं

एवंभूतमपि परमेश्वरं नित्यशुद्धबुद्धमुक्तस्वभावं सर्वभूतात्मानं निर्गुणं संसारदोषबीजप्रदाहकारणं मां नाभिजानाति जगदित्यनुक्रोशं दर्शयति भगवान् तच्च किंनिमित्तं जगतोऽज्ञानमुच्यते त्रिभिरिति त्रिभिर्गुणमयैर्भावैर्गुणविकारैः रागद्वेषमोहादिप्रकारैर्भावैः पदार्थैरेभिर्यथोक्तैः सर्वमिदं प्राणिजातं जगत् मोहितमविवेकतामापादितं सत् नाभिजानाति मामेभ्यो यथोक्तेभ्यो गुणेभ्यः परं व्यतिरिक्तं विलक्षणं चाव्ययं व्ययरहितं जन्मादिसर्वभावविकारवर्जितमित्यर्थः १३ ॥

आनन्दगिरिकृतटीका

ननीश्वरस्य स्वात्मत्वे नित्यशुद्धत्वादौ चोक्ते जगतस्तदात्मकस्य संसारित्वमित्याशंक्य तदज्ञानादित्याह एवंभूतमपीति यद्यप्येवं विश्वस्यात्मत्वं कस्मात्त्वामात्मभूतं स्वयंप्रकाशं सर्वो जनस्तथा न जानातीति मत्वाशंकते तच्चेति श्लोकेनोत्तरमाह उच्यत इति एभ्यः परमिति प्रपंचकत्वमुच्यते अव्ययमिति सर्वविक्रियाराहित्यं १३

एवंभूतं त्वां परमेश्वरमयं ज(गुणमयैः) स्वामिकृतटीका नः किमिति न जानातीत्यत आह॥

त्रिभिस्त्रिविधैरेभिः पूर्वोक्तैः कामलोभादिभिर्गुणविकारैः भावैः स्वभावैर्मोहितमिदं जगत् अतो मां नाभिजानाति कथंभूतं एभ्यो भावेभ्यः परमेभिरसंस्पृष्टमेतेषां नियन्तारं अत एवाव्ययं निर्विकारमित्यर्थः १३

[illegible] ॥

पिशाचभाष्यटीका

त्रिभिर्गुणमयैः सत्त्वरजस्तमोमयैर्भावैः प्राणिभिरेभिः सर्वमिदं जगद्वर्तते ममसायया मोहितं नाभिजानाति मामेभ्यो गुणेभ्यो परं कारणत्वेनास्थितमव्ययं १३ ॥

रामानुजभाष्यं

तदिदंचेतनात्मकंकृत्स्नंजगन्मदीयंमत्तएवोत्पद्यते मयिप्रलीयते म
य्येवावस्थितंमच्छरीरभूतंमदात्मकंचेत्यहमेवकार्यावस्थायांचसर्वप्र
रीतयासर्वप्रकारोवस्थितः अतःकारणत्वेनशेषित्वेनचज्ञानाद्यसंख्ये
यकल्याणगुणाश्चाहमेवसर्वैःप्रकारैःपरतरो मत्तोन्यत्केनापिकल्या
णगुणेनपरतरंनविद्यते एवंभूतंमांतेभ्यःसात्त्विकराजसतामसेभ्यो
भावेभ्यः परंयदसाधारणैःकल्याणगुणैस्तद्विपरीतप्रकारैश्चपरउत्कृ
ष्टतमंमव्ययंसदैकरूपमपिनैरेवगुणमयैर्हीनतरैःक्षणविध्वंसिभिः
पूर्वकर्मानुगुणदेहेन्द्रियभोग्यत्वेनावस्थितैःपदार्थैःमोहितंदेवतिर्य
ङ्मनुष्यस्थावरात्मनावस्थितंत्रिजगदिदंनाभिजानाति १३ ॥

अभिनवगुप्तकृतटीका

एवंचत्वमेवोपधारय यदहंवासुदेवीभूतःसर्वस्यप्रभवःप्रलयश्च सू
त्रेमणिगणाइवयथातंतुरनवध्रियमाणरूपोप्यंतर्लीनतयास्थितए
वमहंसर्वत्रअवस्थितिसर्वत्राप्यमानेयोनाद्यन्तमध्यादिविभागःसा
मान्यःसोहं एवंप्रकारोमद्गतत्वंचैतन्यादिरहितः त्रिगुणाकारोयः
प्राहइतिसर्वस्यैवप्राहस्यनभोगुणत्वादत्रावधारणायः केवलगग
नगुणतयाश्रुतिः संयोगविभागादिसामान्यंतररहितोवाहितहृदये
व्रह्मगुहागहनगामीयोगिनांगणैःसंवेद्योनाहतनाख्यःसकलस्फूर्ति
ग्रामानुगामीतद्भगवतस्तत्त्वं पौरुषंयेनतेनसाधुहृषोहंमितिसर्व
भौमंप्रतिपद्यते योधरायाःकेवलधर्मतयागंधगुणःस्वस्वभावगुणः
सुरभ्यसुरभ्यादीनितुभूतांतरसंबंधात् उक्तंच हठंभूमिगुणाधिकाद्
गंधाम्रिगुणोदयादिति जडमस्युगुणोदार्यादित्यादि वीजेत्वहमा
दिकारणं कामरागविवर्जितंबलंसकलवस्तुधारणसमर्थमूर्जोरूपं
इच्छासंविन्मात्ररूपा यस्याश्चरूपादिभिर्धर्मरूपैर्नास्तिविरोधः इच्छा
°वि हिसर्वत्रभगवच्छक्तिनयान्यानीनकाचिद्धिरुध्यते धर्मस्त्वागंतुकैर्दे
हपटादिभिर्भिद्यतइतितदुपासकतयाशुद्धसंविस्वभावत्वज्ञानिनः
उक्तंचाशावोपनिषदि इच्छायामथवाज्ञानेज्ञातेविच्छेत्तिवेशयेदिति
ज्ञातएवतवाप्यप्रस्तनइत्यर्थः एवंव्याख्यातेऽन्यत्कार्यपरस्पराव्यपद्या

नकेत्रिवर्गसेवनेत्याशयेनव्याचष्टेनेनेसम्प्रदायक्रममजानानाभगवद्
हस्यंचव्याचक्षाणानमस्कार्याएव सत्वादीनिमन्मयानिनत्वहंतन्मयः
अतएवचभगवन्मयःसर्वभगवद्भावेनसंवेदयतेनतुनानाविधपदा
र्थवितानतिष्ठोभगवत्तत्वंप्रतिपद्यतइतिसकलमानसावर्जकपद्यक्र
मः अनेनैवचाशयेनवक्ष्यते वासुदेवःसर्वमितिसानेनयोवज्जन
न्मोपभोगजनितकर्मसमतासमनंतरसमुत्पन्नपरमाकृपातान्
गृहीतांतः करणोसौप्रतिपद्यतेभगवत्तत्वंसर्ववासुदेवइतिवुद्ध्यास
महात्मासचदुर्लभइति एवंहिवुध्यमानंप्रस्तुतसत्वादिभिर्गुणैर्मो
हितमिदंजगद्गुणातीतंवासुदेवतत्वंनोपलभते १३ कथंतर्हिसत्वा
दिमायामतिक्रम्यभगवत्तत्वमवगंतव्यमित्याह ॥

परमार्थप्रपाटीका

पृथ्येनदेवप्रकरणमुपन्यस्यन्नाह त्रिभिःइति ॥ एभिर्गुणैःसत्वरजस्तमोभिस्त्रिभि
र्भावैःप्रकृतैःस्वभावैः इदंसर्वंजगन्मोहितंभ्रान्तंसम्मायादिकं यतोमा
मेभ्यःगुणेभ्यःपरंअधिकं एनात्तद्रूपंवाधरहितंनाभिजानाति प्रातिभा
सिकरजतार्थंधावमानःशुक्तिकांनवेत्तीत्यर्थः १३

वनमालीटीका

ननुयद्येवंगुणमयानांनियामकत्वात्त्वंगुणातीतस्तर्हित्वांसर्वेजीवाः
कथंजनोनजानंतीत्यतआह त्रिभिरितिएभिस्त्रिभिर्गुणमयैःसात्वि
कराजसतामसैःकार्यकारणसंघातैर्मोहितंदेहगेहादावहंमम
तिवैचित्र्यंमयिसर्वेश्वरेजगद्रूपादिकर्तरिसंदर्शितवतान्यसाधारण
रूपवैचित्र्यंचप्रापितमिदंजगत्प्राणिजातं मत्प्रसादभाजनमदेकश
रणंभिन्नमेभ्यस्त्रिभ्यःपरंव्यापकत्वनियामकत्वादिनातत्कष्टमव्य
यस्वरूपेणधर्मतोदेहनश्वविकारशून्यंसदेकाकारं मांजगदुदया
दिकर्तारंवासुदेवंनाभिजानातिकिंतुप्राणात्मकब्रह्मादिदेहादृष्टां
नहृष्टांनेनदेहादित्वेनहेतुनाविसदेहादिरपिगुणमयइतिमन्य
ते कदाचिन्महज्जःश्रुत्वाप्यसंभावनाविपरीतभावनाग्रस्तत्वाच्छरण
प्रचयशून्यत्वाच्चाभितःसम्यगप्यात्मरूपमपरोक्षतोनजानातीतिभा
वः १३

उत्तमवैनयंतीटीका

गी॰
टी॰
स॰

इहमस्तं

63

एवं स्वस्य सर्वपरत्वं सर्वकारणत्वं च प्रतिपाद्येदानीं यदीदृशस्त्वमसि तर्हि त्व
त्त एवोत्पन्नं प्रत्यक्षानंदयात्मकं जगत्त्वां कुतो न जानातीत्याशंकायां तदज्ञा
नेबीजमाह त्रिभिर्गुणमयैरिति मत्त उत्पन्नं मदधीनस्थितिप्रवृत्तिकं म
द्रूपकं मदात्मकं मच्छक्तिं च इदयात्मकं मदीयं सर्वं सकलं ब्रह्मादिस्था
वरांतमिदं जगत्प्राणिजातं त्रिभिस्त्रिविधैर्गुणमयैः सत्वरजस्तमःस्वरूपैरे
भिरुक्तप्रकारैरतिनीचनैः त्रिगुणभवैर्भावैः देहेंद्रियादिभोगोप
करणरूपैः पदार्थैर्मोहितं सत्तद्गतनरस्थावरादिरूपाभिमानेनापग
तविवेकं सन्नेवं तत्स्वरूपकर्त्तृतभ्यो गुणमयेभ्यो भावेभ्यः परं निरवधि
कातिशयं चित्स्वात्मं तन्नापरिमितैः कल्याणात्मकैः स्वाभाविकैः स्वास
धारणैः स्वगुणगणैरतुल्यस्तमं सात्विकादिपदार्थैः कर्मज्ञैः पाविपा
कैश्च स्पृष्टमात्रात्म्यमव्ययं अप्रच्युतस्वरूपगुणशक्तिकं मां तद्दे
वं सर्वनियंतारं सर्वेश्वरं सर्वकारणं सर्वपरं मां देवकीनंदनं त्वत्मातु
लेयं त्वत्सारथिं स्वेनाभिजानाति अयमीश्वर इति सामान्येन न जानात्य २०
पि अभिसमंतात्तद्भावेनानन्यैश्वर्यवत्वेन न जानातीति प्रमत्तता हूयतीत्यर्थः
१३ ॥

मधुसूदनीटीका

न वेपरमेश्वरस्य स्वातंत्र्ये नित्यशुद्धत्व दुःखक्त स्वभाववत्वमपि अतो जगतस्त्व

कस्य संसारित्वमेवं विधम स्वरूपापरिज्ञानादिति चेत् तदेवकृत इत्याह ॥

एभिर्मायागुणैस्त्रिभिस्त्रिविधैर्गुणमयैः सत्वरजस्तमोगुणविकारैर्भावैः
सर्वैरपि भवनधर्मभिः सर्वमिदं जगत् प्राणिजातं मोहितं विवेकायो
ग्यत्वमापादितं सदेभ्यो गुणमयेभ्यो भावेभ्यः परमेषां कल्पनाधिष्ठा
नमत्यंतविलक्षणमव्ययं सर्वविक्रियाशून्यमप्रपंचमानंदघनमात्म
प्रकाशमव्यवहितमपि मां नाभिजानाति ततश्च तत्स्वरूपपरिचयात्
संसरतीवेति अहो दौर्भाग्यमविवेकजनस्येत्यनुक्रोशं दर्शयति भग
वान् १३ [illegible]
[illegible]
[illegible]
[illegible] ॥ ॥

सदानंदीटीका

एवंभूतं न जानंति मां वंदंति हि मां जनाः निर्गुणं गुणदाहार्थमित्याक्रो
शति माधवः । रागद्वेषप्रमादादिप्रकारैर्गुणजन्मभिः पदार्थैर्मोहितं

सर्वं प्राणिमात्रमिदं किल १ येभ्यो गुणमयेभ्यो मां सर्वाधिष्ठानमीश्वरं
समस्तविक्रियाशून्यं परं चातिविलक्षणं ३ आनंदघनमात्मानं स्वप्रका
शं निरंजनं न जानाति ततः स्वात्माज्ञानादेव कुसंसृतौ ४ भ्रमत्यहोह
दौर्भाग्यमविवेकिजनस्य च इत्याक्रोशेन कृपातिशयं दर्शयत्यपि भक्तये ५॥१३

नीलकंठीटीका

कथं तर्हि स्थूलं त्वत्प्रपंचव्याप्तेन जनेन आत्मानं नावगच्छंतीत्याशंक्या
ह त्रिभिरिति एभिः पूर्वोक्तैस्त्रिभिस्त्रिविधैर्भावैः प्रकाशप्रवृत्तिनियमा
द्यैर्गुणमयैः सत्वरजस्तमोगुणविकारैरिदं चराचरं प्राणिजातं न गच्छेह
वाद्यमोहितं सत् एभ्यो गुणेभ्यः परं मां न जानाति यथा रज्ज्वां सर्पभ्रम
णव्याकुलः सर्पोऽयं रज्जुं न जानाति तद्वत् परत्वे हेतुः अव्ययं एतेभ्यो
वां परिणामित्वात् व्ययवंतः अहं तु न तद्विपरीतः साक्षीत्यन्वयः १३

आनंदटीका

नन्वेवं सर्वस्यामेकस्मिन् परमकारणे त्वयि परमेश्वरे प्रसिद्धे सति लोको
यत्त्वन्न तत्र कारणांतरमेव जानाति नत्र किंनिमित्तो व्यामोह इत्याशंका
गर्भीकृत्योपदिशति ॥ सर्वमिदं जगत् देवादिमशकांतं जीवलो
कः एभिरुद्दिष्टैस्त्रिविधमाणोस्त्रिभिः सात्विकादिभिः गुणम
यैर्भावैरन्योन्याभिभवजनकैस्त्रिभिः प्रीत्यप्रीत्यावरणात्मकैः मो
हितं विपरीतज्ञानवशीकृतं सत् मामुक्तप्रकारलक्षणमीश्वरमेभ्यो
गुणमयेभ्यो भावेभ्यः परमतीतं अतएवाव्ययं निर्विकारं च नाभि
जानंति [illegible] सर्वकर्तृत्वेन न वेत्तीत्यर्थः १३

नन्वेवं स्वशक्तिमात्रोपादानतया सर्वकर्ता
व्यामोहायेदनेकारुणंतरलक्षात्मकं किं विदे

रामकंठीटीका

परमेश्वर एक एवायमात्मा तत्कोऽयं जीवानां
वस्तुविषयभूतं वस्तु जानंति कुर्वंति चेत्यत्र वक्ष्यमाणं स्वमा
याशक्तिवैभवं गर्भीकृत्योत्तर

माह ॥ सर्वं जगत्सकलो जीवलोकः एभिः सात्विकादिभिः पूर्वं प्रतिपादितैः गु
णमयैः सुखदुःखमोहपर्यवसायप्रतिपत्तिभिर्भावैः संवेद्यैः पदार्थै
यथाक्षितं स्वभावप्रत्यवमर्शाख्यव्यवधायकतया मोहितं जातं नातोऽन्यो
न्याभिन्नदेहाद्यात्मप्रत्ययलक्षणात्तानतिमिरं सर्वभावेभ्यो वैधे क
स्वरूपत्वादांतरेभ्यः परं व्यतिरिक्तस्वभावमत एवाव्ययमविद्यमा
नयथाप्रतिपादितस्वरूपमच्युतलक्षणमद्वयं मां परतत्त्वं न जानाति न
प्रतिपद्यते
१३

गी॰
टी॰
स॰

64

[illegible] १३ ॥

लासिकी उत्तमाटीका

एवंभूतं त्वां परमेश्वरमयं जनः किमिति न जानातीत्यत आह ॥ त्रि॰ भिः सात्विकादिभिस्त्रिभिर्गुणमयैः स्वावृतः स्वमोहादिपर्यवसायि वृत्तिभिर्गुणविकारैर्भावैर्भवनधर्मकैः सर्वैः पदार्थैरिदं जगत्सकलो जीवलोको मोहितं तत्स्वभावप्रत्यवमर्शाव्यवधायकतया देहाद्यात्माध्यासमापादितं सत् मामहंता प्रत्येयमीश्वरं प्रत्यगात्मानं च नाभिजानाति स्वात्मतया न प्रत्यवमृशति ननु सकलस्य भाववर्गस्य तवैव बीजभूतत्वात्समवायिकारणतया पतज्ज्ञानमेव तत्स्वरूपज्ञानमित्याशंक्याह एभ्यः परं सर्वेभ्यो भावेभ्यः परं व्यतिरिक्तं विलक्षणं कुत इत्यत आह अव्ययं स्वस्वरूपप्रच्युतिलक्षणविकाररहितं वेद्योल्लासतोऽपि वेदकस्यैकरूपेणावभासमानत्वात् न नु कार्यदेजायदादिविभेदेऽपि तदभिन्नप्रसर्पति निवर्तने निजानैर्वं स्वभावाद्यनुपलब्धा नः १३ ॥

पंचोली टीका

एवंभूतं त्वां परमेश्वरं अयं जनः किमिति न जानातीत्यत्राह त्रिभिरिति इदं सर्वं जगत् गुणमयैः गुणविकारैः रागद्वेषादिप्रकारैः एवं त्रिभिर्भावैः मोहितं एभ्यो यथोक्तेभ्यः गुणेभ्यः परं पृथग्भूतमव्ययं जन्मादिषड्भावरहितं मां नाभिजानाति १३

तत्त्वदीपिकाटी

एभिः सात्विकादिभिस्त्रिभिर्गुणमयैः स्वावृतः स्वमोहादिपर्यवसायिवृत्तिभिर्गुणविकारैर्भावैर्भवनधर्मकैः सर्वैः पदार्थैरिदं जगत्सकलो जीवलोको मोहितं तत्स्वभावप्रत्यवमर्शाव्यवधायकतया देहाद्यात्माध्यासमापादितं सत् मामहंतापत्येयमीश्वरं प्रत्यगात्मानं च नाभिजानाति स्वात्मतया न प्रत्यवमृशति ननु सकलस्य भाववर्गस्य तवैव बीजभूतत्वात्समवायिकारणतया पतज्ज्ञानमेव तत्स्वरूपज्ञानमित्याशंक्याह एभ्यः परं सर्वेभ्यो भावेभ्यः परं व्यतिरिक्तं विलक्षणं कुत इत्यत आह अव्ययं स्वस्वरूपप्रच्युतिलक्षणविकाररहितं वेद्योल्लासतो

त्रिभिरिति एभिः पूर्वोक्तलक्षणैः सात्त्विकादिभिस्त्रिभिर्भावैर्बु-
द्ध्यादिव्यापारात्मिकाभिश्चेष्टाभिर्मोहितं मोहस्याविविच्यकारित्व-
स्य वशतां नीतं सत् इदं सर्वं जगत् जंगमवर्गो मां परमेश्वरमेभ्यो
भावेभ्यः सकाशात्परं दूरे वर्तमानं तथाव्ययं विनाशरहितं वि-
नाशाभावादेवोत्पत्तिरहितं च नाभिजानाति कीदृशैर्भावैः गुण-
मयैः शौर्यौदार्याद्याश्रितैः सत्त्वशौर्यसंख्यादिके गुणाः इति नामानु-
शासनाद्गुणाः शौर्यप्रभृतयो येषु तैरिति यद्वा एभ्यः अतिकर्मणि पञ्च-
मी च तदर्थीवाहुलकात् भगवदुक्तत्वेन छन्दस्तुल्यत्वादस्य ग्रं-
थस्य तथा च एषां भावानां परं पिपर्ति पूरयति पालयति वेति सृ-
ष्ट्यादिसृष्टारं संस्थापयितारं चेत्यर्थः अव्ययमिति विशेषणेन च
स्वयं विनाशरहितत्वेनान्येषां संहर्तारमिति व्यज्यते तथा चाय-
मत्राभिप्रायः शौर्यादिप्रायदर्पान्धाः सात्त्विकादिकं शौर्यप्रभृतं
क्तोज्ञानीयथासनकादिः यथानारदोयथाप्रह्लादोयथापृथुःयथावा ˆगोपिकादिर्या

शुकःनिष्कामःशुद्धप्रेमभक्तोयथावाक्रूरयुधिष्ठिरादिःकंसादिस्तु

पालादयस्तुभक्ता॰स्वरूपसाधनभेदाः तथाभक्तानामपिभगवद्भक्ति ˆविधा

रसायनेस्माभिःसविशेषंप्रपंचितइतीहोपरम्यते १६ [illegible]

[illegible] ॥

ˆभयात्द्वेषात्तुसतंतं
भगवद्विंतापराअपि
नभक्ताभगवदनुरक्ते
रभावादुगवदनुरूपायाः
ˆरक्ते

सदानंदीटीका

येजनाःपुण्यकर्माणोमांपरात्मानमीश्वरं भजंतेतेमहात्मानःसंतिलो

केचतुर्विधाः १ आर्तोव्याध्यादिनाग्रस्तस्तन्निवृत्तीच्छयात्सुधीः याहय

83

तोयथाहनूमान्यथाचद्रुपदात्मजा १ जिज्ञासुरात्मज्ञानार्थीजनकश्चोद्ध
वोयथा परत्रेहभोगार्थमर्थार्थीसाधनेच्छुकः ३ विभीषणस्तुग्री
वोयथाध्रुवश्चयथा सकामास्त्रयोप्येतेभगवद्भजनेनच ४ नरंति
मायांतत्रापिजिज्ञासुर्ज्ञानलाभतः द्वावेवजिज्ञासुस्तंत्राप्यज्ञानीत्वेमांत
रंगमी ५ आर्तस्यार्थार्थिनश्चापिजिज्ञासुत्वस्यसंभवात् जिज्ञासो
र्ज्ञानोपकरणार्थार्थितानाभवेत ६ अनंतयोर्द्वयोर्मध्येजिज्ञासु
र्हरिणेरितः निष्कामोभजनेज्ञानीविस्मृतत्वावबोधवान् ७ तोज्ञा
माधोयथाव्याससनकादिशुकादयः वेप्राकेवलनिष्कामोयथाक्रू
रोयुधिष्ठिरः ८ ॥ १६ ॥

नीलकंठीटीका

येतस्त्वपिदेहायासेमनोविक्षेपनिमित्तीत्यर्थस्तत्कृतमेवाचरंतिते
पिचतुर्विधाः नकेवलंसर्वेमदेककामाइत्याशयेनाह चतुर्वि
धाइति आर्तः पीडितः पीडापरिहारार्थी जिज्ञासुःस्वस्वात्मज्ञाना
र्थार्थी अर्थार्थीधनाद्यर्थी ज्ञानीचेतिचतुर्विधामांभजंते १६ ॥

येतस्यचोद्रेकाःशरणीभवंति तानह

आनंदीटीका

तहूकृतिनोदमदानयत्नास्वाध्यायतपःप्रभृतिषोभजंतेसात्विकंक
र्मजन्मस्तोः तर्पणार्थंप्राकृतवंतो ६ यचउवोणाः चतुर्विधाः
चतुस्त्रः आर्तेजिज्ञासामहपदेशात्तुशीलनतत्त्वावबोधरूपाः
विधाः ब्रह्मप्राप्तिसाधनप्रकाराः येषांईदृशाजनानांमांपरमेश्वरं
भजंतेउपासनाविषयीकुर्वंति तानेवगणयति आर्तःदुःखेनया
भिघातवेदनावान् १ जिज्ञासुःवेदनांतरंतदूपणामहेतुज्ञाना
यगुरुंसमेपेतः २ अर्थार्थी गुरुणोपदिष्टस्यार्थस्यज्ञःखोपण
महेतोःवस्तुनः अर्थीप्रेप्सुः सदुपदेशामनु शीलयन्नित्यर्थः
अर्थार्थिनायाः सदुपदेशानुशीलनंपर्यायः ३ ज्ञानीयवंक्रमेण
प्राप्तपरमात्मतोपश्चेतिचकारः समुच्चयेउः खेउयाभिघातवेदना
वत्वात्प्रभृतिसमुदितोपायोपेयत्वेपरमात्मावबोधप्राप्ताः सा
त्विकादैवभावभाजोमांपरमात्मत्वेनअपंतीत्यर्थः तदेवमार्त्ता
दीनांचतुर्णामपिप्रकाराणांब्रह्मप्राप्तिसामस्त्येनैवोपायत्वंतत्र

गी॰ टी॰ स॰

84

च्छलत्वेन दृष्टमार्तादिभेदस्वत्वेन तथाचोद्देशपर्वणि तहि द्विप्रणिपाते
नपरिप्रश्नेन सेवयेत्यत्रा[illegible]यमेवाभिप्रायः तथाहि लोके यथा वै
रोगार्त्तः स एव रोगोपशमोपायं वैद्यं पृच्छति वैद्योपदिष्टं रोगोपशम
नमर्थम् अनुशीलयन् अरोगः संभजते [illegible]
[illegible]
[illegible]
[illegible]
[illegible] ॥

रामकेलीटीका

अनुगृहीतत्वेसाम्यविषन्नगृहेकातीव्रतादितारनम्यास्मत्तविंधाः
प्रस्तुतविभागेन चतुष्प्रकाराजना मां भजन्ते मद्भक्ताभवन्त्यत एव
ते सुकृतिन स्तेषां चतुर्विधत्वं कथयति आर्तइत्यादिना तत्रार्त्तो मां
भजते योग्न्तुतरमदनग्रहमहोग्रपेनविशीर्यमाणः संसारमोह
नसत्तविहविभिक्षुत्सकललोकप्रसिद्धतत्तत्ताकारादिहृष्ली
पायसमाश्रयणेनमद्भक्तो भवति १ ततः क्रमेण वर्धमानसंवेग
रः संकोहं किमिदं देहेन्द्रियविषयादिमयमहामोहजालकय
मतो बंधनात्परिमुच्येयेतितत्वंज्ञातुमिच्छुर्नीनाशास्त्रशुश्रूषाश्र
वणादिभिर्युक्तमतिः संशयायनत्वपवमत्सपर्यायरोभवति २
अनपवनवजितास्त्वभिनिवेशप्रकर्षोदाविर्भवद्विवेकवासनालो
कविलीयमानविपर्ययप्रत्ययतीव्रतिमिरत्वात्प्रथमानयथास्थि
तहेयोपादेयपदार्थप्रविभागोऽर्थार्थी मां भजते यः शास्त्राभ्यासवशा
त्सत्वनिश्चयः सन्निदमेवपरमं फलं रम्यादेयनयात्मतत्वल
क्षणमर्थं वस्तुयत्नेनाभिकाङ्क्षयति ३ ततो ज्ञानी मां भजते यः
सकलविचिकित्साविच्छेदविशदमतिः स्वीकृतयथोक्ततात्तल
क्षणपरमोपायः सन्नयथाक्तस्वरूपमव्यवधानेन मामेवोपास्ते [illegible]
[illegible] ॥

लासिकी [illegible]टीका

तेचसुकृतनतारतम्येनचतुर्विधाइत्याह ॥ येपूर्वजन्मसुकृतपुण्याज
नास्तेमांभजंते येतुमांभजंतेतेसुकृतिनइतिवा तेचचत्वारः आर्तो
रोगाद्यभिभूतो मत्त्वभगेन ज्ञापिते ईश्वरजवासीजनोयथा सयदि
पूर्वकृतपुण्यस्तर्हिमांभजते अन्यथाक्षुद्रदेवताभजमानःसंसर
ति एवमग्रेऽपिद्रष्टव्यं जिज्ञासुरहैनलक्षणज्ञानार्थीमुमु
क्षुर्यथामुचुकुंदादि अर्थार्थी अत्रवापरत्रवाभोगसाधनभूत
धनलिप्सुर्यथाविभीषणध्रुवादिः ज्ञानीभगवत्तत्त्वसाक्षात्कारवा
न्यथानारदशुकादिः १६ ॥

पंचोलीटीका

येपुनःसुकृतिनोभजंतितेषांचातुर्विध्यमाह चतुर्विधेति हे
अर्जुनचपुनःचतुर्विधाःसुकृतिनोनरोत्तमाःमांभजंतिहेभर
तर्षभतान्निबोधजानीहिआर्तःअधिदैविकादिदुःखत्रयपरिप्लुत
जिज्ञासुःआत्मस्वरूपंज्ञातुमिच्छुःअर्थार्थीधनकामःज्ञानीवि
द्वांस्तत्त्ववित् १६

रसवीरसमिद्बोधिनी ॥

केपुनस्त्वांप्रपद्यंते ततोऽस्मात्गुरुमायायास्त्वाच्चोत्तीर्णाभवंती
तितानाह चतुर्विधाइति सुकृतिनःप्राग्जन्मार्जितपुण्यराशि
शालिनोजनामांभजंतेशरणंकुर्वंते तेच सुकृततारतम्या
च्चतुर्विधाः चातुर्विध्यमेवदर्शयति आर्तइत्यादिना आर्तःप्रा
कृतविप्रकाराभिभवेनातुरःजिज्ञासुःशुद्धतत्त्वोपायतत्त्वानवि
षयेच्छावान् अर्थार्थी उरुपार्थवसुप्रियाकांक्षी ज्ञानीप्राक्सा
वार्योपदिष्टेर्थेदृढनिश्चयवान् १६ ॥

मध्वभाष्य

१६ ॥

85

भाषाअनुवाद

तत्कर्मकारी मनुष्यही मेरी भजन करते हैं और वे भी आपके न्यून अधि वर्णते चारि प्रकार के हैं सोई कहते हैं कि हे अर्जुन जो पूर्व जन्म अवधि पुण्यवान हैं तेई हम को भजते हैं चारि प्रकार भक्तये हैं प्रथम आतर कहे रोगग्रस्त दूसरा जिज्ञासु कहे आत्मज्ञान की इच्छाहै जि से तीसरा अर्थार्थी अर्थात् लोक यापर लोक का भोग साधन अर्थीकांद्री चौथा ज्ञानी है पर ये चारो पूर्वपुण्य के प्रभाव होनेसे भजते हैं नहीं तो और और देवता कीभक्ति करि अपना काम निकारलेते पर वहकाम काम नहीं है १९ ॥

दोहा

चारविधि मोहि भजत जन हे पार्थ सुकृती सोय दुखी जिज्ञासु प्रयोजनी ज्ञानी भरत वर सोय १९॥

86

तेषांज्ञानीनित्ययुक्तएकभक्तिर्विशिष्यते प्रियोहि
ज्ञानिनोऽत्यर्थमहंसचममप्रियः १७ ॥

शांकरभाष्यं

तेषामिति तेषांचतुर्णांमध्ये ज्ञानीतत्त्ववित्त्वान्नित्ययुक्तो भवत्येकभ
क्तिश्चान्यस्यभजनीयस्यादर्शनादतः सएकभक्तिर्विशिष्यते विशेष
माधिक्यमापद्यते अतिरिच्यत इत्यर्थः प्रियोहि यस्मादहमात्मा ज्ञा
निनोऽतस्तस्याहमत्यर्थं प्रियः प्रसिद्धं हिलोकेआत्मा प्रियोभवति
इतितस्मात् ज्ञानिन आत्मत्वाद्वासुदेवः प्रियोभवतीत्यर्थः सचज्ञा
नीममवासुदेवस्यात्मैवेति ममात्यर्थंप्रियः १७ ॥

आनंदगिरिकृतटीका:

चतुर्विधानांतेषांसुकृतिनो भगवद्भजनवतां तुल्यत्वमाशंक्याह
तेषामितितस्य विशिष्यमाणत्वे हेतुमाह प्रियोहीति नित्ययुक्तत्वं
भगवत्यात्मनिसदासमाहितत्वं तच्चेतत्त्वं असारेसंसारेभगवानेवसारः
सोहमस्मीत्येकस्मिन्नद्वितीये स्वस्मादत्यंतमभिन्नेभगवति भक्तिः
सेहविशिष्योस्येत्येकभक्तिः तस्याधिक्ये हेतुंविवृणोति प्रियोहीत्या
दिना भगवतोज्ञानिनश्च परस्परं प्रेमास्पदत्वं प्रसिद्धंप्रमाणयति प्र
सिद्धंहीति आत्मनोज्ञानिनंप्रति प्रियत्वेपिभगवतो वासुदेवस्यकथं
तं प्रति प्रियत्वमित्याशंक्याह तस्मादिति अहंज्ञानिनो निरुपाधि
कप्रेमास्पदं परमपुरुषार्थत्वेनात्मत्वेनचशेषहीनत्वादित्यर्थः ज्ञानि
नोपि भगवन्तं प्रति प्रियत्वं प्रकटयति सचेति १७ ॥

तेषांचमध्येज्ञानीश्रेष्ठइत्याह ॥

स्वामिकृतटीका

तेषांमध्येज्ञानीविशिष्टः तत्रहेतवः नित्ययुक्तः सदामन्निष्ठः एकस्मि
न्नेवभक्तिर्यस्यतः ज्ञानिनोदेहाद्यभिमानाभावेनचित्तविक्षेपाभावा
त् नित्ययुक्तत्वमेकांतभक्तिश्चसंभवति नान्यस्य अतएवाहितस्याह
मत्यंतंप्रियः सचममतस्मादेतेनित्ययुक्तत्वादिभिश्चतुर्भिर्हेतुभिः
सउत्तमइत्यर्थः ।। १७

गी॰
टी॰
स॰

पैशाचभाष्यं

तेषांमध्येज्ञानीनित्ययुक्तएकभक्तिर्विशिष्यतेश्रेयान् प्रियोहिज्ञा
निनोत्यर्थं अतिशयेनअहंसचममप्रियः १७

87

रामानुजभाष्यं

तेषांज्ञानीविशिष्यते कुतः नित्ययुक्तः एकभक्तिरिति च तस्यहिम
देकप्राप्यस्य मयायोगोनित्यः इतरेषांतुयावत्स्वाभिलषितप्राप्ति
मयायोगःतथाज्ञानिनोमय्येकस्मिन्नेवभक्तिः इतरेषांतुस्वाभिल
षितेतत्साधनत्वेनमयि च अतःसएवविशिष्यते किंच प्रियोही
ति अत्रात्यर्थशब्दोनभिधेयवचनः ज्ञानिनोहंयथाप्रि यात् प्रि
यस्तथामयासर्वज्ञेनसर्वशक्तिनाप्यभिधातुंनशक्यतइत्यर्थः प्रि
यत्वस्येयत्तारहितत्वात् यथाज्ञानिनामग्रेसरस्यप्रह्लादस्यसत्वास
क्तमतिःकृष्णेदश्यमानोमहोरगैः नविवेदात्मनोगात्रंतत्स्मृत्या
ह्लादसंस्थितइति सोपितथैवममप्रियः १७ ॥

8

अभिनवगुप्तकृतटीकाउपलब्धं १७

एकोनविंशा तातुकार्थः

परमार्थप्रपाटीका

तेषामिति तेषांचतुर्णांमध्येज्ञानीतत्त्ववित् एकभक्त्याव्यभिचारि
ण्याभक्त्यायुक्तोविशिष्यतेविशेषंप्राप्नोतियावत् पर्यंतंजीवःसका
मोभवति तावत्पर्यंतंसिद्ध्यादिविघ्नाभावनहिएकभक्तिःनत्वज्ञानीत्य
[illegible]र्थः अथतस्यप्रेमातिशयमाहप्रियइति हीतिनिश्चयेनज्ञा
निनःपुरुषस्यअहमत्यंतंप्रियः निरतिशयप्रेमास्पदं श्रुतिरपि तदे
तत्प्रेयः पुत्रात्प्रेयोवित्तात्प्रेयोन्यस्मात्सर्वस्मादंतरतरंयदयमात्मातथा
आत्मनस्तुकामायसर्वंप्रियंभवतीतिस्पष्टार्थः अपरंसोपिममप्रियः
अवश्यात्मत्वात् [illegible] तस्यांतिनंनहिमहीतापद्
[illegible] १७ ॥

वनमालीटीका

निष्कामतयामय्यतिप्रेमयुक्ततयाचज्ञानीश्रेष्ठइत्याह तेषामिति

चतुर्विधानां मध्ये ज्ञानी मत्साक्षात्कारवान् नित्ययुक्तो मयि रागिणां विषये
ष्वितरेषां नराविद्यमसमाहितचित्तवृत्तिः एकभक्तिः सर्वेषां मत्तः अर्थी एवं
दुया कार्विचित्राक्षेह प्रवाहरूपेकाम्यत्वा मयि भक्तिर्यस्य सः यद्वैकस्मिन्नेवम
यि ताडशी भक्तिर्यस्य सः विशिष्यते नितिरिच्यते सर्वोत्कृष्ट इत्यर्थः हि
न यस्मात्त्यक्तसमस्तैहिकपारत्रिकभोगानन्तर्यप्राणादिनोपाति प्रेमतया मयि
तैलधारावदव्यवच्छिन्नवृत्तिर्ममातिप्रियः अहमपि परमानंदतयाति
स्नेहतया न तस्य प्रियः प्रतियोगी नाभिधेयस्य परः ज्ञानी यथा मम ना
मयि प्रियोहं च तस्य प्रियस्तस्य मया सर्वं तेन वक्तुं न शक्यते नतथ्यमात्रस्य
ज्ञायामभावेन ज्ञानं मम सर्वं तस्यापि नास्तीत्यर्थः १७ ॥

उदारमेवैतमयंनीटीका

नत्वेतेषां चतुर्विधानां भक्तानां मध्ये कश्चिदपि विशेषोस्त्यथवा सर्वेऽपि
समाना भवंतीत्यपेक्षायां त्रिविधेभ्यो ज्ञानिनो वैशिष्ट्यमाह तेषां ज्ञा
दिः नीति तेषां मार्ग्राचतुर्विधानां मध्ये ज्ञानी जीवस्वरूपस्वरूपाश्रयादिया
थात्म्यज्ञानवान् विशिष्यते विशेषो भवति कस्मादेवं यतो नित्ययुक्तः
नित्यमेव सत्त्वस्थः सयोगप्राप्तो सर्वस्मिन्काले एव परमपुरुषेण मया
सह युक्तो योगवान् यथा भक्तादस्तरूक्तं परापरेणासत्वासक्तमतिः
कस्मिन्दर्शमानो महोरगैः नविवेदात्मनो गात्रं तन्नस्मृत्याह्लादसंस्थितः
इति श्रुतिस्तस्तः सर्वकालेषु मां स्मरतीति न तु सर्वकाले तत्प्राह्लादयं
श्रेष्ठतमः नदेवकृतो यत एकभक्तिः एकस्मिन्नेव सर्वेश्वरे मयि भक्ति
सेवा यस्य स तथा जिज्ञासुस्तु मां ज्ञातुमिच्छामेव करोतीति न तु जिज्ञास
या सर्वोत्तममेकं मां निश्चित्य सेवते ततो जिज्ञासोः सकाशाद्वयमसौ श्रेष्ठः
नदेवकृतो यस्मात् ज्ञानिनः स्वपरस्वरूपज्ञानवतो जनस्यात्यर्थमति
रतिप्रायं यथा स्यात्तथाहं सर्वेश्वरः प्रियः सर्वसंबंधावच्छिन्नेनात्मा
नीयादिभावेन साधनसाध्यादिरूपेणातिरातिशयसाम्यभूतत्वेन
सर्वशरीरकत्वेन चाहमेव प्रियः प्रेष्ठतमोऽभवामि अर्थार्थीनां यावद
र्थप्राप्तिस्तावमैदेवं स्मरतीति न त्वाप्यनन्तरं तत्कृचित्तमाविनस्यार्थवद
हमत्यर्थं प्रियो न भवाम्यतो ऽर्थार्थिनस्सकाशात् ज्ञानी श्रेष्ठ इत्यर्थः
हि यस्मादेवं तस्मादेव मम सर्वेश्वरस्यापि स च ज्ञानी सततं प्रियो भव

गी॰ टी॰ स॰

88

तीति चेत्तथापि तत्कामनासमय एव मम प्रिया भवंति न तु सततमित्यर्थः १७

मधुसूदनीटीका

चतुर्विधानामपि सुकृतित्वे नियते पि सुकृततोधिको न निष्कामतया प्रेमाधिक्यात् ॥

चतुर्विधानां तेषां मध्ये ज्ञानी तत्त्वज्ञानवान् निवृत्तसर्वकामो विशिष्यते स र्वतो तिरिच्यते सर्वोत्कृष्ट इत्यर्थः यतो नित्ययुक्तः भगवति प्रत्यगभि न्ने सदा समाहितचेता विक्षेपकाभावात् अत एवैकभक्तिः एकस्मि न्भगवत्येव भक्तिरनुरक्तिर्यस्य स तथा तस्यानुरक्तिविषयांतराभावा त् हि यस्मात्प्रियो निरुपाधिप्रेमास्पदमत्यर्थमत्यंतातिशयेन ज्ञानि नो हं प्रत्यगभिन्नः परमात्मा चतस्मादत्यर्थं समप्रमेश्वरस्य प्रियः आ त्मातिशयेन प्रियो भवतीति प्रसिद्धमेव लोकयोः प्रसिद्धमेवेत्यर्थः १७

[illegible] ॥

सदानंदीटीका

तेषां चतुर्विधानां च मध्ये तत्त्वविज्ज्ञमः निवृत्तसर्वकामत्वात्सुकृता धिक्यहेतुना प्रेमाधिक्यात्सर्वोत्कृष्टः सर्वतः श्रेष्ठो मम यतो भगवत्प्र त्यगभिन्नेभ्रांतिहानतः १ समाहितमना नित्यं विक्षेपाभावतो बुधः एकस्मिंश्चिद्घने शुद्धे भगवत्येव यस्य हि २ सदानुरक्तिरत्यंतापरप्रेमा स्पदत्वतः विषयांतरबाधाच्च नास्त्यन्यविषया रतिः ४ निरुपाधिप्रेमा स्पदत्वेन प्रियो स्य च ज्ञानिनः परमात्माहं प्रत्यगभिन्न आंतरः ५ ततो त्यर्थं स च ज्ञानी प्रियो भगवतो मम प्रियाह्यात्मास्ति सर्वस्य लोक वेदप्रसिद्धितः ६ ॥ १७ ॥

नीलकंठीटीका

किं सर्वेपि समा पते न सुकृतिन इति साधारण्येन विशेषणान्न इत्याह तेषा मिति तेषां मध्ये ज्ञानी विशिष्यते यतो नित्ययुक्तः आर्तादयो हि कामि नः कामदृष्टौ न मज्जने युक्ता भवंति अयं तु नित्ययुक्त एकभक्तिश्चैक भावेन भजनं करोति तथाहि आर्तो रोगिणः स्वर्गभजंते जिज्ञासवः स रस्वतीं अर्थार्थिनः कुबेरादीनिति तेषां नानाकामार्थित्वेनानेकभक्तित्व दृष्टेन तस्य नित्ययुक्तत्वे एकभक्तित्वे च हेतुः हि यतः ज्ञानिनो हम त्यर्थं प्रियः आत्मत्वादेव आत्मा च प्रियः निरुपाधिप्रेमगोचरत्वात्

नदेनत्प्रेयः पुत्रात्प्रेयोन्यस्मात्सर्वस्मादंतरंयदयमात्मेतिश्रुतेश्च सचज्ञानी
ममप्रियः भक्तानांज्ञलभत्वादितिभावः १७ ॥

तेदेवमार्तादीनांचतुर्णामपिविधानां समुदितानामेकपुरुषाश्रयनोहकृतित्वेन्तलेसत्यपिसर्वे
षामुपायानांपराकाष्ठाब्रह्मप्राप्तादय वहितमुपायेज्ञानप्राप्तिंमत्वाज्ञानिनमेवसर्वोत्कर्षं

आनंदीटीका

णस्तौति ॥ ज्ञानीपरमात्मबोधवान् ज्ञाननिष्ठांप्राप्तोनएवैकस्मिन्परमेश्वरेएवभक्तिः
संप्रेम ज्ञानेनतत्वार्तादिवृत्तित्राससाद्यस्य सनित्यमविच्छेदेनयुक्तः परमे
श्वरेएवसमाहितचित्तः तेषामार्तादीनांमध्याद्विशिष्यतेहियस्मादहं
ज्ञानिनोत्यर्थंप्रियः सर्वसंसारप्रपंचंपुत्रदारधनादिकंइंद्रियवर्गा
दिकंचपरिहृत्यमद्भक्तावेवपरत्वत्वात् अतएवंभूतोज्ञानीममप्रियः
[illegible]

रामकंदीटीका

इत्येत [illegible] चतुर्णांमध्येज्ञानिनःप्रकर्षं प्रतिपादयितुमाह ॥
तेषामार्तादीनांमध्येज्ञानीयथोक्तबोधवान्विशिष्यतेयतोसौसर्वतःस्थ
लात्स्थूलात्सूक्ष्मविनिवृत्तोपादेयप्रतिपत्तिः परामुपायकाष्ठामधिरूढ
नएववेदैकैकस्वभावएकस्मिन्नपिपरस्मिंस्तत्वेभक्तिमाननएवनि
त्ययुक्तः सर्वावस्थास्वविच्छिन्नसमाधानोयस्मात्तस्यैवविधज्ञानिनो
हमत्यर्थमखिलपदार्थसार्थपरिहारेणप्रियः प्रीतिकारणंसचापित
थैवममप्रियः इतिव्यतिरेकप्रतिपादनपरमेतत् [illegible]
[illegible] १७ ॥

नासिकी [illegible]टीका

तेषांमध्येज्ञानीश्रेष्ठइत्याह ॥ तेषामार्तादीनांमध्येयथोक्तज्ञानवान्विशि
ष्यतेश्रेष्ठोभवति तत्रहेतवः नित्ययुक्तोनित्यंप्रतिगात्मनिसमाहितः त
थैकभक्तिरेकस्मिन्परमेश्वरेवभक्तिः रतिरासक्तिर्यस्यसः ज्ञानिनोदेहाद्यभि
मानाभावेनचित्तविक्षेपकाभावान्नित्ययुक्तत्वमेकांतभक्तिश्चसंभवतिना
न्यस्य यतस्तस्यज्ञानिनोहंप्रत्यगभिन्नः परमात्मेश्वरोत्यर्थंप्रियोनिरुपा
[illegible] प्रेमास्पदं सचममेश्वरस्यप्रियः १७ ॥

पंचोलीटीका

तेषांचतुर्णांमध्येज्ञानीश्रेष्ठइत्याह तेषामिति तेषांचतुर्णांमध्येज्ञानी
तत्ववित् नित्ययुक्तःसदामत्परःमय्येकभक्तिर्विशिष्यतेअधिकोभवा
ति हियस्मादहंज्ञानीनोआत्मानस्मादत्यर्थंप्रियःसचज्ञानीममात्मेति

रत्नावीरसमिद्धोपिनी ॥

एतेषांचतुर्णामपिमध्येज्ञानीश्रेष्ठःस्यात् तेषामिति तेषांचतुर्णा
मपिमध्येज्ञानीश्रेष्ठःस्यात् तेषामिति तेषांचतुर्णामध्येज्ञानीदृ
ढनिश्चयवान् नित्यंसर्वास्ववस्थासुयुक्तः स्वोचितकर्मणिप्रवृ
त्तिमान् एकभक्तिःएकस्मिन्मयीश्वरेभक्तिर्यस्यसः परमेश्वरए
वास्मिन्नपारेदुःखसागरेमत्कूलःकर्णधारइतिनिश्चयवानित्यर्थः
विशिष्यते आर्तादित्रयात्मकाणांहिविशिष्टोभवति हियतःज्ञानिनः
पूर्वोक्तलक्षणस्यदृढनिश्चयात्मकबुद्धिविशिष्टस्याहमत्यर्थंप्रियः
परमप्रेमास्पदमस्मि मत्प्रीणनार्थमेवेदंपोषोरेकर्मणिप्रवृत्तत्वादि
तिभावः सचज्ञानीममप्रियः परमप्रेमास्पदमस्ति दुःसाध्यमपि
कार्यं तस्यसाधयामीतिभावः ॥१७॥

मधुभाष्य

१७॥

भाषाअनुवाद

परंतु इनके मध्यमे ज्ञानी भक्त श्रेष्ठहै सोई कहते है कि ज्ञानी पुरुष नित्य युक्त अर्थात् सर्वदाही मेरेमें निष्ठ रहता है और केवल हमारा ही एक भक्त और ज्ञानी को शरीर आदिमे अहं बुद्धिका अभाव रहने से मनकी विक्षेप शक्तिके अभावसे नित्ययुक्तत्व उसकोहै और इस ज्ञानी को हम अत्यंत प्रिय है और वहभी हमको अति प्रिय है इन कारणों से ज्ञानी भक्त उत्तम है १७ ॥

दोहा

ज्ञानी तिनमें युक्त नित है एक भक्ति विशेष मेहौंज्ञानी कोप्रिय अतिप्रिय मोहि सोलेष १७॥

90

उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतं आस्थितः स हि
युक्तात्मा मामेवानुत्तमां गतिं १८ ॥

शांकरभाष्यं

न तर्हि आर्तादयस्त्रयो वासुदेवस्याप्रियाः न किं तर्हि उदारा इति उदारा
उत्कृष्टाः सर्व एवैते त्रयोपि मम प्रियाः एवेत्यर्थः नहि कश्चिन्मद्भक्तो ने
मम वासुदेवस्याप्रियो भवतीति ज्ञानी त्वत्यर्थं प्रियो भवतीति विशे
षः तत् कस्मादित्याह ज्ञानी त्वात्मैव नान्यो मत्त इति मे मम मतं निः
श्चयः आस्थित आरोढुं प्रवृत्तः स च ज्ञानी हि यस्मादहमेव भगवान्
वासुदेवो नान्योस्मीत्येवं युक्तात्मा समाहितचित्तः सन् मामेव परं
ब्रह्म गन्तव्यमनुत्तमां गतिं गन्तुं प्रवृत्त इत्यर्थः १८ ॥

आनन्दगिरिकृतटीका

ज्ञानी चेदत्यर्थमीश्वरस्य प्रियो भवति तर्हि विशेषणसामर्थ्यादितरेषा
मप्रियत्वं प्राप्तमिति शङ्कते नन्विति नेषां भगवन्तं प्रति प्रियत्वम
ह त्र विवक्षितमित्याह नेत्य त्यर्थमिति विशेषणस्य तर्हि किं प्रयोज
नमिति पृच्छति किं तर्हीति सर्वेषां भगवद्भक्तत्वाविशेषेपि ज्ञानि भि
त्वं तदतिरेकमङ्गीकृत्य विशेषणमित्याह उदारा इति किं तत्र प्रमाण
मित्याशंक्य ईश्वरज्ञानमित्याह मे मतमिति ज्ञानी त्वात्मैवेत्यत्र हेतु
माह आस्थित इति सर्वपदस्य ज्ञानिव्यतिरिक्तविषयत्वमाह त्रयो
पीति ज्ञानिव्यतिरिक्तानां भगवद्भक्तत्वेपि ज्ञानाभावापराधान्न
भगवत्प्रीतिविषयतेत्याशंक्याह नहीति कस्तर्हि ज्ञानवति सति
विशेषस्तत्राह ज्ञानी त्विति तमेव विशेषं प्रश्नपूर्वकं प्रकटयति क
स्मादित्यादिना सर्वमात्मानं प्रपश्यतोपि प्रपञ्चयातिनः तस्य तव क
थं यथोक्तो निश्चयः स्यादित्याशंक्य आस्थित इत्येतद्व्याकरोति आरोढु
मिति आरोहे हेतुं सूचयति स च ज्ञानीति आरोढुं प्रवृत्तमेव स्फुट
यति मामेवेति १८ ॥

स्वामिकृतटीका

तर्हि किमितरे त्रयस्त्वद्भक्ताः किं संसरन्ति, नहि नहीत्याह ॥
उदारा इति सर्व एवैते उदाराः महान्तो मोक्षभाज एवेत्यर्थः ज्ञानी तु पुनरात्मै
ने

गी॰ टी॰ सं॰

91

वेनिमेमतंनिश्चयः हि यस्मात्सज्ञानीयुक्तात्मामदेकचित्तः सन्ननविद्यतेउ
त्तमायस्यास्तामनुत्तमांगतिंमामेवाश्रितः आश्रितवान् मद्व्यतिरिक्तम
न्यत्फलंनमन्यतइत्यर्थः [illegible] १८ ॥

पैशाचभाष्यं

उदाराउत्कृष्टाःसर्वएवैतेआर्तादयःज्ञानीतुआत्माअहमेवेत्यभिप्रायः
आश्रितःसंप्राप्तःसहिज्ञानीयुक्तएकाग्रचित्तःमामेवानुत्तमांगतिं १८

रामानुजभाष्यं

उदाराइति सर्वएवैतेमामेवोपासतइत्युदाराः वदान्यायेमत्तोयत्किं
चित्फलंतिहिममसर्वस्वदायिनः ज्ञानीत्वात्मैवमेमतः तदायत्तधार
णोहमितिमन्येकस्मादेवंयस्मादयंमायाविनात्मधारणासंभावनया
मामेवानुत्तमंप्राप्यमास्थितः अतस्तेनविनाममात्मधारणंनसंभ
वति ततोममात्माहिसः १८ ॥

अभिनवगुप्तकृतटीका[illegible] १८ एकोनविंशतावुक्तार्थः

नह्निकिमितरे नयस्त्वदुक्ताः संसार परमार्थप्रपाटीका न्नि नह्नि नह्नि इत्याह उदारा इति

आर्तादयस्त्रयोपिउदाराःमदर्पणपरास्ततोमोक्षभागिनएवभवंति ज्ञा
नीतुआत्मैवमत्स्वरूपएवेतिममतंसर्वविज्ञानांमूर्धिपदंदत्वामज्ञा
वमागतइत्यर्थः श्रुतिरपिएतत्पश्यन् यएवंवेदाहंब्रह्मास्मीतिसइद
ंसर्वंभवतीतस्यहनदेवाश्चनाभूत्याईशतआत्माह्येषां संभवतीति
भाष्यं यःब्रह्माहमस्मीत्येवंवेदसइदंसर्वंभवतिसर्वात्मकोभवती
त्यर्थः हीतिनिश्चयेनतस्यपुरुषस्यअभूत्यैअनैश्वर्यायपराभवनायदेवा
इंद्रादयोपिनईशतेसमर्थानभवंति अतःएषामिन्द्रादीनामपिसआ
त्मान्तर्यामित्वेनभवतिकोभवतीत्यर्थः एवंसयुक्तात्मापुरुषःमामेवअ
नुत्तमांगतिंआर्तिनिकगतिस्वरूपंआस्थितः आश्रितः १८ ॥

वनमालीटीका

किमार्तादयस्त्वनप्रियाइत्यतआह उदाराइतिएतेआर्तादयःसकामा

अपिमद्भक्ताः सर्वेऽप्युदारा एवोत्कृष्टा एव पूर्वजन्मार्जितानेकसुकृतरा
शित्वादन्यथा हि मामेव न भजेयुः रार्तस्य जिज्ञासोरर्थार्थिनश्च महिम
द्विस्पद्दृष्टदेवताभक्तस्यापि वैफल्यनुपलंभात् अतो ममप्रिया एवैतेन
हि स योग्या यो वस्तानवान् वाज्ञो वा कश्चित् अपि भक्तो ममाप्रियो भवति
किंतु यस्य यादृशी मतिरुदासीनस्य सर्वत्र समस्यापि मम तादृशी प्रीति
रिति स्वभावसिद्धमेतत् तत्र सकामानां त्रयाणां काम्यमानं प्रियमहं
च प्रियो ज्ञानिनः प्रियान्तरशून्यस्याहमेव निरतिशयप्रियो ममानं
तब्रह्माण्डादिसर्जनादिष्वासक्तस्यापि स एव निरतिशयप्रियः क्षणम
पि स्वक्रमणाकोन्यथा ममकृतज्ञता न स्यात् यथा हि यदेव विद्यया क
रोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीत्यत्र तरवर्थस्य विवक्षित
त्वाद्विद्यादिकं विनापि कृतं कर्म वीर्यवत् भवत्येव तथात्यर्थं ज्ञानी
भक्तो ममाप्रियस्तदन्ये यो ज्ञानव्यतिरेकेण भक्तः सोपि प्रिय इति प्रयोगव.
स्यैव प्रागुक्तात्यर्थमिति विशेषणस्य विवक्षितत्वात् उक्तं हि ये यथा
मां प्रपद्यन्ते तांस्तथैव भजाम्यहमिति ज्ञानी त्वात्मैवात्मवत्सममप्रिय
इति मतं सम्मतं हि यतः सयुक्तात्मा मय्येव समाहितचित्तः सन् मामेव सर्व
रंपरमानंदमूर्तिमनंतमात्मानमेवाक्तं गतिं गंतव्यं परमं फलमास्थितः प
रमफलत्वेन स्वीकृतवान् मद्भिन्नं किमपि फलं न मन्यत इत्यर्थः १८

उतमवैजयंतीटीका

ननु यद्यर्थार्थो ज्ञानी न न तव प्रियाः स्युरार्तादयो न स्युर्नहि तेषां त्रयाणां त
त्प्रियत्वाभावेऽगतिरपि न स्यादिति चेन्मैवमाशंकेथाः सर्वेपि मोक्ष
भाज इत्याह उदारा इति एते आर्तादयः सर्वेऽप्येव उदारा दातारो महान्तो
वा उदारो दातृमहतोरिति निर्देशात् मम मद्भक्तानां वाराधनार्थं स्वदेहाप
त्यादिपालनार्थं वा यथा किंचिद्द्रव्यादिकं मनो ग्राह्यपात्रे स्थानि निरंतर.
सर्वस्वं ममैव प्रयच्छंति स्वं न त्वाभिमानशून्यात्तेपि ममाप्रिया वालिप्रभ
नयो भवंतीत्यर्थः स्वस्यात्यर्थं ज्ञानी मे ममात्मैव प्राण एवेति मे मतं निश्च
यः यथा लोके प्राणाधीनं शरीरधारणं तथाहमपि तदधीनधारणोऽस्मि
एतल्लादस्याधीनो भूत्वास्तम्भेप्यहमाविर्भूतवानित्यर्थः यद्वा ज्ञानी मे
आत्मा मतः यथा लोके मनसैव प्रवृत्तिं निवृत्तिं च प्राप्नोति तेनाहं तथाच.

गी॰ टी॰ स॰

92

व्याकुलो भवति तथाहमपि यद्वा ज्ञानी मे आत्मा शरीरं यथा जीवः शरीरेण
हन्तस्तत्त्वरूपसाक्षात्कारं किं प्रकटयति तथाहमपि तस्मिंस्थितेन्वेव स्वैश्वर्या
दिकं प्रकटयामि नान्यथेत्यर्थः नन्वेवमेवकृतज्ञस्तस्य पदस्यामाह आस्थि
त इति हि यस्मात्स युक्तात्मा मयि युक्तमनाः मामेव तेरुणाव्याकुलो भूत्वा तृणम
पि धारयितुमसमर्थः नदेवकुन्तोऽनुत्तमानामनुत्तमायस्यासान
त्तमानां गतिं प्राप्यरूपं मामास्थितः निश्चयं कृत्वाश्रितवान् मदन्यद्न
मफलं न किंचिन्मन्यते यतस्तं विनाहमपि लवमात्रमपि स्थातुं न श
क्नोमि तस्मात्ममात्मैवेत्यर्थः केचित्तु ज्ञानी त्वात्मैव न मतो न्यः किं त्व
हमेव सः इति व्याख्यां कुर्वन्तु युक्तात्मा मामास्थितः इति विशेषणयो
वैयर्थ्यात् इतस्त्वन्यां प्रकृतिं विद्धि मे परां जीवभूतामित्याद्युक्तविरोधा
च्च जीवेश्वरभेदकप्रतिपादकवाक्यसहस्राणां अज्ञो ह्येकोऽजुषमाणो
ऽनुशेते द्वा सुपर्णा सयुजा सखाया नित्यो नित्यानां चेतनश्चेतनानामि
त्यादीनां व्याकोपाच्च नचाभेदवाक्यानां का गतिरिति वाच्यं परमेश्व
राज्जीवस्वरूपस्य पृथक्स्थित्यभावादभेदकथनमपि घटत एव यथा गं
गायां यमुनादीनामपृथक्स्थितत्वात् गंगात्वकथनमुपपन्नमेव यथा
च मनुष्यत्वाद्ब्राह्मणत्वक्षत्रियादीनामपृथक्स्थितत्वान्मनुष्यकथ
नमुक्तमेव तथा परमेश्वरस्तु सकाशात् जीवानामपृथक्स्वरूपस्थितिम
त्त्वनिकत्वात्तदभेदकथनमुपपन्नमेव स्यात् न तु ज्ञानानां केवलाभेदोऽपि
नानयोर्भेदस्तु तस्य ज्ञानानान्तर्हिता भेद एव स्वरूपस्यादित्यर्थः १८

तत्किमार्तादयस्तव न प्रियाः न **मधुसूदनीटीका** इत्यर्थमिति विशेषणादित्याह ॥

यतेप्यार्तादयः सकामा अपि मद्भक्ताः सर्वे त्रयोऽप्युदारा एवोत्कृष्टा ए
व पूर्वजन्मार्जितानेकसुकृतराशित्वात् अन्यथा हि मां न भजेयुरेव आ
र्तस्यापि जिज्ञासोरर्थार्थिनश्च मद्भजनस्य स्वदाद्देवतान्तरभक्तस्यापि व फलम
पलम्भात् अतो मम प्रिया एवैते नहि ज्ञानवान् यो वा कश्चिदपि भक्तो
ममाप्रियो भवति किन्तु यस्य यादृशी मयि प्रीतिः ममापि तत्र तादृशी प्रीति
रिति स्वभावसिद्धमेतत् तत्र सकामानां त्रयाणां काम्यमानमपि प्रियम
हमपि प्रियः ज्ञानिनस्तु प्रियान्तरशून्यस्याहमेव निरतिशयप्रीतिवि
षयः अतः सोऽपि मम निरतिशयप्रीतिविषय इति विशेषः अन्यथा हि

ममकृतेनतज्ज्ञानस्यानतिकृतत्वाच्चास्यात् अतएवात्यर्थमिति विशेषणम्
पात्रप्राक् यथा हि यदेव विषयीकरोति अहं योपासितं तदेव वीर्यव
त्तरं भवतीत्यत्र न तस्यैव विवक्षितत्वात् विषयादिव्यतिरेकेणाकृत
मपि कर्मवीर्यवत्तरं भवत्येव तथा सर्वं ज्ञानी भक्तो मम प्रिय इत्युक्ते यो
ज्ञानव्यतिरेकेण भक्तः सोऽपि प्रिय इति पर्यवस्यत्येवातोऽत्यर्थमिति
विशेषणस्य विवक्षितत्वात् उक्तं हि ये यथा मां प्रपद्यन्ते तांस्तथैव
भजाम्यहमिति अतो ममात्मैवेतज्ज्ञानवान् ज्ञानी आत्मैवेत मम नाभि
न्नः किंत्वहमेवास्मीति मम मतं निश्चयः तथा हि सकामभेददर्शि
त्वेनापेक्षया निष्कामत्वभेददर्शित्वविशेषयुक्तत्वार्थः हि यस्मा
त् स ज्ञानी युक्तात्मा सदा मयि समाहितचित्तः सन् भगवन्तमनन्त
मानन्दघनमात्मानमेवानुत्तमां सर्वोत्कृष्टां गतिं गन्तव्यं परमफ
लमास्थितः अङ्गीकृतवान् तत्तमाद्भिन्नां किमपि फलं समन्यत इत्य
र्थः १८ [पुलादेवंतस्मात्] ॥

सदानंदीटीका

एते आर्तादयः सर्वे सकामा अपि मे प्रियाः पूर्वजन्मार्जितानेकपुण्य
पुण्यानयोत्तमाः १ अन्यथा न भजेयुर्मां सर्वपुण्यफलावधिं हृद्दे
वाभ्मनंतोऽपि दृष्ट्यैनेव हि तौ जनाः २ आर्तादयस्त्रयो ये ते मम भक्ता
मम प्रियाः तथैतेषामपि मे भक्तः कश्चिदप्रियो मम ३ किंतु यस्य
मयि प्रीतिर्या हृष्टा मे पिनाहृणी प्रीतिरस्तीति स्वाभाव्यात्त्रयस्तेन ये
त्रयो मम ४ भक्तास्तेषां त्रयाणां च काम्यमानमपि प्रियं प्रियोऽहम्
पि तस्माद्यो ज्ञानी तस्य तु सर्वतः ५ अहमेव प्रियोऽत्यन्तप्रेमास्पदतमो
ऽतः अतः सोऽपि ममात्यन्तप्रेमास्पदतया प्रियः ६ अन्यथा मे कृत
ज्ञत्वेन स्यान्स्याच्च कृतघ्नता अतो मामात्मभावेन ज्ञानवान्स्वानुभू
तितः ७ साक्षात्कृत्य स्थितो नित्यचिदानन्दैकमात्मनि स आत्मैवे
वनमाद्भिन्नः किंत्वहं सर्वथैव सः ८ यतः समाहितमना मयि ज्ञा
नी निरन्तरं भगवन्तमनन्तमामानन्दघनमद्वयं ९ आत्मानं पर
मोत्कृष्टां गतिं गन्तव्यमादरात् फलत्वीकृतवान्नैव मद्भिन्नं मन्य
ते फलम् १० ॥ १८ ॥

गी० टी० स०

९३

नीलकंठीटीका

उदाराइति सर्वएवैतेउदाराउत्कृष्टएव ज्ञानीतुममआत्मैवेतिममतंनि श्चितं हियतःसयुक्तात्मा अहमेवभगवान्वासुदेवइत्यभेदेनमयि समाहितचित्तोमामेवअनुत्तमांश्रेष्ठांगतिमास्थितःनतुमत्तोन्यदा रोग्यादिकंकामयतेमय्यात्मबुद्धिंकरोति किंतर्हिमत्स्वरूपमेवसंभ जतइत्यर्थः १८ ॥

आनंदटीका

तवसर्वेश्वरस्यसर्वेषुसमस्यकथं ज्ञानवानेवप्रियोनार्तादय इत्याह ॥

एतेसर्वएवार्तादयः उदाराः उत्कृष्टाः परमात्मापरमेश्वरः अर्थ्यतेप्रा र्थ्यतेएभिःपुमर्थैरितिव्युत्पत्त्या सर्वएवममप्रियाः तथापिज्ञानिनः प्रियत्वविशेषमित्याह तुशब्दः एभ्योविशेषाज्ज्ञानीममात्मैवमतः मत्स्वरूपंपरमः इदंहितच्छब्दः पुत्रात्प्रियोभवतिआत्मनेएवशब्दः प्रियइतिश्रुतिः तीर्नितरार्तादीनांतानप्राप्यापायोपाधिकंप्रियत्वं ज्ञा निनितुममात्मभूतत्वात्साक्षादेवप्रियत्वं ज्ञानिनःस्वाभिन्नात्मत्वेयुक्ति माह हियस्माज्ज्ञानेनयुक्तात्मा ज्ञानेनयुक्तःसंयमेनपरमात्मनिसंयो जितआत्मायेनसः ममैवानुत्तमांगतिंस्वरूपमभेदमास्थितः [illegible] ॥

रामकंठीटीका

ननुज्ञानिनएवप्रकृष्टत्वेसत्या नीदयःकिंबहिष्कृताएवेत्यत्रा ह ॥ तत्रार्तादयोयद्यप्युत्तरोत्तरविशिष्टत्वेनान्योन्यभिन्नरूपास्तथा पिभक्तिमूर्तीकृतोदययापरयैकयामहत्त्वाधिष्ठिताःसन्तःसर्व एवोदाराउदारचेतसः औदार्यलक्षणेनैकगुणेनयुक्ताः किंत्वार्ता स्तावत्तार्थार्थिनादयस्तथैवंतेनैतद्व्यतिरिक्तार्थालंबिनोतान वान्तराहमित्यभेदेनमत्स्वरूपैकालंबनइत्यात्मैवासौममाभि प्रेतः एतदेवप्रकटयति यस्मात्सज्ञानीममैवनान्यस्यव्यतिरिक्त वस्तुनस्तस्मात्तूत्तमांनिरतिशयांगतिंप्राप्तिहेतुमभेदज्ञानलक्षणं ध्यानमास्थितः समाश्रितः [illegible] १८ ॥

लासिकी [illegible]टीका

ननु ज्ञानिन एव प्रकृष्टत्वे सति आर्त्तादयः किं वहिष्कृता एवेत्यत्राह ॥
एते सर्वे आर्त्तादयस्त्रय उदारा उत्कृष्टा मोक्षभागिन एव यतोन्येह्न
यणा तु दुःख्य आर्त्तिनिवारणमर्थादिकं च तत्तल्लयणागिपादोदरणीरस
तेभ्योधिकतरं वा सम्पन्नेभ्यो मार्गयन्ते एतत्तु उदारा अपि ज्ञानी त्वे
दयात्तदन्तःसत्वायतस्तेषां नावत्यपि भेदोस्ति भगवत इदमहं
मभिलषामीति भेदस्य स्फुटप्रतिभासनात् तद्व्यतिरेके ज्ञानी
तु तन्मां मिवाभेदेनालंभत इति ततो मदभिन्न एव स इति मे स्थि
रमतं निश्चयः हि यस्मात्स ज्ञानी युक्तात्मा युक्तो मदभिन्न आत्मा
स्वस्वभावो यस्य स मामेवेश्वरं नत्वन्यत्फलमनुत्तमां गतिं गन्तव्यं प
रमं फलमाश्रित आश्रितवान् मद्भिन्नमन्यत्फलं न मन्यत इत्यर्थः
१८ ॥

पंचोलीटीका

ज्ञानिनो भगवत्प्रियत्वप्रतिपादनेन इतरेषां त्रयाणां तदप्रियत्वं प्रा
प्तं निराकरोति उदारा इति एते सर्वे त्रयोप्युदारा उत्कृष्टाः मे म
म प्रियाः एव न हि कश्चिन्मद्भक्तो ममाप्रियो भवति ज्ञानी त्वत्यर्थं
मम प्रियो भवतीति विशेषः ज्ञानी तु आत्मैव नान्यो न मे इति मे म
तं निश्चयः हि यस्मात्स ज्ञानी आस्थितः आरूढः अहमेव भगवान्
वासुदेवो नान्योस्तीत्येवं युक्तात्मा समाहितचेताः सन् मामेव परं ब्र
ह्म गन्तव्यमनुत्तमां गतिं गन्तुं प्रवृत्त इत्यर्थः १८

रणवीरसमिद्धोधिनी ॥

ननु यदि ज्ञान्येव त्वत्प्रियस्तदितरे तवाप्रियत्वेन किं मय्य एव मज्जं
तीति रेत्याहोदाराः सर्व एवैत इति एते सर्व एवार्त्तादय उदारा भ
क्तिलक्षणोदार्यरूपेणैकेनैव गुणेन युक्ताः कोर्थः यद्यप्युत्तरो
त्तरं विशिष्टत्वेन विभिन्नलक्षणा एते तथापि भक्तिलक्षणेनैके
नैव गुणेन सर्व एव तरंतीति महद्वनाभिप्रायः परं तु ज्ञानी ममा
त्मैव मतः मदभिप्रायानुरूपचेष्टत्वात् हि यतः स ज्ञानी युक्तात्मा

94

युक्तः स्वोचितकर्मसि समाहितः सज्जीकृतो वात्मा चित्तं यस्य ये
नवा मत्ताहृपाः मामेव गतिं प्रत्यर्थे द्वितीयाममेवेति पाठांत
रंवा मत्संबंधिनीमेव गतिं पद्धतिमास्थितः येनैव मार्गेण तु
व्रजामि तेनैव सोपि व्रजतीति भावः द्विविधाता यैव द्दिम मा
वतारगः प्रसिद्धाः इति तेनापितप वद्वन्यंते इति तात्पर्यं कीट
यीगतिं सर्वमार्गमध्ये श्रेष्ठामित्यर्थः १८॥

मधुभाष्य

१८॥

भाषानुवाद

तो ख्यावाकी तीनि प्रकारके भक्त संसार गतिको प्राप्त होतेहे ऐसे शंका को वारंवार निषेधकरि कहतेहे कि नही नही भक्तभी उदार कहे महान हे अर्थात् मोक्षपावने के योग्यहे परंतु मेरी इह अभिप्राय कि ज्ञानी भक्त मेराही स्वरूप है जिस हेतु वह मदेक चित्तहे इससे सर्वोत्तम गतिरूप हमको ही आश्रय करके औरकोई फल की इच्छा नही रखता है १८

दोहा

है सो सभी उदार यह ज्ञानी मोर स्वरूप युक्तहृदयस्थितमोहि
मे सो लहे गति अनूप १८॥

95

बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते वासुदेवः सर्वमिति स महात्मा सुदुर्लभः १९ ॥

शांकरभाष्यं

ज्ञानी पुनरपि स्तूयते बहूनामिति बहूनां जन्मनां ज्ञानार्थसंस्काराश्रयाणां अंते समाप्तौ ज्ञानवान् प्राप्तपरिपाकज्ञानो मां वासुदेवं प्रत्यगात्मानं प्रत्यक्षतः प्रतिपद्यते कथं वासुदेवः सर्वमिति य एवं सर्वात्मानं मां प्रतिपद्यते स महात्मा न तत्समोऽन्योऽस्त्यधिको वा अतः सुदुर्लभो मनुष्याणां सहस्रेष्विति ह्युक्तम् १९ ॥

आनन्दगिरिकृतटीका

उक्तं श्लोकस्य गतार्थत्वं परिहरति ज्ञानीति ज्ञानार्थसंस्कारो वासना तत्तज्जन्मनि पुण्यकर्मानुष्ठानजनिता बुद्धिशुद्धिस्तदाश्रयाणां तदन्तानामनन्तानां जन्मनामिति यावत् ज्ञानवत्त्वे प्राप्ते तस्यापि जन्मसंभवितमित्याशंक्याह प्राप्तेति ज्ञानवतो भगवत्प्रतिपत्तिं प्रश्नद्वारा विवृणोति कथमिति यथोक्तज्ञानस्य महतस्तस्य दुर्लभत्वं सूचयति य एवमिति महतः सर्वोत्कृष्टमात्मत्वेन विजानतस्येति महात्मत्वे फलितं हेतुमाह अत इति तत्र वाक्योपक्रमानुकूल्यं कथयति मनुष्याणामिति १९ ॥

एवंभूतो भक्तोऽतिदुर्लभ इत्याह ॥

स्वामिकृतटीका

बहूनां जन्मनां यत्किंचित्पुण्योपचयेनान्ते चरमे जन्मनि ज्ञानवान् सन् सर्वमिदं चराचरं वासुदेव एवेति सर्वात्मदृष्ट्या मां प्रपद्यते भजति अतः स महात्मा अपरिच्छिन्नदृष्टिः सुदुर्लभः [illegible] भूताः [illegible] देवताः सर्वे [illegible] १९ ॥

पैशाचभाष्यं

बहूनां जन्मनामन्ते अवसाने ज्ञानवान्मां प्रपद्यते वासुदेवः सर्वमिति प्रतिपद्यमानः स च महात्मा दुर्लभः १९ ॥

गी॰
टी॰
स॰

96

रामानुजभाष्यं

बहूनामिति नाल्पसंख्यानां पुण्यजन्मनां फलमिदं यन्मच्छेषतैकरसा
त्मयाथात्म्यज्ञानमेवं कं मत्प्रदर्शने अपितु बहूनां पुण्यजन्मनामवसाने
वासुदेवशेषतैकरसोऽहं तदायत्तस्वरूपस्थितिप्रवृत्तिश्च सचायमसंख्येयैः
कल्याणगुणैः परतर इति ज्ञानवान्भूत्वा वासुदेव एव मम परमप्राप्यं प्रा
पकं चान्यदपि यन्मनोरथवर्ति स एव मम सर्वमिति मां यो प्रपद्यते मामुपा
स्ते स महात्मा महामना दुर्लभतरो लोके वासुदेवः सर्वमित्यस्यायमेवा
र्थः प्रियो हि ज्ञानिनोऽत्यर्थमहं आस्थितः स हि युक्तात्मा मामेवानुत्तमां
गतिमिति प्रक्रमात् ज्ञानवांश्चायमुक्तलक्षण एव अस्यैव पूर्वोक्तज्ञानि
त्वात् भूमिरापइत्यारभ्य जीवभूतामितीत्यचेतनचेतनप्रकृतिद्वयस्य
परमपुरुषशेषतैकरसतोक्ता अहं कृत्स्नस्य जगतः इत्यारभ्य ये चैव सा
त्त्विका भावा राजसास्तामसाश्च ये मत्त एवेति तान्विद्धि न त्वहं तेषु ते म
यि इति प्रकृतिद्वयस्य कार्यकारणोभयावस्थस्य परमपुरुषायत्तस्वरूप
स्थितिप्रवृत्तित्वं परमपुरुषस्य च सर्वैः प्रकारैः सर्वस्मात्परतरत्वमुक्तं
अतः स एवात्र ज्ञानीत्युच्यते १९ ॥

अभिनवगुप्तकृतटीका

येऽत्र मां भजन्ते ते सुकृतिनः ते च चत्वारः सर्वे चैते उदाराः यतोऽन्ये क्षुद्रपूर
तुष्टयः आर्त्तिनिवारणमर्थादि च तत्स्वल्पफलाभिप्रायेदत्वादीश्वरात्तेभ्योऽपि
कतरं वा आत्मनस्तेभ्यो मार्गयन्ते ज्ञानी पुनस्तु यतोऽनन्यमनस्त्वात्तत एषां ना
वस्थापि भेदोऽस्ति भगवत इदमहमभिलषामीति भेदस्फुटप्रतिभासत्वा
त् ज्ञानी तु मामेव भेदतया लभते इति ततोऽहमभिन्न एवास्य चाहमेव
प्रियोऽनन्तफले अत एव स वासुदेवः सर्वमित्येवं दृढप्रतिपत्तिपवित्रीकृ
तहृदयः १९ ॥

परमार्थप्रपाटीका

एवंभूतो भक्तो दुर्लभ इत्याह बहूनामिति बहूनां शुभाचारवतां जन्म
नामन्ते चरमजन्मनि वासुदेवः सर्वमिति ज्ञानवान् सर्वात्मकदृष्ट्या मां
प्रपद्यते भजति स महात्मा अपरिच्छिन्नदृष्टिः स च दुर्लभः अयमर्थः
वासयत्याच्छादयति मायया विश्वमिति वासुः तथा स्वप्रकाशेन देव्य

मीतिदेवस्तथाविधः सुज्ञात्मा स एव सर्वमिति ज्ञानवान् तदुक्तं
ग्रहमेव परं ब्रह्म वासुदेवाख्यमव्ययं इति स्यान्निश्चितो मुक्तो बद्ध एव
वान्यथा भवेदिति तदेवं कामिनोऽपि संतः कामप्राप्तये परमेश्वर
मेव ये भजंति ते कामान् प्राप्य पानैर्मुच्यंत इत्युक्तं प्रथमतादितप
नाहु १९ ॥

वनमालीटीका

नाहमेवं ज्ञानी दुर्लभ इत्याह बहूनां जन्मनां किंचित् किंचित्पुण्यो
पचयहेतूनामंते चरमे जन्मनि सर्वसुकृतविपाकरूपे वासुदेवः
सर्वमिति ज्ञानवान् सन् मां निरुपाधिप्रेमणा प्रपद्यते स महात्मा म
हाशयो नितरां ज्ञाविजनयाजीवन्मुक्तः दुर्लभो मनुष्याणां सहस्रे
ष्वपि दुःखेनापि लब्धुमशक्यः सर्वव्यापकत्वात्सर्वं समाप्नोषि ततो
मा॰ सि सर्व इति वचनात् वासुदेवं सर्वं सर्वस्याहं प्रभव इति निमित्तानो
पादानत्वात् ब्राह्मणोऽस्मि त्वमिति वद्वासुदेवज्ञानत्वाद्वा
सर्वं वासुदेवः यान्यामासि येन हि देवानीति धात्वर्थानंतरं लेपा
नपाह्नमयोगवद्वा वासुदेवाधीनत्वात्सर्वं वासुदेवः यद्वा वासुदे
व एव सर्वफलप्रापकः अंतर्यामितया सोऽनुष्ठानकारयितेंद्रिया
दिप्रेरकः स्वहृत् स्वामी होता नदीपयत् किं चित्र इन्नतो ये गोवर्त्त
त्सर्वं सर्वस्वं वासुदेव इति धियामां यः प्रपद्यते स दुर्लभ इत्यर्थः १९

जनमवैजयंतीटीका

ननु पद्यार्तादिभ्यो ज्ञानिनो वैशिष्ट्यः स्यान्नहि ते पितृयोज्ञानोपलब्धे
धां॰ यत्नं कुर्वतो नाकुर्वन्तीत्यपेक्षामेवंभूतोऽमन्यपन्ना ज्ञानी तेनेक उपपु
ञ्जैर्जन्मभिर्भवति नाल्पैरिति वदं लस्यातिदुर्लभत्वमाह बहूनामि
ति बहूनामपरिमितकोटीनां जन्मनां श्रीमत्कुचिस्रोत्रियस्त्वधर्मोचा
रति शुभेच्छादिजनवरमलेषु जनतानामन्ते तत्र तत्र जन्मनि बहूनां ना
विधान् विषयान्स्वतः पुनर्भुक्त्वानेकानि शास्त्राणि च भूयो भूयो वि
चार्य वारं वारं सवर्णाश्रमोचितानानेकान्धर्मानाचरित्वा मदाराधने
नैव प्राकृतविषयवासनारहितान्तःकरणं कृत्वानंदेतेन देवमाने

गी॰
टी॰
स॰

97

चरमेजन्मनिभूमिरापोनलोवायुरितिद्वाभ्यांपरापराभिधानेचेतनाचे
तनरूपंप्रकृतिद्वयंममैवतत्स्वरूपाश्रितंप्रवृत्तिमदेकस्यैवाधीनाइ
त्युक्त्वाएतद्योनीनीत्यनेनमत्प्रकृतिद्वयस्यसर्वभूतयोनित्वंचोक्त्वा अहं
कृत्स्नस्यजगतः प्रभवःप्रलयस्तथेत्याद्यैर्येचैवसात्विकाभावाइत्यन्तैः
सार्द्धषड्भिःश्लोकैःममसर्वस्यप्रकृतिद्वयात्मकाखिलजगत्कार
णत्वंसर्वात्मत्वंचकार्यकारणरूपेणावस्थितंचेतनाचेतनरूपंस
र्वंजगन्माहिभूतिरूपंमदात्मकंमदधीनस्थितिप्रवृत्तिकंमदपृथक
सिद्धंमत्सत्ताधीनसत्ताकंचेत्युक्तप्रकारेणसर्वंकारणावस्थंका
र्यावस्थंचमत्प्रकृत्याद्यणुपर्यन्तंब्रह्मादिस्थावरान्तंवाचेतनाचेतन
रूपंदृश्यादृश्यंवस्तुमात्रंसकलंवासुदेवः तत्रचेतनाचेतनव
स्तुष्वन्तर्यामित्वेनतत्तन्नियन्तृत्वेनच[illegible]नतत्त्वेन
पितृत्वेनतत्तच्छुभाशुभकर्मकारयितृत्वेनतत्तत्साक्षित्वेनतत्त
दधिष्ठानत्वेनतत्तद्व्यापकत्वेनतत्तदभिन्ननिमित्तोपादानरूपका
रणत्वेनचवसतीतिनिवासः सचासौदेवश्चवसुदेवः वसुदेवएवा
वासुदेवःस्वार्थेऽण् यद्वावसन्तिसर्वाणिभूतान्यस्मिन्नितिनिवसः
सचासौदेवश्चवसुदेवः सएववसुः यद्वावसुदेवस्यापत्यंवासुदेवः
यद्वावसुषुसृष्टासुदीव्यतिक्रीडतिभगवत्यिन्द्रत्वाभिमानेनविजि
गीषतिवाद्योततेवास्तूयतेवातैःसहमोदतेवेत्यादिनिरु
क्त्यावसुदेवोनन्दसूनुस्तस्यापत्यंवासुदेवः इत्येवंविधप्रकारकं
स्वाभाविकासंख्येयकल्याणगुणगणरत्नाकरोऽ
नन्ताचिन्त्यशक्तिकःकर्तृत्वभोक्तृत्वाद्यनेकधर्माश्रयोऽहमेवाभिन्न
स्वरूपः सविशेषोवासुदेवपदवाच्योऽहं श्रीकृष्णः एवेतीत्थंप्रका
रकंसर्वात्मकंसर्वव्यापकंभूमविषयकामपरिच्छिन्नंसत्संप्रदाय
प्राप्तंज्ञानंविद्यतेयस्यसएवज्ञानवान्भवतिसएवचमांसर्वात्मरू
पंपरमपुरुषार्थरूपंपुरुषोत्तमंप्रपद्यतेउपास्तेनान्यआनादयस्तेषामेव
मद्भक्तानांज्ञानाभावात् एवंभूतः सज्ञानवान्महात्माप्रल्हादसदृशो
ऽत्युदारमनाःसुदुर्लभःकोटिष्वपिनिरतिशयेनदुर्लभःप्राप्यएवेत्यर्थः
१९

मधुसूदनीटीका ॥ यस्मादेवं तस्मात् ॥

बहूनां जन्मनां किंचित्किंचित्पुण्योपचयहेतूनामंते चरमे जन्मनि सर्व
सत्कर्मविपाकरूपे वासुदेवः सर्वमिति ज्ञानवान्मां निरुपाधिप्रेमा
स्पदं प्रपद्यते सर्वदा समस्तप्रेमविषयत्वेन भजते सकलमिदमहं च
वासुदेव इति दृष्ट्या सर्वप्रेम्णां मय्येव पर्यवसायित्वात् अतः स एवं
ज्ञानपूर्वकमद्भक्तिमान्महात्मा स्वेन सुदुर्लभः कल्याणाज्जीवन्मुक्तः
सर्वोत्कृष्टो न तत्समोऽन्योस्त्य[illegible]धिकस्तु नास्त्येव अतः स दुर्लभः
मनुष्याणां सहस्रेष्वितिवद्विनापि लब्धुमशक्यः अतः स निरतिशय
मत्प्रीतिविषय इति युक्तमेवेत्यर्थः १९ तदेवमा[illegible]तादिभक्तत्रयापे
क्षया ज्ञानिनो मद्भक्तस्योत्कर्षः तेषां ज्ञाने निष्पन्नैकभक्तिविशिष्ट
तरत्वादन्यत्रयस्य ज्ञानिनो व्याख्यातः अधुना तु सकामत्वे भेददर्शित्वे च समेपि
देवतांतरभक्तापेक्षया आर्तादीनां त्रयाणां स्वभक्तानामुत्कर्षः उदाराः स
र्व एवैत इत्यत्र अज्ञानिनो भगवता व्याख्यायते यावदध्यायसमाप्ति
समानेप्यायासे सकामत्वे भेददर्शित्वे च मद्भक्ता भूमिकाक्रमेण सर्वो
त्कृष्टमोक्षाख्यं फलं लभंते क्षुद्रदेवताभक्तास्तु क्षुद्रमेव पुनः पुनः
संसरणरूपं फलं अतएव सर्वेप्यज्ञानिनः सर्वोर्थार्थिनस्मामेव प्र
पन्नाः समानायासेन सर्वोत्कृष्टमोक्षाख्यं फलं लभंतामित्यभिप्रा
यः परमकारुणिकस्य भगवतः तत्र परमपुरुषार्थफलमपि भगव
द्भजनमपेक्ष्य क्षुद्रफले क्षुद्रदेवताभजने पूर्ववासनाविशेष एवासा
धारणो हेतुरित्याह ॥

सदानन्दीटीका

पुण्योपचयहेतूनां बहूनां जन्मनामंततः पुण्यपुंजविपाके तु चरमे ज
न्मनि स्वयं १ वासुदेवः सर्वमिति ज्ञानवान्स तदार्थीः परप्रेमास्पदं
मां च सर्वदानन्यमानसः २ सर्वप्रेमास्पदत्वेन भजते मद्रूपश्च सन्
अतः स एवं मज्ज्ञानपूर्वकप्रेमवानपि ३ महात्मा स्वेन सुदुर्लभोनर्मना
ब्रह्मात्मनत्वहक् सर्वोत्कृष्टो न तत्तुल्योऽधिको वान्यो न कश्चन ४
मनुष्याणां सहस्रेष्विति वा पि समाप्यकैः अशक्योपलब्धुमेतस्मा
न्ममातीव प्रियो मतः ५ ॥ १९ ॥

गी॰
टी॰
स॰

नीलकंठीटीका

किंच वासुदेवःसर्वमितिज्ञानवान्योबहूनांजन्मनामंतेचरमजन्मनि
मांप्रपद्यतेसम्यग्दर्शनेनापरोक्षीकरोति समहात्मात्रसभूतःसुदु
र्लभइतियोजना १९ ॥

आनंदटीका

अथपरांज्ञानकाष्ठामनवाप्योपायं तत्प्रयत्नेपवमततत्त्वज्ञस्यकावस्थेत्याशं
क्याह ॥ प्राप्यपुण्यकृतांल्लोकानित्यादिप्रागुक्तयोगसिद्धिनयत्नाभ्यासात् अतीत
जन्मसुवासनानवच्छेदात् बहूनांजन्मनामंतेउत्तरोत्तरंसत्त्वशुद्धिसंप
त्त्यावासुदेवःसर्वमितिज्ञानवान्वसंत्यस्मिन्नधिष्ठानेसर्वाणिभू
98 तानिवसतिचांतर्यामित्वेनसर्वेषुभूतेष्वितिवासुदेवः दिवुक्रीडावि
जिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकांतिगतिष्वित्यतोद्युत्य
त्याक्रीडनादिमदर्थकः वसुश्चासौदेवः वासुदेवःसर्वकार्यकारणा
दिप्रपंचतयास्थितइतिपरमांज्ञानकाष्ठांप्राप्तःमांप्रपद्यतेमय्येवायु
ष्यमाप्नोति यस्त्वेवंमांप्रपन्नःसमहात्मा ब्रह्मीभावेनमहत्त्वंप्राप्त
आत्मायस्येदृशःसुदुर्लभः तज्जन्मयोगानुष्ठाने तद्विपाकानुगुणा
नामेवाभिव्यक्तिर्वासनानांजातिदेशकालव्यवहितानामप्यानंत
र्यंस्मृतिसंस्कारयोरेकरूपत्वादिति अस्यार्थः यथानुभवास्तथासंस्का
राश्चकर्मवासनानुरूपाः यथाचवासनास्तथास्मृतिरिति जातिदे
शकालव्यवहितेभ्यः संस्कारेभ्यःस्मृतिःस्मृतेः पुनःसंस्कारइति
तेषामनादित्वमाशिषोनित्यत्वादिति इहहिनिजप्रकृत्यनुरूप
ज्ञःस्वस्यप्राप्ताभावस्याप्राप्यानुभयरूपानवधारणेनवर्तीति
तासांदियरोभवतिततोवधारितंतत्त्वरूपस्याद्विज्ञसत्त्वस्यायंप्रकारो २४
दर्शितः १९ ॥

रामकंठीटीका

यतोयुक्तात्मामय्येवसमाहितांतःकरणोयमतः ॥
अनेनत्वादवस्थान्तवाभूयसाजन्मनांशरीरपरिग्रहाणामंतेपरिक्षये
सर्वमिदंचराचरभावजातंपरमार्थसततनिर्विकारसामान्यसंविद्रू
पोभगवान्सर्वत्रवसनात्सर्वस्यवात्रवसनाद्वासुदेवइतिसर्वोहृय
त्वनिश्चयेनमांपरमकारणंप्रतिपद्यते सचैवंविधःसर्वोत्कृष्टस्वभा

वः सततं दुर्लभो दुष्प्रापो मनुष्यकोटिष्वपि कदाचिन्नादृशो महानुभा
वो लभ्यते न वा [illegible]
[illegible] १९ ॥

लासिकी [illegible]टीका

ननु भगवता तादृशार्थिनस्तु सकाशाज्ज्ञानिनो विशेषो जिज्ञासोः स
काशात्तु न युक्तः ज्ञानप्रथमभूमिकाधिष्ठानादित्यत आह ॥
बहूनां जन्मनां बोधनात्तत्पाणिलिंगशरीरपरिग्रहाणामन्ते मो
क्षाधिष्ठाने चरमे जन्मनि यत उत्तरं तु शरीरपरिग्रहाः तस्मिंज
२ न्मनि श्रेष्ठेन लक्षणज्ञानवान् जीवन्मुक्तो मामीश्वरं प्रतिपद्यते स
र्वात्मभावेन प्राप्नोति शुकादिवत् कथं वासुदेवः सर्वमिति स
र्वत्र वसनात्सर्वस्य वा तत्र वसनाद्वासुदेवः श्रीभगवानहं सर्वमि
दं चराचरभावजातमित्येवं यदुक्तं श्रीकाण्ड्यां शिवाय वत्तिपर्य
न्तं भावाभावोपबृंहिते सर्वे शिवमयं ध्यात्वा भूयो जन्मन चाप्नुया
दित्यनेन श्लोकेन पुरुषसमदृष्ट्यपरुद्धविधापरपर्यायज्ञानयोगल
क्षणमुक्तं एवंवेत्यात्मस्वरूपत्वस्य जीवन्मुक्तस्य प्राणा नोत्क्राम
न्ति तथा च श्रुतिः न तस्य प्राणा उत्क्रामन्ति अत्रैव समवलीयन्ते
इति तत्तल्लब्धबुद्धिरपि जिज्ञासुरेवं मां प्रतिपद्यते तस्माद्धैतलक्ष
णज्ञाने क्वोरेव सर्वथा भेदाविगलनात् इत्यतो जिज्ञासोः सकाशा
त्तस्यैव विशिष्टं अतः स महात्मा महान्सर्वव्यापी आत्मा यस्य सोऽप
रिच्छिन्नदृष्टिर्जीवन्मुक्तः सर्वोत्कृष्टतनतत्समोऽन्योऽस्ति अधिक
स्तु नास्त्येव अतः सुदुर्लभः योगिष्वपि मध्ये तादृशो महानुभावो
लभ्यते न वेति १९ ॥

पंचोलीटीका

ज्ञानिनं पुनरपि स्तौति बहूनामिति ज्ञानवान्प्राप्तपरिपाकज्ञानः
बहूनां जन्मनामंते बहुजन्मोपार्जितात्मज्ञानसंस्काराणां समा
प्तौ मां वासुदेवः सर्वमिति प्रपद्यते स महात्मा सुदुर्लभस्तत्समो
धिको नास्ति १९

एतादृशस्य कर्मयोगी अतिदुर्लभ इत्याह बहूनामिति यः कर्म
योगी बहूनां जन्मनामंते अवसाने ज्ञानवान् स्वोचितकर्मणि दृढ
निश्चयरूपज्ञानविशिष्टो वासुदेवः सर्वगः सर्वाश्रयश्च परमेश्व
रः सर्वसाध्यं सिद्धं संपादयिष्यतीति बोधः इत्यनया बुद्ध्या मां प्रप
द्यते शरणीकुरुते स सुदुर्लभः मनुष्याणां सहस्रेषु दुःखेना
पि लब्धुं न शक्यते इत्यर्थः बहूनां जन्मनामंते इत्यनेन चैतद्ध्व
न्यते बहुजन्मार्जितपुण्यपरापुञ्जोदयात्तादृशस्वजात्युचितशुद्धा
दिकर्मविषयकनिश्चयदार्ढ्यमुत्पद्यत इति १९ ॥

मधुभाष्य

१९ ॥

भाषाअनुवाद

ऐसे भक्त अति दुर्लभ यह कहते हैं कि अनेक जन्मसे कछु कछु उपाए संचित कहे इकट्ठी होने से शेष जन्ममे तत्वज्ञानी होयकर यह जो चराचरात्मक कहे स्थावरजंगम रूप ब्रह्मांड सो सम्पूर्ण एक वासुदेवमात्र है इस प्रकार सर्वत्र आत्म दृष्टिके द्वारा हमको भजता है अपरिच्छिन्न कहे अबाधित दृष्टिसे ऐसा महात्मा ज्ञानी दुर्लभ है १९ ॥

दोहा

बहुतजन्मके अंतमोहि ज्ञानी प्रापत होय वासुदेव यह सर्व
है दुर्लभ महात्मा सोय १९॥

100

कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यंतेऽन्यदेवताः तं तं नि
यममास्थाय प्रकृत्या नियताः स्वया २० ॥

शांकरभाष्यं

कामैस्तैस्तैः

आत्मैव सर्वो वासुदेव इत्येवमप्रतिपत्तौ कारणमुच्यते कामैरिति पु
त्रपशुस्वर्गादिविषयैर्हृतज्ञाना अपहृतविवेकविज्ञानाः प्रपद्यंते
दा अन्यदेवताः प्राप्नुवंति वासुदेवात्मनोऽन्यादेवतास्तं तं नियमं देवता
राधने प्रसिद्धो यो यो नियमस्तं तमास्थायाश्रित्य प्रकृत्या स्वभावेन ज
न्मांतरार्जितसंस्कारविशेषेण नियता नियमिताः स्वया आत्मीयया १०

आनन्दगिरिकृतटीका

किमिति तर्हि सर्वे सर्वप्रत्यग्भूतं भगवंतं यथोक्तज्ञानं नोपेतीत्याशंक्य
न मामित्यत्रोक्तं हृदि निधाय ज्ञानानुदये हेत्वंतरमाह आत्मैवेति
कामैस्तैस्तैर्विविधैरपहृतविवेकज्ञानस्य देवतांतरनिष्ठत्वमेव प्रत्य २
ग्भूतपरदेवताप्रतिपत्त्यभावे कारणमित्याह कामैरिति देवतांत
रनिष्ठत्वे हेतुमाह तं तमिति प्रसिद्धो नियमो जपोपवासप्रदक्षि
णानमस्कारादिः नियमविशेषाश्रयणे कारणमाह प्रकृत्येति १०

२ तदेवं कामिनोपि संतः काम

स्वामिकृतटीका

यमयेवं मां परमेश्वरमेव ये भजंति ते कामान्प्राप्य पुनर्मुच्यंत
इत्युक्तं ये त्वत्यंतं राजसास्ते काम्यमानाः कामाभिभूताः क्षुद्रदेवताः सेवंते

हरंती २ पाह २

कामैरिति चतुर्भिः तैस्तैः पुत्रकीर्तिशत्रुजयादिविषयैः कामैरप
हृतविवेकाः संतः अन्याः क्षुद्राः भूतप्रेतयक्षादिदेवता भजंति किं
कृत्वा तत्तद्देवताराधने यो यो नियम उपवासादिलक्षणं तं तं नियमं
स्वीकृत्य तत्रापि स्वकीयया प्रकृत्या पूर्वाभ्यासवासनया नियता वशी
कृताः संतो देवताविशेषं ये भजंति ॥

पिशाचभाष्यं

कामैर्बहुविधैः अपहृतज्ञानाः प्रपद्यंते आश्रयंते अन्यदेवताः मदति
रिक्तास्तं तं नियमं व्रतमास्थाय आश्रित्य प्रकृत्या स्वभावेन नियता व
शीकृताः स्वया आत्मीयया १० ॥

रामानुजभाष्यं

गी॰
टी॰
स॰

न स्वज्ञानितोऽत्यन्तं भक्तमेवोपपादयति कामैरिति कामैः सर्वैः प्रवाहलौकि
काः पुरुषास्त्वया प्रकृत्या वासनया ज्ञानया भावविषया नियता नित्याः
नित्यैस्तैस्तैः स्ववासनानुरूपैः प्राप्तैरेव कामैरिक्षुविषयभूतैर्हृतमत्स्व
रूपविषयज्ञानास्तत्कामसिद्ध्यर्थमन्यदेवता मद्व्यतिरिक्ताः केवलेन्द्रा
दिदेवतास्तं तं नियममास्थाय तत्र देवताविशेषमात्रप्रीणनायासाधारणं
नियममास्थाय प्रपद्यन्ते तामेवाश्रित्य चिन्तयन्ति चित्रमत्स्वरूपसंश्रयन्ते २०

10

अभिनवगुप्तकृतटीकायामुपक्रमं २० त्रयाविंशतो उक्तार्थम्

स्पष्टार्थम्

परमार्थप्रपाटीका

अयतदितरानाह कामैस्तैस्तैर्हृतज्ञाना इति चतुर्भिः तैस्तैः पुत्रकलत्रमित्रगणानुजयादि
विषयैः कामैरपहृतविवेकाः सन्तः अन्यं माहिलक्षणाः सर्वैश्वर्यं सर्व
ज्ञत्व सर्वान्तर्यामित्वादिसामर्थ्यवर्जिताः रुद्राभूतप्रेतयक्षादिदेवताः
भजन्ति किं कृत्वा तत्र देवताराधने यो यो नियम उपवासादिलक्षण
स्तं तं नियममास्थाय स्वीकृत्य तत्रापि स्वकीयया प्रकृत्या पूर्वाभ्यास
वासनया नियता वशीकृताः सन्तो देवताविशेषं भजन्ति [illegible] २०

वनमालीटीका

ज्ञानिन उत्कर्षमुक्त्वा सकामानां त्रयाणां त्वभक्तानां देवतान्तरभक्तेभ्य उत्क
र्षं सर्वैरनिष्पत्ति ज्ञा उत्कर्षो विविच्यते यावदध्यायसमाप्ति अयासितद्देस्य
पि मद्भक्ताः क्रमेण सर्वान्तर्हर्षमोलाश्च फलं लभन्ते तद्देवताभक्ता
स्तत्तदीमव पुनः संसृतिरूपं फलं न तु परमपुरुषार्थफलकं भगवद्भ
जनमपि तत्फले तद्देवताभजने पूर्ववासनाविशेषापवा साधा
रणो हेतुरित्याह कामैरिति मोहन स्तंभन मारण कर्षण वशीकरण
उच्चाटनादिविषयकैः कामैः तैस्तैरभिलाषैर्भगवत्सेवया लब्धुमशक्यैर्
तैं॰ नतास्तैस्तैर्हृतमपहृतं भगवतो वासुदेवाद्विमुखीकृतं तत्फलदात
त्वाभिमतत्वं तद्देवतासु अभिमुखीनीनतानमंत्रः करणा येषां तेऽन्यदेव
न्य॰ ताः सर्वस्वरूपात्मनो देवतान्तरं तं तं नियमं जपोपवासप्रदक्षिणानमस्कारा यि॰
दिरूपं तत्र देवताराधने प्रसिद्धमास्थायाश्रित्य प्रपद्यन्ते भजन्ते तद्देवद
वतानामध्येपि के चित्वाचिदेवभजने तत्तया प्रकृत्या नियतः आस

धारणायाः पूर्वाभ्यासवासनया रजोगुणादिप्रभृत्या वशीकृतात्मानः संतः २०॥

जत्तमवैजयंतीटीका

प्रातीत्यत्वेवंविध तानाभावाच्छीघ्रफलप्राप्तिकामनयादेवांतरमप्युप
सरंतीति दर्शयन् तस्य तुल्यभक्तत्वमाह कामैरिति तैस्तैः तिन्ति दृष्टादृष्टरूपैर्जि
स्ताV ता रूपैश्वर्यप्राप्तिरूपैः स्वकामैरभिलाषैर्हृतज्ञानाः हृतं नष्टमन्तःकरण
णमात्रत्वादिविषयकं ज्ञानं येषां ते तथा शिवपत्र सज्ञानभक्त्यादिल
ताणाज्ञोर वचनतश्चादिदाज्ञोगाणोशपवमंगलदाताविघ्नहर्ता चर
११V णीसर्वरोगादिहर्ता विशुः चिरकालसेवया कथंचित् दिप्रसन्नो भव
तिन तु विष्णुः किमप्यभीष्टं न ददाति प्रत्युत धनपुत्रादिकं सर्वं नाशयत्य
तोऽस्योपासनेन किं फलं स्यादित्येवं तच्छुद्धहृदयत्वार्थः पर्वं त तत्ता
भवंती मे पेत्यायामाह यतः स्वया स्वकीयया प्रकृत्या अनादिराज
सतामसकर्मजनितवासनाजन्यस्वभावरूपया नियताः यन्त्रिताः
तं तं व्रतोपवासजपपूजाप्रदक्षिणाप्रणिपातादिरूपमसाधारणं नि
यममास्थायाश्रित्यान्यदेवताः मदन्याः शिववगाज्ञिविनायकसू
र्यादीनामाशुतोषकोपानलवत्फलदान्देवान्प्रपद्यंते तंश्रयंते ते
षां ताहशीप्रकृतिरेव याचिंत्या विनमस्त्वरूपमाकाशमतो विमुखान्
करोतीत्यभिप्रायः २० ॥

मधुसूदनीटीका

मोहनस्तंभनाकर्षणा[illegible]वशीकरणमारणोच्चाटनादिविषयैर्भगवत्से
Vश्री वयालब्धुमशक्यैस्तैस्तैः क्षुद्रैः कामैरभिलाषैर्हृतमपहृतं भ
गवतो वासुदेवाद्विमुखीकृत्य तत्फलदातृत्वाभिमतक्षुद्रदेवताभि
मुखीनीतं ज्ञानमन्तःकरणं येषां ते न्यदेवताः भगवतो वासुदेवादन्याः
क्षुद्रदेवताः तं तं नियमं जपोपवासप्रदक्षिणनमस्कारादिरूपं तत्तद्दे ^न
वताराधने प्रसिद्धं नियममास्थायाश्रित्य प्रपद्यन्ते भजन्ते तत्तद्रूपफल ^देवता
नोंV ग्रामीकृत्याहं देवतामध्येऽपि केचित्कांचिद्देवं भजन्ते स्वया प्रकृत्या ^
Vवास नियताः असाधारणया पूर्वाभ्यासेन या वशीकृताः संतः २०
[illegible]
[illegible] तिगमिकान ॥
नैर्द्योतीयफलः [illegible]

102

सदानंदीटीका

एवमार्तादिभक्तानांमध्येज्ञानीविशिष्यते इत्युक्तमधुनातेपिज्ञलभाग्या-
न्यभक्तान्‌ १ सकामत्वेनतथाभेददर्शित्वेचसमोपिहि देवतांतरभक्तेभ्यः
स्वभक्तानामुदारता १ प्रतिज्ञातातथापिसेवसम्यग्व्याख्यायतेततः यतः
समानेप्यायासेत्वल्पभक्ताःक्रमाणाच ३ सर्वोत्कृष्टंचमोक्षाख्यंलभंतेफ-
लमव्ययं येत्वन्यदेवताभक्ताह्यल्पमेवपुनःपुनः ४ फलंसंसरणात्मे-
वलभंतेमंदभाग्यतः पुरुषार्थफलंश्रीशभजनंसमपेक्ष्ययत् भज-
नंत्वन्यदेवानांतत्रकारणमुच्यते पुत्रपश्वादिविषयैःकामैस्तैस्तैरन-
श्वरैः ६ तैस्तैर्भगवतोमत्तोविमुखीकृत्यमानसंत्वन्यदेवाभिमुख्यंच
नीतंयेषांसरागिणां ७ तत्तत्फलप्रदात्वाभिमतायास्यदेवता ता-
स्याआराधनेयोयःप्रसिद्धोनियमोभवेत्‌ ८ तंतंजपोपवासादिनि-
यमंसमुपाश्रिताः तत्तत्क्षुद्रफलप्राप्तिवांछयैवातिवंचिताः ९
आत्माधारणयास्वीयस्वभावेनयास्त्वया वशीकृताःपरित्यज्यमांभ-
जंतेन्यदेवताः १० ॥ २० ॥

नीलकंठीटीका

अन्येतैस्तैः कामैःपुत्रपश्वादिविषयैः हृतज्ञाना हृतंहृतीकृतंज्ञा-
नंविवेकोयेषांते अन्यदेवताः अहमेवतस्याआराधनेनेष्टफल-
मवाप्नवानीति भेदबुद्ध्याप्रपद्यंतेइंद्रादीन्‌ तंतंनियमंचतदुपु-
पवासादिकमास्थाय स्वयाप्रकृत्यावक्ष्यमाणविधयादैव्याआसु-
रीवानियताःनिगृहीताः २० ॥

आनन्दीटीका

अन्यस्यदर्शयति तैस्तैःकामैर्वक्ष्यमाणस्वभावोत्थैःशांतिकपौ-
ष्टिकाभिचाराभिलाषैःकाम्यविषयैःहृतज्ञाना अपहृतसत्त्वप्रका-
शाः अस्मान्मदाराध्यादिंद्रादेरपरःकर्मफलदःकश्चिदीश्वरोनास्ती-
तिमिथ्याज्ञानवंतःस्वयासात्मीययाप्रकृत्याहंकारिकयानामस्या-
नियंत्रितास्तमसःकार्येणाग्रहेणावशीकृताः तंतंनियमंशांति-
कादिकर्मणांसांगमास्थायान्याःपरमपरमेश्वरव्यतिरिक्ताः-

देहपितृभूतात्मिकादेवतास्तत्तत्कर्माधिष्ठात्रीः प्रपद्यंते [illegible]
कारमाह २० ॥

रामकंठीटीका

कस्मात्तथाविधः हड लेभ इत्यत्र स्वेच्छामात्रमेकं कारणं प्रतिपादयितुमाह ॥

इहयथोक्तप्रकारेणनानाजीवभूतमृत्यमहत्यात्मकाः पुरुषा अपि
कोऽप्यविनकार्यकारणभावयाप्रगुणात्मिकप्रकृत्यास्वया तत्तत्
रूपभेदेनप्रतिनियतकार्यकारणात्मतांप्रत्येकं स्वत्वमापन्नया
नियतानाप्रविभाक्तिदेहेन्द्रियविषयाद्यात्मकतयापरस्परभेदेन नि
यंत्रिताः संतः स्वस्वोपायात्मके प्राकृते रूपमेवात्मत्वेनप्रतिपन्ना
अतएवस्वत्वापन्नतत्तत्प्रकृतस्वचितैस्तैस्तैः क्रियाफलतयाप्राप्य
त्वेनकाम्यमानैः कामैर्भोगैस्तत्तल्लोकांतरभोग्यैर्हृतज्ञानास्त
त्त्वपरमार्थलक्षणैकतत्वविषयबोधाः संतोन्यदेवताः प्रत्यगा
त्मलक्षणपरमदेवव्यतिरिक्तहरिहरहिरण्यगर्भादित्यप्रभृ
तीस्तत्तत्स्वाभिमतनानाफलप्रदायित्वश्रुतप्रभावापरस्परभिन्ना
स्तत्तयागम्यमानाः प्रपद्यंतेभजंते कथंतेनतेनतद्रूपेणप्रसिद्धं
नियममितिकर्तव्यताविशेषरूपं व्यवस्थामाश्रित्यावलंब्य २०

लासिकी [illegible]टीका

नतेवंयेकामयमानायेपरमेश्वरमेवभजंतेकामात्माप्राप्यानैर्वचाते
इत्युक्तं येतुकामाभिभूताः क्षुद्रदेवताएवसेवंतेतेसंसरंतीत्याः
हचतुर्भिः ॥ येतुतैस्तैः पुत्रपशवादिविषयैः कामैरभिलाषैर्हृ
तज्ञानाम्रषितविवेकाः संतः तंतंतद्रूपेणप्रसिद्धंनियममिति
कर्तव्यताविशेषरूपमास्थायावलंब्यात्मात्मनईश्वराभिन्ना
द्विलक्षणादेवताः प्रपद्यंतेभजंते यतः स्वकीययाप्रकृत्यापूर्वा
भ्यासवासनयानियतावशीकृताः २० ॥

पंचोलीटीका

आत्मैवसर्ववासुदेवइत्येवमप्रतिपत्तौकारणमाह कामैरिति
स्वयाआत्मीययाप्रकृत्यास्वभावेनजन्मांतरार्जितसंस्कारविशे
षेणनियतानियमिताः देवताराधनोपायप्रसिद्धस्तंतंनियममा
स्थायआश्रित्यतैस्तैः कामैःपुत्रैश्वर्यादिस्वर्गविषयैः हृतज्ञानाः आ

हृतज्ञानाःआहृतविज्ञानाःअन्यदेवताःप्रपद्यंतेप्राप्नुवंति २०

रणवीरसमिद्धायिनी॥

103 कामैस्तैस्तैरिति तैस्तैः सर्वप्रतिपादितस्वरूपैरनेकविधैःका
मैर्मानसिकसंकल्पैर्हृतं दूरीकृतंज्ञानं निश्चयदार्ढ्यलक्षणं
येषांतेतथाविधाः कर्मप्रारभ्यप्रवर्तिपकनिश्चयात्मकज्ञान
वाकामादिभिः प्रसभंप्रतिकूलंनीताइतियावत् अन्यदेवताः
अर्थाक्षुद्रयक्षादिदेवतभूतान्मत्तःसकाशादितरादेवताअ
स्मादिकाःप्रपद्यंते किंकृत्वाप्रपद्यंते तंतंबहुप्रकारंनियम
जपोपवासप्रदक्षिणनमस्कारादिरूपमास्थायाश्रित्यकीदृ
शास्ते स्वयाप्रकृत्यास्वकीयेनस्वभावेनराजसलक्षणेनेति
यावत् नियतावशीकृताः यद्वा तैस्तैर्बहुविधैरुच्चाटनादिवि
षयैःकामैरभिहृतज्ञाना वासुदेवात्क्षुद्रयक्षादिदेवताक्षुद्रयक्ष
फलदायकाःप्रत्यावर्तितांतःकरणाःसंतः अन्यदेवताः वा
अभिनवगुप्ताचार्यकृतटीका सप्तार्थम्

[illegible] नतुचकर्माण्येवक्रियमाणानिप्रलय
[illegible] मोहंविदधति [illegible] किमितिमाहप्रलय [illegible]
[illegible] २६ ॥

परमार्थप्रपाटीका

तदेवंस्वस्यसर्वोत्तमत्वमनावृतज्ञानशक्तित्वंदर्शयति ॥

वेदाहमिति॥ समतीतानिअतिक्रांतानिवर्तमानानियथाभविष्याणिएवंत्रिकाल
वर्तीनिभूतानिस्थावरजंगमात्मकानिसर्वाण्यहंवेदजानामिमाया
श्रयत्वान्मम तस्याश्चाश्रयव्यामोहकत्वाभावात् मांचकोपिनवेत्ति
मन्मायामोहितत्वात्मायायाःस्वाश्रयाधीनत्वमन्यमोहकत्वंप्रसिद्ध
मेव २६ ॥

वनमालीटीका

मायायामदधीनत्वेनाहं नित्याप्रतिबद्धज्ञानइत्याह वेदेति अहं
कालत्रयाप्रतिबद्धसर्वविषयकज्ञानोमया यासर्वोलोकोमोहयत्न
पिसमतीतानिचिरविनष्टानिवर्तमानानिभविष्याणिचैवंकाल
त्रयवर्तीनिभूतानिस्थावरजंगमानिसर्वाणिवेदजानाम्यतोहंसर्व
ज्ञःपरमेश्वरोमांसर्वदर्शिनंमायास्वामिनंमायाविनमिवतन्मायया
मोहितःकश्चनकोपिमदनन्यशरणभाजनंमद्भक्तंविनानवेद मन्मा

यामोहितत्वात् अतो मत्तत्त्वज्ञानाभावादेव जीवा मां न भजंत इति
भावः २६ ॥

अह्मवैजयंतीटीका

ननु यदि त्वमपि योगमायावृतोऽसि नहि यथा मायावृतो जीवो ज्ञानी स्या
त्तथा किं त्वमपि भवसीति चेत्तत्राह वेदाहमिति हेऽर्जुन समतीतानि भू
तकालवर्तीनि च पुनः वर्तमानानि वर्तमानकालवर्तीनि च पुनर्भ
विष्याणि अनागतकालवर्तीनि निखिलानि भूतानि चेतनरूपाण्य
चेतनरूपाणि च सर्वज्ञो मायापतिः सन्नहं वेद जानामि कश्चन को
ऽपि पुरुषः सर्वकारणं सर्वोत्तमं सर्वज्ञं सर्वनियंतारं सर्वेषामप्येके
यशोदाऽधमरनिकरैर्वंद्यपादारविंदं जगदुद्धरणाय भूभारावतारणा
य च वसुदेवगृहेऽवतीर्णं सर्वसमाश्रयणार्थं धृतानि कमनीयवि
ग्रहमेवंभूतं सर्वेश्वरं मां न वेद न जानाति तद्गुणहीनयः कश्चिदित्थं
भूतस्वरूपं मां वेद स तु कोटिषु ध्यानिज्ञानिभोऽस्तीति सूचितम् २६
अतो मायया स्वाधीनया सर्वव्यामोहकत्वान्मम स्वस्य चाप्रतिबद्धज्ञानात् ॥

मधुसूदनीटीका

अहमप्रतिबद्धसर्वज्ञानः मायया सर्वान् लोकान्मोहयन्नपि सम
तीतानि चिरविनष्टानि वर्तमानानि च भविष्याणि चैव कालत्रयव
र्तीनि भूतानि स्थावरजंगमानि सर्वाणि वेद जानामि हेऽर्जुन अ
तोऽहं सर्वज्ञः परमेश्वर इत्यत्र नास्ति संशय इत्यर्थः मां तु [illegible]
न्ममनिबंधज्ञाननार्थः मां सर्वदर्शनमपि मायाविनमिव तन्मा
यामोहितः कश्चन कोऽपि मदनुग्रहभाजनं मद्भक्तं विना न वेद म
न्मायामोहितत्वात् अतो मत्तत्त्ववेदनाभावादेव प्रायेण प्राणिनो
न मां भजंत इत्यभिप्रायः २६ [illegible]
[illegible]
[illegible] ॥

सदानंदीटीका

मम स्वाधीनया एतया मायया मोहितो जनः नाभिजानाति मामी
शं सगुणं निर्गुणं तथा १ ममेश्वरस्य विज्ञानं प्रति विभाति नैव सा
मदायत्ता न मद्भिन्ना मकं पाकान्यपाक्रिवत् १ मायाविनो यथान्य

स्वमाययानप्रतिबंधिका तथामेहायोगमायाममायत्वान्नास्तिसर्वज्ञः इ
त्याहभगवान्स्वीयभक्तानांबोधहेतवे अहंसर्वेश्वरोलोकान्मायया
मोहयन्नपि ४ अतिक्रांतानिभूतानिवर्तमानानिसर्वशः भविष्या
णिचजानामिकालत्रयगतान्यपि ५ अतःपरमसर्वज्ञोमायावी
परमेश्वरः अहमस्म्यत्रसंदेहोनकार्योभवतार्जुन ६ मदनुग्रहपा
त्रंवैमद्भक्तंसद्गुणंविना कोपिवेदनमांलोकोमन्मायामोहितत्वतः
मनत्ववेदनाभावोभजंतेमानमूढधीः योजःश्रुतानिसकलंहृ
दिवाचिवर्तीयवीन्निनैवविधिहरद्भवतेहिकोपि येनाततंनिखिल
निv मेवनमंयस्मैदेवायतोजगदिदंनमनंभजेहं ७ २६ ॥

नीलकंठीटीका

ननुत्वद्भिन्नंलोकंत्वन्मायामोहयतिचेत्त्वांकुतोनमोहयतीत्यत
आह वेदाहमिति [illegible] तत्वापिलोकस्यममचाभेदेप्यौपाधिकभे
दस्यसत्वात् उपाधिधर्माभिमानित्वाल्लोकोमूढः तदभावाच्चाहं
सर्वज्ञइतिविरोधः अन्यत्स्पष्टः २६ ॥

आनंदटीका

स्वस्यैश्वरात्मतांदर्शयति ॥ २६ ॥

स्पष्टम् २६ ॥

रामकंठीटीका

शरीराणांनित्यप्रकृतिपरिणामपर्यवसितानां [illegible]हंप्रत्ययत्वात्सर्वतो
वक्त्रेदवंतीवेघदराणामापन्नान्यतएवातीतवर्तमानभविष्यद्विधा
नानिभूतानिशरीराणिअहंपरमार्थवेदकस्वभावएकएववेदजाना
मिमांतुनतित्यत्वात्कालकलाधवक्त्रेदविरहितमहिमानंनकश्चित्कु
रीवेदजानाति इत्यनेनाःनन्यसाधारणंवेदकैकस्वभावत्वंपरस्य
कारणस्य तत्कार्यस्यचजगतस्तद्व्यतिरिक्तस्वरूपस्यवेद्यत्वमेवप्रति
पादितं [illegible]नवेदकश्चिदित्याह २६ ॥
२६

लासिकी

धनपतीटीका

ननुतवापियोगमायासमावृतत्वेनज्ञानप्रबंधावरणप्रसक्तिःस्यादि

127

त्वाह ॥ अहमीश्वरस्त्रिकालवर्तीनि सर्वाणि भूतानि स्थावरजंग
मात्मकानि जानामि अतो न मम ज्ञानशक्तेरावृतत्वं मायाश्रयत्वा
न्मम तस्याः स्वाश्रयव्यामोहकत्वाभावात् तदुक्तं आश्रयत्ववि
षयत्वभागिनी निर्विभागचितिरेव केवला पूर्वसिद्धतमसो हि
पश्चिमो नाश्रयो भवति नापि गोचर इति ततः पदेनैकश्चन को
पि मद्भक्तमहं भाजनं मद्भक्तं विना मामीश्वरं न वेद न जानाति म
न्मयामोहितत्वात् प्रसिद्धं हि लोके मायायाः स्वाश्रयाधीनत्व
मन्यव्यामोहकत्वं च २६ ॥

पैशोलीटीका

मदीया माया मदीयं ज्ञानं न प्रतिबध्नाति अन्ये मायाविन इवेत्या
ह वेदाहमिति हे अर्जुन अहं भूतानि समतीतानि समतिक्रान्ता
नि तथा वर्तमानानि भविष्याणि च वेद जानामि तु पुनः मद्भक्तं वि
ना कश्चिन्मां न वेद २६

भ्रतावीरसमिद्धोधिनी ॥

अथ स्वात्मनः पारमेश्वर्यं त्रैकालिकज्ञानवत्त्वेनान्येषामात्मवि
षयकज्ञानप्रतियोगिकाभावाश्रयत्वेन च दर्शयति वेदाहमि
ति हे अर्जुन अहं स्वमायया सर्वलोकमोहयित्रापि समतीता
नि चिरविनष्टानि वर्तमानानि भविष्यन्ति चेत्येवं कालत्रयवर्ती
नि भूतानि स्थावरजंगमानि सर्वाणि वेद जानामि ततस्मादहं स
र्वज्ञः सर्वेश्वरश्चास्मीति निःसंशयं मां तु सर्वज्ञमपि कश्चिदपि
न वेद न जानाति यन्मायामोहितत्वात् मद्भक्तं विनेति शेषः
अयं भावः मत्स्वरूपानभिज्ञानेनैव न मां भजन्तीति २६ ॥

मधुभाष्य

वेदेति न कश्चनातिसमर्थोपि स्वसामर्थ्यात् इहमोहेन सर्वजडः
स्वादिविषयमोहेन इच्छाद्वेषयोः प्रद्वंद्वयोर्नेदि किं विज्ञातं प्राक

128

कारणांतरमेतत् सर्गेसर्गकाले प्रारभ्यैव प्राणीवेदिसतीच्छा
दयः सर्वविज्ञानमात्रं विपरीताश्चके वित्संतीत्याद २८॥

भाषानुवाद

मेरी सर्वोत्तम स्वरूपको अज्ञानी लोग नहीं जानते यह जो पूर्व
में कहा सोई स्वस्वरूपकी उत्तमता औ अनावृततत्तान रूपसे दे
खावने जये औरों की अज्ञानता कहतेहैं कि जिस हेतु हे अर्जु
न हम मायाके आश्रय हैं इससे भूतकाल वर्तमान काल औ
भविष्यतकाल इन तीनो काल के वर्ती चराचर सब को हम
जानतेहैं क्यो कि माया अपने आश्रय को मोह नहीं कर
सकती है परंतु मेरी मायासे मोहित कोई भी हमे नहीं जा
नि सके है माया अपने आश्रय के अधीन तथा औरोंको मो
हती है यह प्रसिद्ध है २६ ॥

दोहा

जानों भूत भविष्यको वर्तमानहों सोय सभी भूतको अर्जुन मो
कहूं जानत कोय २६ ॥

129

इच्छाद्वेषसमुत्थेन द्वंद्वमोहेन भारत सर्वभूतानि संमोहं सर्गे यान्ति परंतप २७ ॥

शांकरभाष्यं

केनपुनस्त्वद्वेदनप्रतिबंधेन प्रतिबद्धानि संति जायमानानि सर्वभूतानि त्वां न विदंति इत्यपेक्षायामिदमाह इच्छेति इच्छाद्वेषसमुत्थेन इच्छा च द्वेषश्च इच्छाद्वेषौ ताभ्यां समुत्तिष्ठतीति इच्छाद्वेषसमुत्थस्तेन इच्छाद्वेषसमुत्थेन केनेति विशेषापेक्षायामिदमाह द्वंद्वमोहेनेति द्वंद्वनिमित्तो मोहो द्वंद्वमोहस्तावेव इच्छाद्वेषौ शीतोष्णवत् परस्परविरुद्धौ सुखदुःखतद्धेतुविषयौ यथाकालं सर्वभूतैः संबध्यमानौ द्वंद्वशब्देनाभिधीयेते तत्र यदा इच्छाद्वेषौ सुखदुःखतद्धेतुसंप्राप्त्या लब्धात्मकौ भवतस्तदा तौ सर्वभूतानां प्रज्ञायाः स्ववशापादनद्वारेण परमार्थात्मतत्त्वविषयज्ञानोत्पत्तिप्रतिबंधकारणं मोहं जनयतः नहीच्छाद्वेषदोषवशीकृतचित्तस्य यथाभूतार्थविषयज्ञानमुत्पद्यते बहिरपि किमुवक्तव्यं ताभ्यामाविष्टबुद्धेः संमूढस्य प्रत्यगात्मनि बहुप्रतिबंधे ज्ञानं नोत्पद्यत इत्यतस्तेनेच्छाद्वेषसमुत्थेन द्वंद्वमोहेन भारत भरतान्वय सर्वभूतानि संमोहितानि संति संमोहं संमूढतां सर्गे जन्मनि उत्पत्तिकाले इत्येतत् यांति गच्छंति हे परंतप मोहवशान्येव सर्वभूतानि जायमानानि जायंत इत्यभिप्रायः २७ ॥

आनन्दगिरीकृतटीका

भगवत्तत्त्वविज्ञानप्रतिबन्धकं मूलाज्ञानातिरिक्तं प्रश्नद्वारेणोदाहरति केनेत्यादिनाज्ञानाद्यहात् प्रतिबंधकांतरविवक्षा गम्यते अपरोक्षं चांतरप्रतिबंधकमिदमाहेत्युक्ते विशेषमाकांक्षापूर्वकं निर्दिशति केनेति विशेषापेक्षायामिति द्वंद्वशब्देन गृहीतयोरपि इच्छाद्वेषयोर्ग्रहणं द्वंद्वशब्दार्थोपलक्षणार्थमित्यभिप्रेत्याह तावेवेति तयोरपर्यायमेकत्वात्पुनरपि गृहीत्वा विशिनष्टि यथाकालं संभवमिति नच तयोरनधिकरणं किंचिदपि भूतं संसारमंडले संभवतीत्याह सर्वभूतैरिति तथापि कथं तयोर्मोहहेतुत्वमित्याशंक्या

गी॰
टी॰
स॰

130

हृ तत्रेति तयोराश्रयः समर्थः उक्तमेवार्थं कैमुतिकन्यायेन प्रपंच
यतिनहीति एहं भागानवादपूर्वक मुत्तरभागेन फलितमाह अत
इति प्रत्यगात्मन्यहङ्कारादिप्रतिबंधप्रभावतो ज्ञानेत्पत्तेरसंभवाऽ
नःपाह्यार्थः ज्ञानप्रयुक्तमहिम्ना स्वरूपशङ्कयाचयुक्तस्यैव यथोक्तप्र
तिबंधप्रतिविधानसामर्थ्यमिति द्योतनार्थं भारतपरंतपेति संबोधन
द्वय तत्वज्ञानप्रतिबंधप्रकृतमर्वानरकारणमुपसंहरति मोहेति
२७ ॥

स्वामिकृतटीका

तदेवं मायाविषयत्वात् जीवानां परमेश्वरज्ञानमुक्तं तस्यैवाज्ञानस्पष्टत्वेकारणमा

२७ ॥ ह इच्छेति सर्गः सर्गेस्थूलदेहोत्पत्तौसत्यांतदनुकूलेइच्छाप्रति
कूलेचद्वेषः ताभ्यांसमुत्थःसमुद्भूतोयःशीतोष्णसुखदुःखादिद्वंद्वनि
मित्तोमोहोविवेकभ्रंशः तेनसर्वभूतानिसंमोहंयान्ति अहमेवसुखीदुःखी यान्ति
चेतिगाढतरमभिनिवेशंप्राप्नुवंति अतस्तानिमत्ज्ञानाभावात्
मांनभजंतीतिभावः २७

पिशाचभाष्य

इच्छाद्वेषसमुत्थेनप्रकाशितेनद्वंद्वमोहेनसुखंमेस्यात्दुःखंमेमाभू
दित्येवमर्थरूपेणाद्वंद्वमोहेनसर्वाणिभूतानिसंमोहंभ्रमंसर्वेसर्गेयान्ति
परंतप २७ ॥

रामानुजभाष्य

तथाहीच्छेति इच्छाद्वेषाभ्यांसमुत्थेनशीतोष्णादिद्वंद्वाख्येनमोहेनसर्वभूता
निसर्गेजन्मकालएवसंमोहंयान्ति एतदुक्तंभवति इष्टमेवसुखदुःखः
खादिषुद्वंद्वेषुपूर्वंपूर्वजन्मनियद्विषयाविच्छाद्वेषौराग्द्वेषावभ्यस्तौत
दासनयापुनरपिजन्मकालएवतद्देवद्वंद्वाख्यमिच्छाद्वेषयत्वेनसमुप २८
स्थितंभूतानांसंमोहंभवतितेनमोहेनसर्वभूतानिसंमोहंयान्तितद्विष
यीनमत्संश्लेषवियोगैकसुखदुःखस्वभावाति ज्ञा
जायतइति २७ ॥ श्रीमत्स्वभावंकिमपिभूतं

श्रीमदभिनवगुप्ताचार्यकृतटीका

एवक्रियमाणानि प्रलयकाले २७ नतुचकर्मी
कि मिति महाप्रलय उपजायते इत्याशंकाया मोक्षं विद यति अत्यणा
मारभते इच्छाद्वेषेत्याद्यध्यायान्तेन २८

परमार्थप्रपाटीका

तदेवं जीवानां मायामोहितत्वेन परमेश्वराज्ञानमुक्तं तस्यैवाज्ञानस्य हेतु
त्वे कारणमाह इच्छाद्वेषेति सृज्यत इति सर्गः तस्मिन्सर्गे स्थूलदेहोत्प
त्तौ सत्यां तदनुकूले इच्छा प्रतिकूले द्वेषस्ताभ्यां समुत्पन्नो यः शीतोष्ण
सुखदुःखादिद्वंद्वनिमित्तो मोहो विवेकभ्रंशः तेन सर्वभूतानि संमोह
अहमेव सुखी दुःखी चेति गाढतराभिनिवेशं प्राप्नुवंति अतस्तानि मज्ज्ञाना
भावान्मां न भजंतीति भावः २७ ॥

वनमालीटीका

योगमायां भगवत्तत्त्वज्ञानप्रतिबंधे हेतुमुक्त्वा देहेंद्रियसंघाताभिमाना
निधायपूर्वकं भोगाभिनिवेशहेतुं तमाह इच्छेति इच्छाद्वेषाभ्या
मनुकूल[प्रतिकूल]विषयाभ्यां समुत्थेन शीतोष्णसुखदुःखादिद्वंद्वनिमित्तेन
मोहेनाहं सुखी अहं दुःखीत्यादिविपर्ययेण सर्वाण्यपि भूतानि संमो
हं विवेकायोग्यत्वं सर्गे देहस्थूलोत्पत्तौ सत्यां यांति न हीच्छाद्वेषग्र
हितं किंचिदस्ति न च ताभ्यामाविष्टस्य बहिर्विषयमपि ज्ञानं यथार्थं
संभवति किं पुनः परमार्थविषयकं अतो रागद्वेषव्याकुलचित्तत्वा
त्सर्वाण्यपि भूतानि मां सर्वेश्वरं सदानंदं गुणालयं वासुदेवं न जा
नंति न भजंते चेत्यर्थः २७ ॥

अथ वैजयंतीटीका

पुनरपि ज्ञानिनां मोहं दर्शयंस्तस्य ज्ञानिनोऽतिदुर्लभतां प्रतिपाद
यति इच्छाद्वेषसमुत्थेनेति हे भारत वंशज हे परंतप शत्रुतापने
ति संबोधनाभ्यां न चोत्तमकुलजन्मत्वाच्छत्रुतापनस्वभावत्वाच्चे
च्छाद्वेषात्मकपापानुविजये स्वल्पोऽपि प्रयासो न स्यादिति सूचितम् इच्छा
द्वेषसमुत्थेन इच्छाऽनुकूले विषये तृष्णापूर्वकं तत्प्राप्तिकामरूपा
द्वेषः प्रतिकूले विषयेऽप्रीतिपूर्वकं तज्जन्यानिष्टविचारस्ताभ्यां स
म्मोहं विशंतीति इच्छाद्वेषसमुत्थेन द्वंद्वमोहेन शीतोष्णसुखदु
दुःखाभिधानेन द्वंद्वेन निमित्तभूतेनोत्थितो यो मोहो वै विपर्ययरूप
स्तेन सर्गे स्वस्वोत्पत्तिसमय एव सर्वाणि ब्रह्मादिपिपीलिकांतानि
पाज्ञादीनि देवतांतरोपासकानि तन्मंत्राधिकियुक्तानि भूतानि च
मनुष्याणां संमोहं पुत्रकलत्रवित्तादिनेशतति अहमेवानि मंद

गी॰ टी॰ स॰

131

भागीति निरतिशयदुःखिमत्तोन्ये सर्वे जनाः सुखिनः सुखः पुत्रादिप्राप्तौ च मत्वा अहमेवमहद्भाग्यवान् इति निरतिशयसुखी मत्तोन्यः कोपि नास्तीत्येवंप्रकारेण निरतिशयदुःखजनकाभिनिवेशं यान्ति प्राप्नुवन्ति यस्मैते प्राकृतविषय स्त्रीपुत्रादीनां संयोगे सुखं वियोगे च दुःखं प्राप्नुवन्ति मत्संयोगे वियोगे च न तथा ज्ञानी तस्माद्यतो मे न हि योगे हानिमपि प्राणधारणं न करोत्यतो ज्ञानी तिष्ठतीति भावः २७ ॥

मधुसूदनीटीका

योगमायां भगवत्तत्त्वविज्ञानप्रतिबंधे हेतुमुक्त्वा देहेंद्रियसंघाताभिमानातिशयपूर्वकं भोगाभिनिवेशं हेतुं तत्र माह ॥

इच्छाद्वेषाभ्यामनुकूलप्रतिकूलविषयाभ्यां समुत्थितेन प्रीतोस्मि सुखवदुःखवादिद्वंद्वनिमित्तेन मोहेन अहं सुखी दुःखी इत्यादिविप र्ययेन सर्वाण्यपि भूतानि संमोहं विवेकायोग्यत्वं सर्गे स्थूलदेहोत्प त्तौ सत्यां यांति हे भारत हे परंतप निःसंबाधनहृदयस्य कुलमहिम्ना स्वरूपेणाऽनयावचनाद्वंद्वमोहाख्यः शत्रुर्नाभिभवितुमलमिति भावः नहीच्छाद्वेषरहितं किंचिदपि भूतमस्ति न च ताभ्यामाविष्टस्य बहिर्वि षयमपि ज्ञानं भवति किं पुनरात्मविषयं अतो रागद्वेषव्याकुलांतः करणत्वात् सर्वाण्यपि भूतानि मां परमेश्वरमात्मभूतं न जानंति अतो न भजंति भजनीयमपि २७ येहि सर्वभूतानि संमोहं यांति कथं तर्हि केचित्त्वां भजंते भगवानित्यत्र येषां त्वंतगतं पापमित्यादिना येन ते बंधेनापायनादित्याह ॥

सदानंदीटीका

मत्तत्त्ववेदनाभावान्मां भजंते नये जनाः रागद्वेषयहम्मत्ताभ्रमं त्वेतेऽजसंस्थिते १ भोगाद्यभिनिवेशेन सदेत्याह जगत्पतिः इच्छा द्वेषसमुद्भूतसुखवादिद्वंद्वहेतुना १ मोहेनाहं सुखी दुःखी त्यादि भ्रांतिमयेन च समस्तान्यपि भूतानि विवेकायोग्यतां पराः स्थू लदेहोद्भवे यांति हे भारत परंतप त्वं तु वंशमहिम्नैव द्वंद्वमोहा रिज्ञानकः ४ सुखदुःखादिसंभ्रम्या रागद्वेषोद्भवा यदा नदामो हं प्रयांत्येव सर्वभूतानि सर्वदा ५ नहीच्छाद्वेषदोषेणाविवशी कृतचेतसां बहिर्गोचरमप्यस्ति सम्यग्ज्ञानं भ्रमापहं ६ किंत्वा

गू॰

येनद्वन्द्वाभ्यांसमाविष्टधियांत्वेषां प्रत्यगात्मनिनज्ञानंसम्भवत्यप
पि २७ ॥

नीलकंठीटीका

केनपुनर्निमित्तेनतानीमानिभूतानिनजानंतीत्यपेक्षायामाह इच्छेति
^प्रीति इच्छारागःद्वेषस्ताभ्यांसमुत्थितोद्वंद्वमोहः शोभनाशोभनसत्यासत्य
नित्यानित्यात्मानात्मतत्त्वविपर्ययः अशोभने शोभनबुद्धिः शोभनेवाअ
शोभनबुद्धिरित्येवंरूपस्तेन हेभारतभारतान्वय सर्वभूतानिसर्गेस्थू ^मानर
लविषयेमोहंअविवेकंयान्तिहेपरंतप अयंभावः योहिस्थूलेरूप
स्वरूपंचतत्त्वतोजानातिसब्रह्मवित्सर्वज्ञत्वादतीतादीन्जाना
ति स्वेष्टोचसर्वेषांमोहोस्ति अशोभनेस्त्र्यादौशोभनाध्यासात् अ
सत्येप्रपंचेसत्यत्वाध्यासात् सत्येचात्मनोऽसंगत्वेऽसत्यत्वाध्यासात्
अनित्येस्वर्गादौनित्यत्वाध्यासात् अनात्मनिदेहादावात्माध्यासात्
अतोविपर्ययेणास्थिज्ञानंप्रतिबद्धं तेनचसर्वेऽप्यनजायंतेऽस्मदादी
नामिति २७ ॥

आनंदीटीका

कथंनवेदेत्याह रागद्वेषोद्भवेनद्वंद्वमोहेनइदमनुकूलंमयाग्राह्यमि
दंप्रतिकूलंमयात्याज्यमितिद्वंद्वोद्भवेनमोहेनाहंकारेणैवतमसास
र्वाणिभूतानिप्राणिनः अस्मिन्सर्गेसंसारेमोहंयान्तिआसहंसर्गप्रामा
मांनाभिजानंतीत्यर्थः २७ ॥

कस्मात्वांनवेदकश्चिदित्यत्राह ॥

रामकंठीटीका

यतएतानिसर्वभूतानिमन्मायागुणादन्योन्यभिन्नान्यतिरस्यशरीरात्म
कत्वाजन्मविनाशाभ्यांनिसर्गेसृष्टौमत्प्राप्तंमोहंपारमार्थिकस्वरूपा
विमर्शरूपमत्तानंयान्तिकेनहेतुनाद्वंद्वमोहेन द्वंद्वानिसुखदुःखा
त्मकानिसएवमोहस्तत्त्वाप्रतिपत्तिलिनुकीदृशेनेच्छाद्वेषसमुत्थेन
रागद्वेषप्रभवेन इदमत्रतात्पर्यं मन्मायोद्भावितगुणमयप्रकृति
रूपसर्गेसंमोहिताःसर्वप्राणिनः परस्परंभिन्नाःनित्यगुणपरिणा
मात्मकमेवजगदिदंमत्वामालाःक्वचिदजानंतः किंविशिष्टंतनःसंसा
रचक्रपरिवर्तनमनुभवन्त्यतोयथोक्तस्वरूपंमानित्यनिर्विकारैक

गी॰
टी॰
स॰

132

चित्स्वभावं परमात्मानं न भजंते केचित्तत्त्वं भजंते इत्यत्राह २७ ॥

लालसिकी [illegible]टीका

ननु त्वां कश्चिदपि किमिति न वेदेत्यत आह ॥ सर्वभूतानि नावत्त्वं पापरिज्ञानात्मोहात्मकान्येवान्यथाभूतत्वापायात् नानिसर्गे स्थूल देहोत्पत्तौ संमोहं सम्यग्गाढतममविवेकं संयांति केनेच्छाति स्थूल देहानुकूले इच्छा तत्प्रतिकूले च द्वेषस्ताभ्यां समुत्थेनोद्भूतेन द्वंद्वमोहेन सुखदुःखादीनां मोहेनाहं सुखी अहं दुःखीत्यादिना स्वात्मन्यध्यारोपाध्यासेन अतो मां भजनीयमपि न भजंते २७ ॥

पंचोलीटीका

कानिपुनर्मतत्त्ववेदनप्रतिबंधेन प्रतिबभानि संति ज्ञायमानानि सर्वभूतानि मां न विंदंतीत्यपेक्षायामाह इच्छाद्वेषेति हे भारत हे परंतप सर्गे उत्पत्तिकाले सर्वभूतानि इच्छाद्वेषसमुत्थेन द्वंद्वमोहेन इष्टवस्तुनि अभिलाष इच्छा अनिष्टवस्तुनि विरागः द्वेषस्ताभ्यामिच्छाद्वेषोद्भवशीतोष्णादिद्वंद्वनिमित्तेन मोहेनात्मज्ञानप्रतिबंधकेनाविवेकेन संमोहं यांति प्राप्नुवंति तेन मां न जानंति २७

सत्यवीरसमिश्चायिनी ॥

इच्छाद्वेषेति अयं भावः इष्टानिष्टसंबंधे एवंरूपो रागः इच्छा प्रवृत्ति निरोधकः पुत्रमित्रादिविषयकस्नेहरूपरागो वेच्छाद्वेषश्च सर्वेषां बंधादीनां विच्छेदकोऽयं पुरुषमार्गः कथं दितः स्यादिति कोऽयः ता सनाहं दुःखं तयोमोदस्तेन द्वेषजेन सर्वभूतानि सर्वे प्राणिनः सं ति प्राप्नुवंति अतो न मां भजंतीति तेषां पुरुषार्थरूपपरमेश्वरानेक मयलोकसंप्राप्तिभावः २७ ॥

ਸਪੁਮਾਲ

੨੭॥

133

भाषाअनुवाद

माया से मोहित जीवों को परमेश्वर विषयक ज्ञान का अभाव जो
कहा सोई अज्ञान की दृढता में कारण कहते है कि हे भार
त स्रष्टि कहे स्थूल देह धारण होने से जो देह के अनु कूल
विषय मे इच्छा और इस देह के प्रति कूल मेंजो द्वेष और उन
दोनो इच्छा औ द्वेष से उत्पन्न जो सुख दुख आदि तिस से भ
या जो विवेक का नाश इस से प्राणी मोह को प्राप्त है अर्था
त् हम सुखी हम दुखी ऐसो निश्चय रखतेहै इसी से ये अज्ञा
नी हम को नही भजते है २७ ॥

दोहा

इच्छा द्वेष उत्पन्नसें द्वंद्व मोहसें हे पार्थ जीवसभीनर मोहतें जा
हिं स्रष्टियापार्थ २७॥

134

येषामन्तगतंपापंजनानांपुण्यकर्मणां तेद्वंद्वमोह
निर्मुक्ताभजन्तेमांदृढव्रताः २८ ॥

शंकरभाष्यं

यत एवमनेन द्वंद्वमोहेन प्रतिबद्धप्रज्ञानानि सर्वभूतानि संमो
हितानि मामात्मभूतं न जानन्ति अत एवात्मभावेन मां न भजन्ते
केन पुनरनेन द्वंद्वमोहेन निर्मुक्ताः सन्तस्त्वां विदित्वा यथाशास्त्र
मात्मभावेन भजन्त इत्यपेक्षितमर्थं दर्शयितुमुच्यते येषामिति
येषान्तु पुनरन्तगतं समाप्तप्रायं क्षीणं पापं जनानां पुण्यकर्मणां ˆलेषां पुण्यकर्मणां
पुण्यं कर्म येषां सत्त्वशुद्धिकारणं विद्यते ते पुण्यकर्माणस्ते द्वंद्व
यथोक्तेन द्वंद्वमोहेन निर्मुक्ताः मोहनिर्मुक्ता भजन्ते मां परमात्मानं दृढव्रता एवमेव परमार्थतत्त्वं
नान्यथेत्येवं सर्वपरित्यागव्रतेन निश्चितविज्ञाना दृढव्रता उच्यन्ते
२८ ॥

आनन्दगिरिकृतटीका

जायमानभूतानां मोहपरत्वं तत्र फलितमाह यत इति भगवत्तत्त्ववे-
दनाभावे तन्निष्ठत्ववैधुर्यं फलतीत्याह अत एवेति यदि सर्वाणि
भूतानि जन्मप्रतिपद्यमानानि संमूढानि संति भगवत्तत्त्वपरिज्ञा
नशून्यानि भगवद्भजनपराङ्मुखानि तर्हि शास्त्रानुरोधेन भगव
द्भजनमुच्यमान [illegible] मधिकार्यभावादनर्थकमापद्येतेति
शंकते के पुनरिति अनेकेषु जन्मसु सुकृतवशादपाकृतदुरिता
नां द्वंद्वप्रयुक्तमोहविरहिणां ब्रह्मचर्यादिनियमवतां भगवद्भ
जनाधिकारित्वान्न शास्त्रविरोधोऽस्तीति परिहरति उच्यत इति त
शब्दद्योत्यमर्थमाह पुनरिति मुक्तेर्बीजस्य सिद्ध्यर्थं समाप्तप्रायमि
त्युक्तं प्रकृतोपयोगं पुण्यस्य कर्मणो दर्शयितुं विशिनष्टि सत्त्वे
ति उभयविधशुद्धेर्द्वंद्वनिमित्तमोहनिवृत्तफलमाह तेद्वंद्वेति
मोहनिवृत्तेर्भगवन्निष्ठापर्यन्तत्वमाह भजन्त इति तेषां नानापरि
ग्रहवतां भगवद्भजनप्रतिनियतिमार्गं चाह दृढेति २८ ॥

स्वामिकृतटीका

135

गी॰ ननु तर्हि केचन त्वां भजन्तो दृश्यन्ते ॥
टी॰ तत्राह — येषामिति येषां तु पुण्याचरणशीलानां सर्वप्रतिबन्धकं पापं प्रायः अन्तगतं न
स॰ ष्टं ते द्वन्द्वनिमित्तेन मोहेन निर्मुक्ताः दृढव्रताः एकान्तिनः सन्तो मां भजन्ते २८
[illegible] २८ ॥

पिशाचभाष्य

येषां त्वन्तगतं पापं जनानां पुण्यकर्मणां ते पुण्यकर्माणः द्वन्द्व
मोहनिर्मुक्ताः द्वन्द्वभ्रमरहिताः भजन्ते सेवन्ते मां दृढव्रताः दृढसंक
ल्पाः २८ ॥

रामानुजभाष्य

येषामिति येषां त्वनेकजन्मार्जितोत्कृष्टपुण्यसंचयात् गुणमया
द्वन्द्वेच्छाद्वेषहेतुभूतं मदोन्मुख्यविरोधि अनादिकालप्रवृत्तं पापमन्त
मनुयातं तेनोक्तेन सुकृततारतम्येन मां शरणमनुप्रपद्य गुणम
यान्मोहाद्विनिर्मुक्ता जरामरणमोक्षाय प्रकृतिवियुक्तात्मस्वरूपदर्श
नाय महते चैश्वर्याय मत्प्राप्तये च दृढव्रताः दृढसंकल्पा मामेव भ
जन्ते २८ ॥

अभिनवगुप्तकृतटीका [illegible] २८

व्याख्यातावुक्तार्थः २८

परमार्थप्रपाटीका

ननु तर्हि के भजन्तो दृश्यन्ते तत्राह — येषां सुकृताचरणवतां सकलप्रति येषामिति
बन्धकं पापमन्तगतं नाशं प्राप्तं ते द्वन्द्वनिमित्तेन मोहेन विनिर्मुक्ताः
सन्तो मां भजन्ते नैनं पाप्मा न तपतीति श्रुतेः [illegible]
[illegible] २८ ॥

वनमालीटीका

यदि सर्वभूतानि संमोहं यान्ति तर्हि कथं मद्भक्ताश्चतुर्विधा भजन्ते मामित्य
त आह येषामिति येषां तु नरविलक्षणानां सफलजन्मनां पुण्यकर्मणा
मनेकजन्मसु पुण्याचरणशीलानां तैस्तैः पुण्यैः मदाराधनरूपैः स्वोचि
तनिःकामकर्मभिर्मद्विषयकपापमन्तगतं नष्टमवसानं प्राप्तं तेषा।

पापाभावेन तन्निमित्तेन द्वंद्वमोहेन रागद्वेषादिनिबंधनविपर्यासेन त्यक्तएव
निर्मुक्ताः दृढव्रता अचलसंकल्पाः सर्वथा भगवान्नेव भजनीय प्रष्टः
सचैवंरूप एवेति प्रमाणजनितप्रमाणपयांकाश्चत्वविज्ञानाः संतो मां
सर्वेश्वरं भजंते तत्परायणाः संतः सेवंते अतः सत्वशोधकमहाराधन-
रूपनिःकामकर्मानुष्ठानाय पतनीयमिति भावः २८ ॥

अथमैवैजयंतीटीका

ननु यदि सर्वाण्यपि भूतानि जन्मकाल एव मोहं प्राप्नुवंति तर्हि किं केचि-
दपि त्वां न सेवंत इत्याशंक्य ये पापिनो महिमुखा देवांतरोपासकास्त ए-
व मोहं यांति ये तु पुण्यकर्माणस्ते द्वंद्वमोहविनिर्मुक्ताः संतो मामेव भ-
जंतीत्याह येषांत्वंतगतमिति पुण्यकर्मणां पुण्यं पवित्रमनेकजन्मा-
र्जितं स्ववर्णाश्रमोचितं मदाराधनलक्षणं कर्म येषां तेन तथा तेषां यद्वा
पुण्यं चारुकर्म येषां तेषां पुण्यं तु चार्वपीत्यमरः सोचितानेकजन्मार्जि-
तपुण्येन लब्धमज्जनसंगप्राप्तविविधभक्त्यर्थमंत्रजपार्चन-
कीर्तनवंदनपादसेवनादिलक्षणवास्तवकर्मवतामित्यर्थः तुश-
ब्दोवधारणार्थकः येषामेव जनानां मद्भक्तिभंजकमंतगतं पापं मदन्यदेवो-
पासनरूपं प्राकृतविषयसेवनरूपं वा अंतगतं नष्टमंत एव जना
द्वंद्वमोहनिर्मुक्ताः संतः प्राचीनकर्मवासनाजनितरागद्वेषात्प्रा-
कृतविषयाभिनिवेशरूपद्वंद्वनिमित्तकमोहान् निर्मुक्तानिःशेषे-
णत्यक्तप्राकृतविषयासंगेनो दृढव्रताः संतो दृढमनेकविघ्नैरप्यखं-
डितं व्रतं चरणोदकं विनान्यजलं न पिबामि हरिसाचंदनं विनान्यत्का-
र्यं न करोमि हरिस्नापनं विनान्यद्गृहस्नानादिकं नांगीकरोमीत्या-
दिरूपं व्रतं संकल्पो येषां तेन तथा संतो मां सर्वेश्वरं भजंते मच्छरणं प्रपद्य
मामुपासत इत्यर्थः २८ ॥

मधुसूदनीटीका

यदि सर्वभूतानि संमोहं यांति कथं तर्हि चतुर्विधा भजंते मामित्यु-
क्तं सत्यं सुकृतातिशयेन तेषां क्षीणपापत्वादित्याह ॥

येषां त्विति लोकविलक्षणानां जनानां फलजनकतापुण्यकर्मणामने-
कजन्मसु पुण्याचरणशीलानां तैस्तैः पुण्यैः कर्मभिस्तानप्रतिवं-
धकं पापमंतमवसानं गतं प्राप्तं ते पापाभावेन तन्निमित्तेन द्वंद्वमो-

गतमंत

द्वेन रागद्वेषादिनिबंधनविपर्यासेन तत्त्वत एवं निर्मुक्ताः पुनरावृत्त्ययोगपते
न त्यक्ताः दृढव्रता अचल्य संकल्पाः सर्वथा भगवानेव भजनीयः स
चैवं रूप एवेति प्रमाणजनिताप्रमाण्यशंकाशून्यविज्ञानाः संतो मां पर
मात्मानं भजंते अनन्यशरणाः संतः सेवंते यत्नाह एवमेव च ते विभज
न्ते मामित्यत्रोक्तं तेषां हेतोज्ञाः अतः सर्वभूतानि संमोहं यांतीत्युत्सर्गः
तेषां मध्ये ये सुकृतिनस्ते संमोहशून्या मां भजन्त इत्यपवादः यानि न विरोधः
अयमेवोत्सर्गः प्रागपि प्रतिपादितः त्रिभिर्गुणमयैर्भावैरित्यत्र तस्मा
त्सत्त्वशोधक पुण्यकर्मसंचयः सर्वदा यतनीयमिति भावः २८ यो
दानीमर्जुनस्य प्रश्नानामुत्तरयितुं सूत्रभूतौ श्लोकावुच्येते जरेति द्वाभ्यामेवह
तद्व्याख्यानीयोऽग्रेऽध्यायो भविष्यति ॥

सदानंदीटीका

यदि सर्वाणि भूतानि संमोहं यांति तत्कथं चतुर्विधा भजंते मामित्युक्ता
मिति चेच्छृणु १ येषां प्राक्तनभिन्नानां जनानामधिकारिणां बहुज
न्मसु धर्मानुष्ठानतो महात्म २ पुण्याचरणशीलानां तैस्तैः
पुण्यैस्तु कर्मभिः धीप्रतिबंधकं पापमवसानं गतं हि ते ३ पापाभा
वे च तद्धेतु रागद्वेषादिरूपिणा द्वंद्वमोहेन निर्मुक्ताः सम्यक् श्रद्धया
न्विताः ४ अनंतानाप्य संकल्पा विसृत्तामरुतो सदा सर्वथा भ
गवानेव भजनीयः स आदरात् स चैवं रूप एवेति विनिश्चितधियो
बुधाः अनन्यशरणाः संतः सेवंते मां चिदद्वयं ६ चतुर्विधा भजंते
मामित्यत्रोक्तास्त ईदृशाः तस्माद्धीशोधिके पुण्ये यतितव्यं मनीषि
भिः ७ श्रोतव्योति संभगवान्ध्येयो हि तयोर्द्वयस्त्वले ८ २८ ॥

नीलकंठीटीका

केषां तर्हि सर्वज्ञत्वं भवतीत्याशंक्याह येषामिति द्वाभ्यां येषां पुनर्जना
नां पुण्यकर्मणां पापं अन्तगतं अन्तं नाशं प्राप्तं द्वितीयाश्रितेति समा
सः ते द्वंद्वमोहकलक्षणेन निर्मुक्ताः संतः प्रथमं दृढव्रताः श
मदमादिदार्ढ्यभाजो भूत्वा मां भजंते २८ ॥

आनंदीटीका

येषांतुपुण्यकर्मणांजनानांमोनाशकंकर्मसत्वशुद्धयेहंतवंतांजनानांदेव
तर्गिभाजांपापंतमोरूपमंतंव्ययंगतंतेद्वंद्वमोहादहंकारान्निर्मुक्ताअ
भिभूतरजस्तमसःदृढव्रताःसंतंतमज्ञानतोपायेश्रुयत्नवंतःस्थिरबु
द्धयोमांभजंते तदेवमास्मिन्नध्यायेपरमेश्वरस्वरूपंचात्मज्ञानसाधनंच
ध्यावलंबितिचेत आरब्धंपंचमेषष्ठेध्यायेषडंगयोगाभ्यासेनप्रथा
ननयापर्यंतेनतंतदृढभूमिजयातो ध्येमेकाग्रामिपर्यायपक्विदे
वितास्साचदेहेसतिनसंभवतिमुक्तिर्हिबंधाभावः बंधश्चभूतेंद्रिया
न्तःकरणसंघातरूपेणदेहेनसंबंधः तदेवमनेकजन्मसंसिद्धस्य
रमदेहपातोत्तरकालमेवब्रह्मप्राप्तिरितिसर्वश्रुतिस्मृत्यागमप्रसि
द्धिदर्शनाद्ब्रह्मप्राप्तोनेदेहोमतिमारहितकालांतिलात्मप्रपंचम
ने २८ ॥ २८

रामकंठीटीका

केपुनस्त्वांभजंतेइत्यत्राह ॥

येषांतुजन्मनांमहत्तत्त्वग्रहादेवपरमुदितविद्यापाकीनांसतामन
पवतुपुण्यकर्मणांतत्क्षानिनांपापमत्तानलाद्दाणमंतंगतंविनाशं
प्राप्तंतेयथोक्ताद्वंद्वमोहान्निर्मुक्ताःदृढव्रताःस्थिरनियमाःसंतो
मामेकंदेवतंभजंतेमद्भेदप्रतिपत्तिपर्यंतयासमाश्रयंते सपर्यया १
२८ ॥

लासिकी टीका

कथंतर्हिचतुर्विधाभजंतेमामित्युक्तेनकेचनत्वांभजंतेइत्यतआ
ह ॥ येषांसफलजन्मतांतलोकविलक्षणानांपुण्यन
क्तरूपेणकर्मयोगेनसत्वशुद्धिहेतुःकर्मयेषांतेषांजनतानां अ
तएवज्ञानप्रतिबंधकंपापमंतंगतंनष्टं तेद्वंद्वमोहेनयथोक्तेन
निर्मुक्ताःनिःशेषेणत्यक्ता दृढव्रताःस्थिरसंकल्पामामीश्वरंभजं
ते २८ ॥

पंचोलीटीका

केपुनःअनेकद्वंद्वमोहेननिर्मुक्ताःसंतस्त्वांविदित्वायथाशास्त्र
मात्मभावेनभजंतेतीत्यपेक्षितमर्थंदर्शयितुमाह येषामिति

त्वपुनः येषां पुण्यकर्मणां जनानां पापमंतगतं क्षयं प्राप्तं भवतीति ते पू
र्वोक्तेन द्वंद्वमोहेन निर्मुक्ता दृढव्रता दृढं निश्चितं परमार्थतत्त्ववि
षयं व्रतं ज्ञानं येषां ते मां परमात्मानं भजंते २८

रणवीरसमिद्योतिनी ॥

ननु यदि सर्वेषां भूतानां द्वंद्वारंभे संमोहप्राप्तिस्तर्हि भद्भजनं न स्याद्द्वं
द्वादन्यदावसर इति तेनैवोभयसिद्धिप्रदेन ज्ञातार्थाकृतार्थताया
द्वंद्वविषयको वारंवारं भवत्कृतो नियोगो निष्फल एव सत्यं स
कृतार्था इत्याशयेन हीन पापानां चतुर्विधानां भक्तानां संमोहाभावा
दस्त्येव द्वंद्वारंभे मद्भजनावसर इत्याह येषामिति येषामानादि
विशेषेण चतुर्विधानामितरजनविलक्षणानां जनानां पूर्वभ
वार्जितपुण्यकर्मणां पापं प्रवृत्तिनिरोधकं कल्मषमंतं गतं ना
शं प्राप्तं ते द्वंद्वमोहेन द्वंद्वविषयकेण कश्मलेन निर्मुक्ताः परि
त्यक्ता मां सर्वेश्वरं भजंते कीदृशा दृढव्रताः दृढं चालयितुमश
क्यं व्रतं द्वंद्वाचरणविषयो नियमो येषां परमेश्वर एव सिद्धासि
द्ध्योः परमं कारणमयमेव धारणीकार्य इति मद्भजनविषयकसंक
ल्परूपं व्रतं वा दृढं येषां एतादृशा महावीरप्रयोगिकं द्वंद्वं महद्भिः
पुण्यराशिभिः क्षत्रियाणां लभ्यमिति भावः ततश्च सर्वभूतानी
ति प्रायोक्तिरेव न पुनर्भगवद्भक्तविषयिकेति भावः एतेन च द्वि
तीयाध्याये यदृच्छया चोपपन्नमित्यादिना सूचितोऽर्थो विवृतः
२८ ॥

मधुभाष्य

येषामिति ॥ २८

भाषानुवाद

जो फेरि कोई कोई जो हमारी भजन करते हैं इस शङ्का में कहते हैं कि जो पुण्य कर्म आचरण शील हैं उन के सर्व प्रतिबन्धक स्वरूप सब पाप नष्ट होगये हैं वे लोग सुख दु ख आदि द्वंद्व से मुक्त औ एकाग्रचित्त होय हम को भजते हैं २८ ॥

दोहा

सुकृति जनको जेहि को पापनाश भयो जोय मो कों भजहिं दृढ व्रती द्वंद्व मोह तजी सोय २८ ॥

138

जरामरणमोक्षाय मामाश्रित्य यतन्ति ये ते ब्रह्म तद्विदुः
कृत्स्नमध्यात्मं कर्म चाखिलं २९ ॥

शांकरभाष्यं

ते किमर्थं भजन्ते इत्युच्यते जरेति जरामरणमोक्षाय जरामरणमोक्षार्थं मां परमेश्वरं आश्रित्य मत्समाहितचित्ताः सन्तो यतन्ति प्रयतन्ते ये ते यद्ब्रह्म परं तद्विदुः कृत्स्नं समस्तमध्यात्मं प्रत्यगात्मविषयं वस्तु तद्विदुः कर्म चाखिलं समस्तं विदुः २९ ॥

आनन्दगिरिकृतटीका

यथोक्तानामधिकारिणां भगवद्भजनफलं प्रश्नद्वारा दर्शयति ते किमर्थमिति जरामरणलक्षणो यो बन्धस्तद्विश्लेषार्थं भगवद्भजनमित्यर्थः संप्रति सगुणस्य सप्रपंचस्य मध्यमानुग्रहार्थं ध्येयत्वमाह ममाश्रित्येति जरादिसंसारनिवृत्त्यर्थं निर्गुणं निष्प्रपंचं मामुत्तमाधिकारिणामानंतीत्युक्तं मामेव ये प्रपद्यंत इत्यादाविदानीमाह जरेति मध्यमाधिकारिणं प्रत्याह मामिति परमेश्वराश्रयणं नामविषयविमुखत्वेन भगवदेकनिष्ठत्वमित्याह मत्समाहितेति प्रयतनं भगवद्विषयासिद्ध्यर्थं बहिरंगानां यज्ञादीनामंतरंगानां च श्रवणादीनामनुष्ठानं प्राकृतं जगत्कारणं परं ब्रह्म कथं ब्रह्मविदुरित्ययेतायां समस्ताध्यात्मवस्तुत्वेन सकलकर्मत्वेन च तद्विदुरित्याह कृत्स्नमिति २९ ॥

स्वामिकृतटीका

एवं च मां भजन्तः ते सर्वं विज्ञेयं विज्ञाय कृतार्था भवंतीत्याह ॥
जरामरणयोर्निरासार्थं मामाश्रित्य ये प्रयतंते ते तत्परं ब्रह्म विदुः कृत्स्नमध्यात्मं च विदुः ये ब्रह्मस्वरूपेण तत्प्राप्नुवंति देहादिव्यतिरिक्तं शुद्धमात्मानं च जानंतीत्यर्थः तत्साधनभूतमखिलं सरहस्यं कर्म च जानंति इत्यर्थः
[illegible] २९ ॥

पिशाचभाष्यं

जरामरणमोक्षाय मामाश्रित्य यतंति प्रयतंते ब्रह्म तद्विदुः विजानंति कृत्स्नमध्यात्मं मध्यात्मभूतं प्रत्यगात्मभूतं कर्म चाखिलं समस्तं [illegible] विदुः २९
२९

गी॰ ननत्वेषांत्रयाणांभगवंतंभजमानानांज्ञातव्यविशेषेनयादेयांस्तमत्येति
टी॰ जरामरणमोक्षाय प्रकृतिविमुक्तात्मस्वरूपदर्शनाययमामाश्रित्ययेभजंते
स॰ तेब्रह्मविदुः अध्यात्मं चकृत्स्नंविदुःकर्मचाखिलंविदुः २९ ॥

अभिनवगुप्तकृतटीकायामयं २९

परमार्थप्रपाटीका विशतावुक्तार्थः २९

अथयत्कृताचरणेपिमहाश्रयव्यतिरेकेणविरागतत्त्वाववोधोवानभवतीत्याह॥

जरेति अयंतज्ज्ञःस्वरूपयोर्जरामरणयोर्देहधर्मयोर्मोक्षायतायामा
परमात्मनमाश्रित्ययेयतंतेयोगाभ्यासादिप्रयत्नंकुर्वंति तेतत्परंब्र
ह्मविदुःतं तेनोपायरूपंकृत्स्नंसमग्रमध्यात्मंचविदुःतथातन्निमित्तभू
तमखिलंफलाभिसंधिरहितंकर्मचविदुः
॥

वनमालीटीका

मांभजंतः इत्युक्तानवादेनोक्तमेवभगवद्भजनस्यविस्तानाख्यफलंत
त्योपायनिरूपणार्थमाहजरेतिजरामरणविविधदुःखहसंसारदुः
खनिरासायमांसर्वेश्वरंमदनंतगुणालयमाश्रित्यशरणागतंयतंति
यत्नंतेमदर्पितानिफलाभिसंधिरहितानि सोविनाविकर्माणिकु
र्वंतितेक्रमेणशुद्धचित्ताःसंतःब्रह्महृदुणकंमांविदुःकृत्स्नमध्या
त्मंविदुरखिलंकर्मचविदुः २९ ॥

ऊत्तमवैजयंतीटीका

एवंचतुर्विधेषुसुभक्तेषुज्ञानिनोनिष्कामत्वेनश्रेष्ठत्वंत्रयाणांतुसकाम
त्वेपिनेस्वप्रपत्तिपूर्वकेस्वमामिश्राक्तेनदेवोपासकानांनसंसारश्रामिः
स्यादित्युक्तमिदानीमेतेभ्योन्येपिमसकामाभक्ताःसंतीत्याह जरा
मरणमोक्षायेति जरामरणमोक्षाय जराचमरणंचजरामरणेताभ्यांमो
क्षायविमुक्तयेप्रकृतिसंबंधरहितस्वस्वरूपावलोकनायतन्मात्रकामा
येवेत्यर्थः मामाश्रित्यमांप्रपद्ययेयतंतियत्नंकुर्वंतितेजनाःकृत्स्नसम
ग्रमात्मस्वरूपंतत्प्रकृतिविमुक्तंशुद्धंब्रह्मब्रह्मणाप्रनिर्दिष्टंवेत्ररत्स्वरूपंवि
दुःनात्मानंचपुनःकृत्स्नमध्यात्मंजीवस्वभावंविदुःपुनःअखिलंसवेक
र्मविशेषरूपंविदुः २९ ॥

+ अथेदानीमर्जुनस्य प्रश्नत्रयमुत्थापयितुं सूत्रभूतौ श्लोकावुच्येते अनयोरेव वृत्तिस्थानीय
उत्तरोऽध्यायो भविष्यति ॥ +

जरामरणमोक्षाय

मधुसूदनीटीका

+ ये संसारदुःखान्निर्विण्णा जरामरणादिविविधदुःखसहसंसारदुःखनिरासा
+ ... तर सर्वं वैराग्येण नैराश्यं गत्वाय
यतन्ते कहेतुं मां सगुणं भगवन्तमाश्रित्य तत्सर्वं विहितानि कर्माणि कु
र्वन्तो नियतं तेन मदर्पितानि फलाभिसंधिशून्यानि विहितानि कर्माणि कु
र्वन्ति क्रमेण शुद्धान्तःकरणाः सन्तः तज्जगत्कारणं मायाधिष्ठानं शु
द्धं परं ब्रह्म निर्गुणं तत्पदलक्ष्यं मां विदुः तथा ... शरीरमधिकृत्य प
वर्तमानं ... तत्त्वं पदलक्ष्यं विदुः कर्म च तदुभय
काशमानं ... पाधिपरिच्छिन्नं त्वंपदलक्ष्यं ... निरवशेषं फलाव्याभि
वेदनसाधनं गुरूपसदनश्रवणमननादि अखिलं निरवशेषं फल
चारि विज्ञानं तेनेत्यर्थः ॥ २९ ॥

सदानंदीटीका

नानादुःखसहसंसारदुःखोके
संसारदुःखान्निर्विण्णा जरामरणमुक्तये ... देवं वनभजं यत्नपरमस्मा
दायये जनाः १ दुःखोके देकहेतुं मां वासुदेवं ... वनमालाविभूषितं
नाथं किरीटोज्ज्वलमस्तकं २ शंखचक्रगदापद्मं वनमालाविभूषितं
ध्येयत्वेन समाश्रित्य सगुणं ब्रह्मविग्रहं ३ विहायेतरकर्तव्यं गत्वा ग
रणमादरात् मदर्पितानि कर्माणि विहितान्याचरन्ति ते ४ क्रमाच्छु
द्धधियः सन्तस्तज्जगत्कारणं परं मायाधिष्ठानमद्वैतं शुद्धं ब्रह्म चतुर्गु
णं ५ विदुस्तत्पदलक्ष्यं मां साकल्येन यथातथं शरीरमधिकृत्येवमा
त्मानं चिदात्मकं ६ देहाद्युपाधिनिर्मुक्तं त्वंपदलक्ष्यं विदुः परं कामी
समानं चिदात्मकं ६ देहाद्युपाध्यनिर्मुक्तं त्वमोलक्ष्यं विदुः पूर्ण ... चैव ज्ञानं नित्य
पितद्वयज्ञानसाधनं शास्त्रसंमतं ७ श्रवणाद्यखिलं चैव ज्ञानं
भिचरियत् ८ २९ ॥

नीलकंठीटीका

जरामरणमोक्षाय मामाश्रित्य मयि समाहि
ततश्च जरामरणयोः प्रवाहात् आत्मनो मोक्षाय वेदान्तश्रवणादौ ये नन्तम
नं चेतसो भूत्वा ये यतन्ते नियतन्ते ज्ञानलाभाय वेदान्तश्रवणादौ ये तत्त्वब्रह्मविदः
र्वे वेदान्तप्रसिद्धं ह तत्त्वं ब्रह्मविदः विराडाद्युपासकाः उक्तत्वब्रह्मविदः
स्तत्र कारणयोर्निष्कलस्य चाज्ञानात् श्रीगोपालबालोपासकास्तु न
त्पदलक्ष्यकृत्स्नब्रह्मविदान्तिथ्यात्मादिकं कान्तेय न जानन्ति सर्ववि
दोभूवतीत्यर्थः अनेन यत् ज्ञात्वा नेह भूयोऽन्यत् ज्ञातव्यमवशिष्य
नश्यैकविज्ञानात्सर्वविज्ञानप्रतिज्ञाया एवं कृतानस्याउपसंहा
रोदर्शितः अध्यात्मं आत्मनि शरीरे स्थितं प्रत्यगात्मविषयं वस्तुगु

त्वंपदार्थमित्यर्थः कर्म च तत्त्वंपदार्थज्ञानयोः साधनं श्रवणादिकं सर्वं
गी॰ विदुः २९ ॥
टी॰ आनंदटीकाउपक्रमे २९ सप्तार्थम् ॥ नेदमनेकजन्मसंसिद्धस्य च
स॰ रमदेहपातोत्तरकालमेव ब्रह्मप्राप्तिरिति सर्वश्रुतिस्मृत्यागमप्रसिद्धं दर्शितं ब्रह्मप्राप्तौ नैवेद्यांसप्रप
यं देहोत्क्रांतिलक्षणं तदुपक्रमते ॥ रामकंटीटीका

140 इत्यंच मां यथोक्तस्वरूपमाश्रित्य च तद्विषयया भक्त्यालंबनीकृत्य ये जरामरणा
दिद्वंद्वदोषविमुक्तये यतंते मयि लग्ना योगाभ्यासं कुर्वंति ते च पूर्वोक्तचेतसो य
थोक्तसमाधिसमनसमाहितमनसो ब्रह्मस्वरूपादिभेदेन समनंतर
गाध्यायव्याख्यास्यमानसप्तविधविज्ञानरूपं मां विदुर्मां जानंतत
त्वोमू २९ ॥ लासिकी [illegible]टीका

अथैवैराग्यपूर्विकायां भक्तिः पार्यंतिकमनन्यमेकांतनिष्ठात्मताविधाय
फलमाह ॥ ये जरामरणाद्रूपात्संसारदुःखान्निर्विण्णाः तदुक्तं कु
लार्णवे व्याघ्रीवैति जरा चायुर्याति भिन्नघटांबुवत् निघ्नंति रिपु
वद्रोगास्तस्माच्छ्रेयः समभ्यसेत् संपदः स्वप्नसंकाशा यौवनं कुसु
मोपमं तडिच्चपलमायुष्यं कस्य स्याज्जानतो धृतिः अपत्यमेकलत्रं
मैथुनं मे बांधवाश्रमे लपंतमिति मत्याजं हंति कालवृकोदरः
तस्मात्तायतनान्निरासायैव नत्वार्तिनिवारणायार्थमयेवा मामीश्व
क्लि॰ रं भक्त्याश्रित्य भावपरीकृत्य यतंते मत्पराणा मत्कारमत्याहृत्तिं से
वंते ते तन्निर्विण्णो वंध्यकृत्स्नं परं ब्रह्म विदुः प्रत्यभिजानंति अध्यात्मं
च विदुरखिलं अध्यात्मिकादीनि च ममैव रूपांतराणि कर्म च वि
दुरिति तत्रांतरसंज्ञितसदाशिवत्वावशेषवयुक्तं ॥ एवं जीवन्मु
क्तानां वै स्वात्मस्वरूपं मामाध्याय पर्यंते नतारं तमपेत्यैपची
यमानं हृत्कमलं ॥ [illegible]
[illegible] २९ ॥ पंचोलीटीका
ते किमर्थं भजंतीत्यत्राह जरामरणेति ये मामाश्रित्य समाहितचित्ताः
संतो जरामरणमोक्षार्थं यतंते तियत्नं कुर्वंति ते यत्परं ब्रह्म तत्कृत्स्नं
समग्रं विदुः यदध्यात्मं प्रत्यगात्माविषयं वस्तु तदपि समग्रं विदुः
कर्म चाखिलं समग्रं तत्साधनभूतं रहस्यं विदुः २९

रणवीरसंसिद्धोपिनी॥

जरामरणेति येतुमांसः जन्ममरणमोक्षाय अजरामरमा
वाय मांपरमेश्वरमाश्रित्य शरणीकृत्य यतंतिस्ववर्णाश्रमो
चितेकर्मणि प्रयतंते तेतद्ब्रह्मकृत्स्नं संपूर्णमध्यात्मं च अ
खिलं कर्म च विदुर्जानंति अयमभिप्रायः ब्रह्मादिसमपदार्थ
ज्ञानेसत्येवस्वाचारोचितेकर्मणि प्रवृत्तिर्दृढाभवति ततोज
रामरत्वंवाव्यभिचारित्वात्सायुज्यादि प्राप्नोतीति २९॥

मधुभाष्य

जरामरणमोक्षायेत्यन्यकामनिहत्यर्थं मोक्षेसक्तिः स्तस्य
र्थेकानविधिः मुमुक्षोरपमुक्तस्य वरीसैकांतभक्तिमार्गिती
तरस्वतेनारदीये नात्यंतकमिति च देवानागुणलिंगानामा
नुश्राविककर्मणां सत्वएवैकमनसो वृत्तिः स्वाभाविकीतु
या अनिमित्ताभगवतिभक्तिसिद्धेर्गरीयसी जरयत्याशुयाको
शंनिगीर्णमनलोयथेति भागवतेलक्षणाच्च अत्रच सर्वेवे
दास्तु देवाद्यादेवानारायणार्थकाः नारायणस्तुमोक्षार्थेमो
क्षोनान्यार्थइष्यते एवमध्यममभक्तानामेकांतानांनकस्य
चित् अर्थेनारायणोदेवः सर्वमन्यत्तदर्थकमिति गीताक
ल्पे तपवचविदः मयैवैषहरयतत्रतिश्रुतेः २९॥

141

भाषाअनुवाद

और ऐसे जो मेरे भक्त जन तेई जानवे जोग वस्तु को अच्छीतरह
जानि के कृतार्थ होते है यह कहते है कि जरा मरण निवारणा
र्थ मेरो आश्रय ले जो मनुष्य यत्न करते है वेई परब्रह्म को
जानि शकैं है और सम्पूर्ण अध्यात्म विद्या जाने है अर्थात् अ
ध्यात्मज्ञान मे शामव्य सोई देहादि से भिन्न शुद्ध आत्मा को भी
जानते है और तत्वज्ञान के साधनरूप कर्म भी जानि सकतेहे
२९

दोहा

जरामृत्युसें मोक्षको करे यत्नमो आश्रयजोय तेजाने ब्रह्मदिंस
कलकर्म अध्यात्मकोय २९

142

साधिभूताधिदैवं मां साधियज्ञं च ये विदुः प्रयाणकालेपि
च मां ते विदुर्युक्तचेतसः ३० ॥ इति श्रीभगवद्गीता
यां योगशास्त्रे श्रीकृष्णार्जुनसंवादे विज्ञानयोगो नाम स
प्तमोऽध्यायः ७ ॥

शांकरभाष्यं

साधीति साधिभूताधिदैवं अधिभूतं चाधिदैवं च अधिभूताधिदैवं ते
न सह अधिभूताधिदैवेन वर्तत इति साधिभूताधिदैवं मां ये विदुः साधि
यज्ञं च सह अधियज्ञेन साधियज्ञं ये विदुः प्रयाणकाले मरणकाले
पि च ते मां विदुः युक्तचेतसः समाहितचित्ता इति ३० ॥ इति श्री
भगवद्गीताभाष्ये सप्तमोऽध्यायः ७ ॥

आनन्दगिरिकृतटीका

न केवलं भगवन्निष्ठानां सर्वात्मककर्मात्मकब्रह्मवित्त्वमेव किं
त्वधिभूतादिसहितं तद्वेदित्वमपि सिध्यतीत्याह साधिभूतेति अध्या
त्मं कर्माधिभूतमधिदैवमधियज्ञं चेति पंचकं कर्म तद्ब्रह्म ये विदु
स्तेषां यथोक्तज्ञानवतां समाहितचेतसामापदवस्थायामपि भगव
त्तत्त्वज्ञानमप्रतिहतं तिष्ठतीत्याह प्रयाणेति अपि चेति निपाताभ्यां
तस्यामवस्थायां करणग्रामस्य व्यग्रतया ज्ञानासंभवेपि मयि समाहि
तचित्तानामुक्तज्ञानवतां भगवत्तत्त्वज्ञानमयत्नलभ्यमिति द्योत्य
ते तदनेन सप्तमेनोत्तममधिकारिणं प्रतिज्ञेयं निरूपयता तद
र्थमेव सर्वात्मकत्वाधिकमुपदिशता प्रकृतिद्वयद्वारेण सर्वकार
णत्वादिति च वदता तत्पदवाच्यं तत्त्वं चोपपादितं ३० ॥
इति आनन्दगिरिकृतटीकायां सप्तमोऽध्यायः ७ ॥

स्वामिकृतटीका

नचैवंभूतानां योगभ्रंशशंकापीत्याह ॥
साधिभूतेति अधिभूतादिपदानामर्थं भगवानेवानंतराध्याये व्या
ख्यास्यति अधिभूतेन अधिदैवेन च सह अधियज्ञेन च सह मां ये जा

गी॰ टी॰ स॰

143

तेनित्येनयुक्तचेतसः मय्यासक्तमनसः प्रयाणकालेपिमरणसमयेपिते
मांविदुः नतुतदापिव्याकुलीभूयमांविस्मरंति अतोनमद्भक्तानांयोगभ्रं
शशंकेत्यर्थः कृत्स्नभक्तेरयत्नेनब्रह्मज्ञानमवाप्नोति इतिविज्ञानयो
गाख्येसप्तमेसंप्रकाशितं ७ ॥ ३० ॥ इतिसुबोधिन्यांटीकायांसप्तमः

पैशाचभाष्यं

साधिभूताधिदैवं अधिभूताधि... दैवसहितंसाधियज्ञंयज्ञसहितं
चयेविदुर्विजानंतिप्रयाणकालेमरणकालेचापिमांते विदुःविजा
नंतियुक्तचेतसइति ३० इतिपैशाचभाष्येसप्तमोध्यायः ७ ॥

रामानुजभाष्यं

अक्षयइतिपुनर्निर्देशात्पूर्वनिर्दिष्टेभ्योन्योधिकारिणःज्ञायंते सा
धिभूतंसाधिदैवंमामेवसर्वार्थिनोयेविदुरित्यनेनतदन्वादःस्वरूपम
धिकारिणामविशेषेणविधीयते ऐश्वर्याभावान्नत्रयाणांनित्यंनैमि
त्तिकरूपमहायज्ञाद्यनुष्ठानमवर्जनीयंतेचप्रयाणकालेपिस्वप्रा
प्यप्रयाणकालेविदुरितिसमस्तत्रीयतेअतेनज्ञानिनोप्यर्थस्वभावा
न्यस्यसाधियज्ञंमांविदुःप्रयाणकालेपित्वप्राप्यानुगुणंमांविदुरित्युक्तं
भवति ३० इतिश्रीमद्रामानुजाचार्यविरचितगीताभाष्येसप्तमो
ध्यायः ७ ॥

अभिनवगुप्तकृतटीका

इच्छाद्वेषक्रोधमोहादिभिस्तावत्तावन्मोहात्मकएवसपरंस्फीतीभा
वमुपनीयते येनप्रकृतिजम्भरांतर्वर्तिसमयमेवजगन्निजकार्यका
रणमात्रात्मकमेवप्रसृतमस्तामवलंबनेयामोहंवासनानुभावा
स्तानिदिनरात्रिसमयसौभगवत् नतुतावनाविमुक्तरूपतामा
ह्लादानुभावसमाभिज्ञत्वविचित्रव्यापारसंसारदर्शनात् येतुवि
निष्टतामसाःगुणाःगुणपरित्यज्यतेमीकृतात्मानस्तेविपाटि
नमहामोहविनाशाःसर्वमेवभगवद्रूपमवचित्तंजरामरण

मयत्नमिखलुतंब्रह्मविदंति अध्यात्मिकाधिभौतिकादिदैविकाधियज्ञा
कानिचममैवरूपाणितराणिप्रयाणकालेचनित्यंभगवद्भावव्यतीतच्छकारण
त्वान्मांजानंति यतोयेषांजन्मपूर्वमेवंभगवत्तत्वेनैतकालेपरमेश्व
रंसंस्मरेयुः किंजन्मासेवनयेतियेमन्यंतेतेषांतूष्णीभावएवशोभ
नइतिशिवम् इ· अत्रसंग्रहश्लोकः स्फुटंभगवतोभक्तिराहिताक
ल्पमंजरी साधकेच्छासमुचितायेनापूर्णांपरिपूरयेत् ॥ इतिश्रीमद्रा
जानकाभिनवगुप्तविरचितेश्रीभगवद्गीतार्थसंग्रहेसप्तमोध्यायः ७

परमार्थप्रपाटीका

नैवेवंभूतानांयोगभ्रंशशंकापीत्याह ॥

साधि भूतेति अधिभूताधिदैवैःसहवर्तमानंमांयेविदुस्तेप्रयाणकालेनिर्या
णसमयेपियुक्तचेतसःतत्स्मरणवंतःसंतोमांविदुः मांज्ञात्वातन्नेय
जंति नतदेहांतवेदनाभिर्व्याकुलीक्रियंते किंतुमत्स्वरूपतादात्म्यावदा
नाः संतनस्तनेस्यजंतीत्यर्थः इ· अर्थध्यायनात्पर्यं ॥ चित्तंविद्रूप
तोन हृदयमनुगतोभासते प्रत्यगात्माबाह्यभूम्यादिभूतेषुतिष्ठाय
तगुणैः संप्रविष्टोविभाति वेदे ओंकाररूपःसवितरिमहसावीर्यव
त्पूर्जितेनप्राप्तिस्तंवेत्तियोसौममतनुरितितत्सप्तमेनोक्तमात्ते इ·
इतिश्रीमद्दैवज्ञपंडितसूर्यविरचितायांभगवद्गीतासप्तमोध्यायः ७

वनमालीटीका

अधिभूताधिदैवंमांसहितंब्रह्मसंज्ञितंमांयेविदुर्जानंतियेचयज्ञाख्ये
नमद्रूपांतरेणसहितंचमांविदंतितेमयिनित्ययुक्तमनसोभूत्वाप्रया
णकालेमामेवप्राप्नुवंतीत्यर्थःतेब्रह्मतद्विदुःकृत्स्नमध्यात्मंकर्म
चेतिअधिभूतमधिदैवंविदुरितिवक्तव्येसाधिभूताधिदैवंमामित्यु
क्तिरधिभूतादितानस्वरूपानर्थत्वसूचनार्थं अध्यात्मादिपाठा
र्थोउक्ताध्यायेवक्ष्यंते भगवद्भजनादमत्तस्त्राणोपायोनास्तीति
भावः इ· ॥ इतिगीतायांवनमालीसप्तमोध्यायः ७ ॥

अथ वैजयंतीटीका

सतेभ्योप्यन्तोयेसकामामद्भक्ताःसत्त्वितेपिमद्भजनप्रभावेणसंसारं
तरंतीत्याह साधिभूताधिदैवंमिति अधिभूतंचाधिदैवंप्रकृतिपुरु
षद्रूपंतेनसहवर्ततइतिसाधिभूताधिदैवंसर्वैसर्थ्यसहितंचपुनः

चानयोःसमाहारोऽधि भूताधिदैवं

गी॰ अधियज्ञं यज्ञकर्माधिष्ठातृत्वेन वर्तत इत्यधियज्ञमिंद्रादिदेवतं तेन सहवर्तमानं सा
टी॰ धियज्ञं इंद्राद्यात्मतयावस्थितं मां सर्वेश्वरं सर्वांतर्यामिनं ये ये ऐश्वर्यकामास्तेनोपि
स॰ विदुर्जानंति तेपि च प्रयाणकाले स्थूलदेहवियोगसमये: पि मां युक्तचेतसो
विदुः चेतनाचेतनयोरंतरात्मानं सकलकारकरूपं सर्वनियंतारं मां ज्ञात्वा सं
सारान्मुच्यंत इत्यभिप्रायः ३० अक्षराक्षायहितं यस्मिन्नमंति विमुक्ता
144 हरेः भक्ता विंदंति यज्ज्ञानं तं कृष्णं नौमि सप्तमे ७ ॥ इति कृष्णमेव जयंतीस
प्तमोध्यायः ७ ॥

मधुसूदनीटीका

नैवंभूतानां मद्भक्तानां मरणकालेपि विवशकरणतया मद्विस्मरणं शंक
नीयं यतः साधिभूताधिदैवं अधिभूताधिदैवाभ्यां सहितं तथा साधियज्ञं च अ
धियज्ञेन सहितं मां ये विदुः चिंतयंति ते युक्तचेतसः सर्वदा मयि समाहि
तचेतसः संतः तत्संस्कारपाटवात् प्रयाणकाले प्राणोत्क्रमणकाले
करणग्रामस्यात्यंतव्यग्रतायामपि चकाराद्यत्नेनैव मत्कृपया मां स
^ज्ञानंति र्वात्मानं विदुः तेषां मृतिकालेपि मदाकारैव वृत्तिर्भवति सर्वदा चिंतन सं
स्कारपाटवाद्भवति तथा च ते मद्भक्तियोगात्कृतार्था एव भवंतीति भावः अधि
भूताधिदैवाधियज्ञपदानां व्याख्यानमुत्तरेध्याये अर्जुनप्रश्नपूर्वकं व्याख्यास्यति भग
वानिति सर्वमनाविलं तदनेन माध्यमाधिकारिणं प्रति ज्ञेयं मध्यमाधिका
^च रिणं प्रति ध्येयं लक्षणया मया व्याख्यातं यद्ब्रह्मानंदपदप्रतिपाद्यं ब्रह्मनिरूपि
तं ३० ॥ इति श्रीमधुसूदनीटीकायां सप्तमोध्यायः ७ ॥

सदानंदीटीका

एवंभूतास्तु मद्भक्ता मरणकालेपि मां हरिं न विस्मरंतीति किं वाच्यं जीवने स
ति साधवः १ ये अधिभूताधिदैवाभ्यां सहितं चिंतयंति मां अधियज्ञेन सहि
तं सर्वदा तन्मयाः अपि २ प्राणोत्क्रमणकालेपि तत्संस्कारैकपाटवात्
करणव्यग्रतायां च सर्वथा इंद्रियगणस्य तु ३ अनायासेन मद्भक्ता मां विदु
रर्जितसंस्कारपाटवादेव सर्वथा तेषां स्यान्मदाकारैकधीगतिः ४ एवं
गुणयोहरेः ५ एवं ज्ञानमुक्ताकाभ्यां प्रश्नबीजं निधाय च विस्तरेणोत्त
रेत स्पष्टं व्याख्यास्यति हरिः स्वयं ६ तदेतच्छुद्धबुद्धीनां ज्ञेयं ब्रह्मनिरूपि
तं मध्यमाधिकारिणां ध्येयं चोपाय हारिणेरिते ७ ३० योमायावीमहि

णः प्रकटितमहिमा वेदसिद्धांतगीतो योभक्तार्थं स्वरूपं धरति नवघनं स्वे
च्छयाधवदृष्णः यस्यांघ्रिद्वंद्वमीडं जननमृतिजलधिं संतरंत्याश्रिताये
नं श्रीकृष्णं हृदिस्थं सततमिह सदा संश्रयेहं स्वभक्त्या ॥ २९ मायया
स्पातिगूढप्रभुरगणगुणा सर्वसंसारहेतुर्नोवर्त्तेनैः सदाक्याहरिप
दशरणं ये प्रपन्ना न भक्त्या यत्पादांभोरुहांतर्भ्रमति विजनतः संप्र
विषयैर्निरत्या मग्नलग्नैव नित्यं नमामि हं मुरारिं भृंगं समीडे प्रपद्ये ॥
इति श्रीभावप्रकाशे श्रीसदानंदविरचिते समभक्तिप्रधानोयं सप्तमो
ध्यायः ७ ॥

नीलकंठीटीका

पूर्वं तत्पदार्थविवेकं सयोगभक्तिहेतुं समाप्य तत्प्राप्त्युपायभूतामुपासनां
सक्रमभक्तिफलानि विस्तरेण वक्तुकामः संक्षेपेण सूचयति साधि
भूतेति अधिभूतं चाधिदैवं च ताभ्यां सहितं साधिभूताधिदैवं तथा
अधियज्ञेन सहितं साधियज्ञं च मां ये विदुः उपासते ते युक्तचेतसः य
तः नित्यं समाहितचित्ताः ते मां प्रयाणकालेपि सर्वजगत्स्वामी अहमेके
विद्युरेव भावनादार्ढ्यात् मरणकालेपि तस्य तान्मत्प्रसादेन भवन्त
तो भगवति तैस्तैर्येगुणैः सह भावनाकर्तव्येति भावः अधिभूतादिपदा
र्थं तु भगवानेव व्याख्यास्यतीति नोक्तं वेतावयं ३० ॥ इति श्रीगण
पर्वणि नैलकंठीये भारतभावदीपे सप्तमोध्यायः ७ ॥ ॥

आनंदीटीका

युक्तचेतसः आत्महितेन योगाभ्यासेन समाहितांतःकरणाः एतद्व्या
ख्यानमन्यदपि माध्यायेप्रसाज्ञे शुविस्तेयत इति शुभम् ३० ॥ इति
श्रीपरमेश्वरलक्ष्मणो आनंदीटीकानाम सप्तमोध्यायः ७ ॥

रामकंठीटीका

गीताख्याये ये योगिनि प्रपगताः सन्मते तत्स्वरूपे संततः समग्रकालितहृत्ताः
केपिलोके यथास्मिन् निःसंदेहाः सकलभवनाभोगभावव्यवस्था
हस्तन्यस्तामलकफलवद्व्याक्रमालोकयंत ३० ॥ इति श्रीराजानक
रामकंठविरचिते वाक्यार्थान्वयमात्रे सर्वतोभद्रनाम्नि भगवद्गीता

गी॰
टी॰
स॰

145

जीवन्मुक्तानांदेहपातसमये विदेहकैवल्यप्राप्तिर्यतोनोपिमुक्तत्वम्

विवरणोनामकं टीकायांसप्तमोध्यायः ७ ॥

नासिकी टीका

अथविदेहमुक्तानांदृत्तमुक्तरध्याये विवक्षुर्बीजभूतंतदुपस्थानीयंश्लोकमाह ॥ ॥

येममात्मानमेवभूतंतदुपायकृपायाविजानंति कीदृशमधिभूतेना धिदैवेनाधियज्ञेनचसहितंसंतमेव नपरंवशुक्ताः चेतसोनित्यमवहि तांतः करणाःप्रयाणकालेदेहत्यागसमयेपिमांप्रतिगात्मानंविदुः साक्षात्कुर्वंति विदेहमुक्ताभवंतीत्यर्थः ननुयोगाद्भ्रंशंति अपिप्रा णजीवविच्छिन्नामपिचैवधारणे अधिभूतादिपदानामर्थमनंतराध्या येवक्ष्यति ॥ ३० इतिश्री लासिकीटीकायांयो गोनामसप्तमोध्यायः ७ ॥

पंचोलीटीका

उत्तराध्यायबीजंप्रतिपादयति साधिभूतेति येमांसाधिभूतनाधिदैवंमांअ धिभूतंचअधिदैवंचअधिभूतनाधिदैवेनसहानेनवर्तते इतिसाधिभूता धिदैवंसाधियज्ञमधियज्ञेनसहवर्ततइतिसाधियज्ञंमांजानंतितेयुक्त चेतसः प्रयाणकालेमरणकालेपिमांविदुः तेषांप्रतिवेदनायीडि तानामपिकृपयाचितेआगच्छामि ३० इतिपंचोलेसप्तमोध्यायः ७ ॥

रणवीरसमिद्बोधिनी

साधिभूतेति अधिभूताधिदैवाधियज्ञसहितंमांपरमेश्वरंयेविदुःते युक्तचेतसः युक्तंकर्मयोगाभ्यासेनसावधानंचेतोंतःकरणंयेषां ते प्रयाणकालेपिमरणसमयेपिमांविदुः नतुतदापिमांविस्मरंती ति नतेषांस्वार्थहानिरितिभावः अस्मादिपदानांव्याख्यानमग्रिमाध्यायेभगवतैवक्रियतेअतस्तोपरम्यतेइति भद्रं ३०॥ इतिश्रीरण वीरसमिद्बोधिन्यांभगवद्गीताव्याख्यायांसप्तमोध्यायः ७॥

मधुभाष्य
३० इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितेगीताभाष्येसप्तमो ध्यायः ७॥

भाषानुवाद

और ऐसे मेरे भक्तों को योगसे भ्रष्ट होने की शंका नहीं है यही
इस श्लोक से कहते हैं कि अधिभूत अधिदैव अधियज्ञ सहित
जो हम को जानते हैं तेई सदा सक्त चित्त मरण समय में भी
हम को जानि रखैं हैं उस वेलाभी व्याकुल होय हम को न
ही भूलते हैं इससे मेरे भक्त को योगभ्रष्ट होने का डर नहीं
है श्रीधरस्वामी अध्याय भरका अर्थ कहतेहैं कि जिसके भ
क्त ही यत्न से ज्ञानलाभ करतेहैं यही विज्ञानयोग नामक
सप्तम अध्याय भगवानने प्रकाशित किया ३० ॥
इतिजगन्नाथशुक्लविरचितायां मनभावतीटीकायां सप्तमोध्यायः ७

दोहा

मोहि अभिभूत अधिदैव अधियज्ञ सहित जो जान मरण समय
यभी मोहिको युगत हृदय तेहिं जान ३०॥ इतिश्री

146

